UTTARA RÁMACHARITA.

A SANSKRIT DRAMA

BY

BHAVABHÚTI.

EDITED AT THE REQUEST OF

EDWARD B. COWELL, M. A.

Principal of the Sanskrit College of Bengal,

BY

PREMACHANDRA TARKABÁGÍSÁ,

PROFESSOR OF RHETORIC IN THAT INSTITUTION.

WITH A SHORT COMMENTARY.

Calcutta:

PRINTED AT THE BANGALA PRESS.

1862.

Digitized by Google

Ind L740.6

HARVARD COLLEGE LIBRARY
FROM THE ESTATE OF
CHARLES ROCKWELL LANMAN
MARCH 15, 1941

Digitized by Google

उत्तररामचरितम् ।

नाम

नाटकं ।

—०()()०—

महाकविश्रीभवभूतिविरचितं ।

—०*०—

श्रीप्रेमचन्द्रतर्कवागीशभट्टाचार्य्यकृत

संक्षिप्तटीकासहितं ।

—००—

संस्कृतपाठशालाध्यक्ष

श्रीयुक्तकाशीनाथसाहित्यानुमत्या ।

कलिकाता ।

बाङ्गालायन्त्रे मुद्रितम् ॥

शकाब्दाः १७८३ । इं १८६२ ॥

Digitized by Google

Digitized by Google

NOTICE.

The Sanskrit College edition of Sakuntalá (published in 1860) having been favourably received in Europe as well as in this country, I have been encouraged to continue the series by the publication of the Uttara Ráma Charita.

This drama was printed in Calcutta in 1830, under the authority of the Committee of Public Instruction, but that edition has long since ceased to be procurable.

The present edition has been prepared (like that of the Sakuntalá) by Pundit Prema Chandra Tarkabágísa, the Professor of Rhetoric in the Sanskrit College of Calcutta; and he has compared the former printed text with two manuscripts, one procured from Benares, the other in the Telingana character, lent to me by Pundit Lingam Lakshmoji of Vijayanagaram. Several errors have in this way been corrected and some preferable readings adopted. As an example I would only mention the change introduced in the 7th line of the second page, where the unintelligible reading of the old edition is very happily altered to

एषोऽहं कार्य्यवशादायोधिकस्तदानीन्तनश्च संवृत्तः ।

The Pundit has also added a short commentary, similar to that printed with the Sakuntalá, and I

Digitized by Google

do not doubt that this will be particularly acceptable, as the only commentary on the Drama, which has fallen in my way, is a very inferior performance.*

EDWD. B. COWELL,
Principal Sanskrit College.

Calcutta,
March 20th, 1862.

* Written by Bhadra-Nárâyana; there is a M. S. of it in the Sanskrit College Library (No. 93.)

Digitized by Google

विज्ञापनी।

—०()*()०—

उत्तररामचरितं नाम नाटकमिदं सुविख्यातकविकीर्त्तिना श्रीभवभूतिनाम्ना महाकविना विरचितं, स किल विदर्भविषय वर्त्तिनि पद्मनगरनाम्नि नगरे काश्यपकुलतिलकाम्नीचकरुढ नामकाच्छ्रोत्रियद्विजोत्तमादुदभूत्, भोजप्रबन्धादिप्रबन्धालोच्च मया विज्ञातमिदं, यदसौ महाकविर्धारानगरीपतेर्भोजभूभुजः कान्यकुब्जेश्वरस्य च यशोवर्म्मणः समाजे सामाजिकप्रधानतां प्रपेदे, दृश्यन्ते चास्य मालतीमाधवमहावीरचरितोत्तररामचरि-ताभिधेयाः सहृदयहृदयबन्धास्त्रयः प्रबन्धाः। ततश्च तत्कृतमेत न्नाटकमितोऽर्व्वाक् सप्तशतमादपि संवत्सरात्पूर्व्वं सम्भूतमिति सम्भाव्यते। नाटके चास्मिन् करुणानुप्राणितो विप्रलम्भशृङ्गार रसः प्रधानं, सच प्रसाद,वस्तुस्वभावस्फुटत्वादिगुणगुम्फितै रत्नन्यासायितैश्च तैस्तैः पदपदार्थैरेवमुद्दीपितः येन सहृदय एव विद्वज्जनाः कामपि काव्यरसजर्ज्जरां लोकोत्तरचमत्कारसारां नि-र्वृतिमनुभवन्ति।

पूर्व्वस्मिन्नस्मिन् प्रदेशे विरलप्रचारस्यास्य पुस्तकमेकं संस्कृत विद्यैकपक्षपातिना श्रीमद्दुर्जनसनसाहेबेन कृतस्विदानीय मुद्रया यन्त्रयोन्नीतं, तच्च शोधितमप्यन्तरान्तरा यस्मिन्दिविरचितमस-क्तमवाप्तीत्।

संप्रति कलिकातासंस्कृतविद्यामन्दिराधिपतिना मतिमतां

Digitized by Google

प्रवीणेन श्रीमता काशीनाथशास्त्रिणान्त्रादिदेशतः कतिचित् पुष्पकाव्यनाम्न संक्षिप्तटीकाकरणपुरःसरतत्परिशोधनायाज्ञप्तो दिष्टः। मया च तदादेशवशंवदेन यथामति तत्सम्पादनमनुष्ठितम्।

सोऽहं संप्रति सहृदयधुरीणान् सविनयमभ्यर्थये, विद्वांसो मत्कृतिरत्न समाहृत्य, प्रयातु च मे प्रयासः सफलतामिति।

श्रीप्रेमचन्द्र शर्म्मा

Digitized by Google

उत्तररामचरितम्

नाम

नाटकम् ।

इदं कविभ्यः पूर्व्वेभ्योनमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥ *

नान्द्यन्ते † सूत्रधारः ।

---

* पूर्व्वेभ्यः कविभ्योवाल्मीक्यादिभ्यः नमोवाकं नमउक्ति । वैदिकोऽयं प्रयोगः क्तान्तमव्ययं चस्य कादेशश्छान्दसः । नमस्कारस्य वाकोवचनं यत्र तद्यथा तथेति क्रियाविशेषणं वा नमस्कारस्य कायिकवाचिकमानसिकत्वेन त्रिरूपतया वाचिकं नमस्कारं स्तवेत्यर्थः । इदं वक्ष्यमाणं प्रशास्महे प्रार्थयामहे । इदं पदस्य प्रतिपाद्यमाह विन्देमेति वयं वाचं देवतां विन्देम लभेमहि, वाचः कथं देवतात्वमिति विशेषणाभ्यामुपपादयति, अमृतां नित्यां, शब्दोनित्यइति मीमांसकाः । तथा आत्मनोब्रह्मणः कलामंशभूताम् अन्याश्चापि देवता नित्याब्रह्मणोऽंशभूताश्च । अमृतां रसवतीमिति अमृताख्यामितिच केचित् । कविभ्यइत्यत्र गुरुभ्यइति क्वचित्पाठः ।

† नान्द्यन्तइति नान्दीशब्दार्थं यथा भरते । देवद्विजनृपादीनामाशीर्व्वादपरायणा । नन्दन्ति देवतायस्मात्तस्मान्नान्दी प्रकीर्त्तिता । अन्यच्च, देवद्विजनृपादीनामाशीर्व्वन्दनपूर्व्विका । नान्दी कार्य्या बुधैर्यस्मान्नमस्कारेण संयुतेति ।

Digitized by Google

अलमतिविस्तरेण । अद्य खलु भगवतः कालप्रियनाथस्य * यात्रायामार्य्यमिश्रान् † विज्ञापयामि, एवमत्रभवन्तोविदां कुर्व्वन्तु ‡ अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनो § भवभूतिर्नाम ।

यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्त्तते ।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥ ¶

एषोऽहं कार्य्यवशादयोधिकस्यदानीन्तनस्य संवृत्तः ।** समन्तादवलोक्य । भो भो यदि तावदत्रभवतः पौलस्त्य कुलधूमकेतोर्महाराजरामस्यायमभिषेकसमयोराज्ञिन्दिवमसं-

---

* कालप्रियनाथस्य उज्जयिनीस्थमहाकालाभिधानस्य शिवलिङ्गस्य ।

† आर्य्यमिश्रान् सामाजिकश्रेष्ठान् ।

‡ विदांकुर्व्वन्तु, जानन्तु वेत्तेर्लोट आम् ।

§ श्रीकण्ठपदलाञ्छनः श्रीकण्ठपदोपाधिकः ।

¶ ब्राह्मणमित्यत्र ब्रह्माणमिति क्वचित्पाठः, तत्र ब्रह्माणं यमिति व्यस्तरूपकं ब्रह्माणं यथा वाग्देवी अनुवर्त्तते तथा इदमित्यर्थः । वश्येव वशंगता काचित् स्त्रीव । अनुवर्त्ततइत्यत्र अन्वव र्त्ततेति भूतप्रयोगोनरुचिरः । प्रयोक्ष्यतेइति अस्माभिरिति शेषः ।

** कार्य्यवशात् अयोध्याधिपरामस्य प्रमोदजनकत्वादि कार्य्यानुरोधात् आयोधिकः स्वदेशादयोध्यायामागतः तदानीन्तनस्य रामसमकालीनस्य संवृत्तस्तदभिमानी जातः ।

Digitized by Google

हृतानन्दनान्दीक * स्तत्किमिति विश्रान्तचारणानि चत्वरस्थानानि । †

प्रविश्य नटः । भाव ! प्रेषिताहीतः स्वगृहा ‡ न्महाराजेन स्वङ्गासमरसुहृदोमहात्मानः श्रवङ्गराक्षसाः, सभाजनोपस्थायिनो § नानादिगन्तागताश्चब्रह्मर्षयोराजर्षयश्च, यदाराधना यैतावतोदिवसानुत्सवआसीत् । अन्यच्च

वशिष्ठाधिष्ठितादेव्योगतारावमातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥

सूत्र । वैदेशिकोऽस्मीति पृच्छामि कः पुनरसौ जामाता ।

नटः । कन्यां दशरथोराजा शान्तां नाम व्यजीजनत् ।
अपत्यक्षतिकां ¶ राज्ञे लोमपादाय यां ददौ ॥

---

* असंहृतानन्दनान्दीकः अवारितानन्दजनकगीतवादित्रादिः ।

† विश्रान्तानिर्व्यापाराण्यारब्धानटायत्र तानि चत्वरस्थानानि रङ्गाजिराणि ।

‡ इतोऽयोध्यातः स्वगृहान् स्वान् स्वानास्पदान् प्रेषिताहीत इत्यत्र प्रेषिता हि ते इति क्वचित्पाठः ।

§ सभाजनाय सम्माननार्थमुपस्थायिनः समागताः । समाजोपस्थायिनइति पाठस्तु न मनोरमः ।

¶ अपत्यक्षतिकां क्षत्रियमपुत्रिकारूपां । यथाह मनुः । सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् । पुत्रं पुत्रगुणैर्युक्तं सविज्ञेयस्तु क्षत्रियः ॥ पुत्रमित्यत्र पुंस्त्वमविवक्षितं स्त्रियाऽपि क्षत्रियत्वादिकं सम्भवति, यथा एवञ्च औरसदुहित्रभावे दौहित्रक्षतश्लोकप्राप्त्यर्थं क्षेत्रजादिदुहितृणामपि प्रतिनिधित्वेनोपादानं सिद्धमेवेति दत्तकमीमांसा ।

Digitized by Google

विभाण्डकसुतस्याप्यृष्यशृङ्गस्योपयेमे, तेनच सांप्रतं द्वादशवार्षिकं सत्रमारब्धं, तदनुरोधात्कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजन * स्तत्र गतइति ।

स्तत्र । तत्किमनेन † एहि राजद्वारमेव स्वजातिसमये नोपतिष्ठावः । ‡

नटः । तेन हि निरूपयतु राज्ञः सुपरिशुद्धा § मुपस्थानस्तोत्रपद्धतिं भावः ।

स्तत्र । मारिष !

सर्व्वथा व्यवहर्त्तव्ये कुतोह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्ज्जनोजनः ॥ ¶

नटः । अतिदुर्ज्जनइति वक्तव्यम् ।

देव्यामपि हि वैदेह्यां सापवादो ** यतोजनः ।

---

* गुरुजनः कौशल्यादिकः ।

† अनेन उत्सवाभावकारणानुसन्धानेन ।

‡ स्वजातिर्वन्दिजातिस्तस्याः समयआचारः राजस्तुतिकरणरूपस्तेन उपतिष्ठावोगच्छावः ।

§ सुपरिशुद्धामिति यथास्माकं वचनीयता न भवेदिति भावः ।

¶ व्यवहर्त्तव्ये व्यवहरणीये विषये सर्व्वथा साकल्येन अवचनीयता अनिन्द्यता कुतः । व्यवहर्त्तव्यमिति पाठेतु सर्व्वथा सर्व्वाङ्गपरिशुद्धिसावधानतया व्यवहर्त्तव्यं वाक्प्रयोगः कर्त्तव्यः । अवचनीयता प्रयुक्तायावाचोऽनिन्द्यता कुतः, अत्र हेतुमाह यथेति, स्त्रीणामिव वाचां साधुत्वे विषये जनो दुर्ज्जनोभवति स्त्रीरिव साध्वीरपि वाचोनिन्दतीत्यर्थः ।

** सापवादः सनिन्दः दोषाशङ्कीत्यर्थः ।

Digitized by Google

रक्षोगृहे खितिर्मूलमग्निश्रुद्धौलनिश्चयः ॥ *

सूत्र । यदि पुनरियं किम्वदन्ती महाराजं प्रति स्यात्तेऽतिकष्टं † स्यात् ।

नटः । सर्व्वथा ऋषयोदेवताश्च श्रेयोविधास्यन्ति । परिक्रम्य । भो भोः केदानीं महाराजः । आकर्ण्य । एवं जनाः कथयन्ति ।

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि ।
नीत्वोत्सवेन जनकोऽद्य गतोविदेहान् ।
देव्यास्ततोविमनसः परिसान्त्वनाय
धर्म्मासनादिशति वासगृहं नरेन्द्रः ॥

इति निष्क्रान्तौ प्रस्तावना । ‡

ततः प्रविश्यासनोपविष्टोरामः सीता च ।

रामः । देवि ! समाश्वसिहि, न ते हि गुरवश्चिरं शक्नुवन्त्यस्मान् वियोक्तुम् ।

---

* अग्निश्रुद्धौलिति तुरप्यर्थे । अनिश्चयः साध्वीत्वसंशयः । यद्वा तु यतः अग्निश्रुद्धौ विषये अनिश्चयोऽविश्वासः ।

† इयं किंम्वदन्ती सीतापवादविषयकजनश्रुतिः महाराजं प्रति स्यात् महाराजोरामो यदि तां ग्रहणयादित्यर्थः । अतिकष्टं सीतापरित्यागरूपम् ।

‡ प्रस्तावनात्र प्रयोगातिशयरूपा, यथा यदि प्रयोगएकस्मिन् प्रयोगेऽन्यः प्रयुज्यते । तेन पात्रप्रवेशस्त्वेप्रयोगातिशयस्तदेति दर्पणः । अत्र स्तुतिप्रयोगोद्यतेन सूत्रधारेण रामस्यान्तःपुरप्रवेशरूपं प्रयोगान्तरं प्रयुञ्जानेन सीतारामयोः प्रवेशः प्रयोजितः ।

Digitized by Google

किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
सङ्कटाद्यास्थितायोनां प्रत्यवायैर्गृहस्थता ॥ *

सीता । जाणामि अज्जउत्त ! जाणामि किन्तु सन्दाव आरिणोबन्धुजणविप्पओआ होन्ति (१) ।

रामः । एवमेतत् एते हि हृदयमर्म्मच्छिदः संसारभावाः येभ्योबीभत्समानाः † सन्त्यज्य सर्व्वान् कामा ‡ नरण्येमनीषिणोविश्राम्यन्ति ।

प्रविश्य कञ्चुकी । रामभद्र ! दृत्यर्द्धोक्तिः । सावधानं । महाराज !

रामः । सस्मितम् । आर्य्य ! ननु रामभद्रदृत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य, तद्यथाभ्यस्तमभिधीयताम् ।

कञ्चु । देव ऋष्यशृङ्गाश्रमादृष्यशृङ्गः प्राप्तः ।

सीता । अज्ज ! तदो किं विलम्बीअदि (२) ।

रामः । त्वरितं प्रवेशय ।

---

(१) जानाम्यार्य्यपुत्र ! जानामि, किन्तु सन्तापकारिणोबन्धुजन विप्रयोगा भवन्ति ।

(२) आर्य्य ! ततः किं विलम्ब्यते । अविलम्बं तं प्रवेशयेत्यर्थः ।

* अनुष्ठानानां होमादिविधेयकर्म्मणां नित्यत्वं अकरणे प्रत्यवायजनकत्वं कर्त्तृ स्वातन्त्र्यं स्वेच्छाविहारित्वमपकर्षति निवारयति । अनुष्ठाननित्यत्वादितिपञ्चम्यन्तपाठे अपकर्षति अपकृष्टं भवति स्वल्पं भवतीत्यर्थः । प्रत्यवायैः पदे पदे पापसमूहेत्यर्थः । सङ्कटा दुर्निर्व्वाहा ।

† बीभत्समानाः संसारभावान्निन्दन्तोनिवर्त्तमानाः ।

‡ कामान् विषयान् ।

Digitized by Google

कञ्चुकी निष्क्रान्तः ।

प्रविश्य अष्टावक्रः । स्वस्ति वाम् ।

रामः । भगवन्नभिवादये, इतआस्यताम् ।

सीता । भअवं ! णमोदे, अवि कुसलं सजामातुअस्स गुरुजणस्स अज्जाए सन्ताए अ (१) ।

रामः । निर्विघ्नः सोमपीथी,* आवुत्तो † मे भगवानृष्यशृङ्गः आर्य्या च शान्ता ?

सीता । अच्चेवि सुमरेदि ? (२)

अष्टा । उपविश्य । अथ किं ; देवि ! कुलगुरुर्भगवान् वशिष्ठस्त्वामिदमाह ।

विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमोजनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां,
येषां कुलेषु सविता च गुरुर्व्वयञ्च ॥

तत्किमन्यदाशास्महे, केवलं वारप्रसवा भूयाः ।

---

(१) भगवन्नमस्ते अपि कुशलं सजामातृकस्य गुरुजनस्य आर्य्यायाः शान्तायाश्च । सजामातुअस्येत्यत्र समग्गस्सेति क्वचित् पाठः समग्गस्सेति सं ।

(२) अस्मानपि स्मरति । अपीति प्रश्ने । अच्चेवि इत्यत्र अच्चे वा इति क्वचित्पाठः ।

* सोमपीथी सोमलतारसपायी कृतसोमयागइत्यर्थः । पातुतुदि विचरिचि सिचिभ्यस्थगिति पिवतेस्थक् ततोऽस्त्यर्थेइन् ।

† आवुत्तो भगिनीपतिः ।

Digitized by Google

रामः। अनुगृहीताः स्मः।

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ *

अष्टा। इदञ्च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयोभूयः सन्दिष्टं, यः कश्चिद्गर्भदोहदो † भवत्यस्याः सो ऽवश्यमचिरात्सम्पादयितव्य इति।

रामः। क्रियते यद्यदेषा कथयति।

अष्टा। ननान्दुः पत्या ‡ च देव्याः सन्दिष्टमवश्यमनेन।

वत्से कठोरगर्भेति नानीतासि, वत्सोऽपि रामभद्रस्यविनोदनार्थमेव स्थापितः। तत्पुनर्पूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामीति।

रामः। सहर्षस्मितम्। तथास्तु। भगवता वशिष्ठेन किमादिष्टोऽस्मि।

---

* लौकिकानां लोकव्यवहारपराणां साधूनामाप्तानां वाक् अर्थं विषयमनुवर्त्तते अनुरुध्यते विषयं निश्चित्यैव आप्तावाक्यं प्रयुञ्जतइत्यर्थः अतएवोक्तं नहि वाक्यार्थमज्ञात्वा वाक्यरचनेति। आद्यानामादिकालोत्पन्नानां तपःश्रेष्ठानाञ्च ऋषीणां पुनर्वाचमेवार्थोऽनुधावति विषयमनालोच्य प्रयुक्तापि ऋषीणां वाक् निरर्था न भवतीत्यर्थः।

† गर्भदोहदो गर्भे जाते गर्भिण्या अभिलाषः करकङ्कणवद्गर्भशब्दप्रयोगः पौनरुक्त्यं नावहति। दोहदशब्दस्य दोहदं देहदं श्रद्धा लालसेति नाममालादौ स्त्रीवत्प्रदर्शनेऽपि पुंस्त्वस्यापि चक्षुषु दर्शनात् द्विलिङ्गता।

‡ ननान्दुर्भर्तृभगिन्याः।

Digitized by Google

अष्टा । श्रूयताम् ।

जामात्रयज्ञेन वयं निरुद्धास्तं बालएवासि नवञ्च*राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्यात्तस्माद्यशोयत् † परमं धनं वः ॥

इति ।

रामः । यथाह भगवान् मैत्रावरुणिः ।

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतोनास्ति मे व्यथा ॥

सीता । अदोज्जेव राहवकुलधुरन्धरो अज्जउत्तो (१)

रामः । कः कोऽत्र भोः ! विश्राम्यतां भगवानष्टावक्रः ।

अष्टा । उत्थाय परिक्रम्य च । अये ! कुमारलक्ष्मणः प्राप्तः ।

इति निष्क्रान्तः ।

प्रविश्य लक्ष्मणः । जयति जयत्वार्य्यः । आर्य्य ! तेन चित्रकरेणास्मदुपदिष्टमार्य्यस्य चरितमस्यां वीथिकाया ‡ मभिलिखितं, तत् पश्यत्वार्य्यः ।

रामः । जानासि वत्स दुर्मनायमानां देवीं विनोदयितुं । तत्कियन्तमवधिं § यावत् ।

लक्ष्म । यावदार्य्याया ऊताग्रने विष्णुद्विम् ।

---

(१) अतएव राघवकुलधुरन्धर आर्य्यपुत्रः ।

---

* नवमचिरप्राप्तम् ।

† तस्मात्प्रजारञ्जनात् यद्यशोभवति तदेव वः परममत्युत्कृष्टं धनम् ।

‡ वीथिकायां चित्रपटगतयंत्रौ ।

§ अवधिशब्दः सीमार्थकत्वादत्रान्तसीमापरः ।

Digitized by Google

रामः। शान्तम्।

उत्पत्तिपरिपूतायाः किमन्याः पावनान्तरैः *।
तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः॥

देवि देवयजनसम्भवे! प्रसीद एष ते जीवितावधिः प्रवादः †।

कष्टं जनः कुलधनैरनुरञ्जनीय
स्तोयादुरुक्रमभिवं न हि तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्द्ध्नि स्थितिर्नचरणैरवताड़नानि॥ ‡

सीता। भोदु अज्जउत्त! भोदु, एहि पेक्खदु दाव दे चरिदं। (१) इत्युत्थाय परिक्रामति।

---

(१) भवतु, आर्यपुत्र! भवतु एहि पश्यामस्तावत्ते चरितम्।

---

* उत्पत्त्या जन्मनैव परिपूतायाः। पावनान्तरैर्वज्रयादिभिः।

† देवयजनसम्भवे यज्ञभूमिसमुत्थिते। प्रसीद मा कुप्य। जीवितावधिर्यावज्जीवनं प्रवादोऽकृताग्निविशुद्धिरूपोऽपवादः।

‡ नन्वेषप्रवादोममासाध्वीत्वमग्निनैवैव वचनाज्ज्ञातमिति त्वमेवात्र हेतुरित्यत आह कष्टमिति। कुलमेव धनं येषां तैः कुलस्त्रीकचक्षिस्वमिच्छद्भिरित्यर्थः जनोलोकः कष्टमनुरञ्जनीयः साध्वी परिग्रहादिसत्कर्मान्वितत्वविख्यापनया सन्तोषणीयः एतत्पक्षकरमित्यर्थः, तत्तस्माज्जनानुरञ्जनमात्रहेतुत्वात् ते अतिसाध्वा अपि तव अग्निवमप्रियं परगृहावासदूषितां त्वां न ग्रहीष्यामीत्येवंप्रायं यन्नोऽस्माकमुक्तं वचनं तत् नहि नैव क्षमं योग्यम् अयुक्तमित्यर्थः। दृष्टान्तेनेदं द्रढयति नैसर्गिकीत्यादि। नैसर्गिकी स्वभावसिद्धा।

Digitized by Google

लक्ष्म । इदन्तावदालेख्यम् ।

सीता । निर्व्वर्ण्य । के एदे उअरि णिरन्तरट्ठिदा उअ त्थुणन्ति विअ अज्जउत्तं (१)।

लक्ष्म । देवि! एतानि सरहस्यानि जृम्भकास्त्राणि, यानि भगवतः छायात् कौशिकस्तपिमुपसंक्रान्तानि तेनच ताड़का बधे प्रसादीकृतान्यार्य्यस्य ।

रामः । वन्दस्व देवि ! दिव्यास्त्राणि ।

ब्रह्मादयोब्रह्महिताय तस्था परस्सहस्राः प्रददृशुर्पांसि । *
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥

सीता । णमो णमो एदाणं । (२)

रामः । सर्व्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति ।

सीता । अणुग्गहीदम्हि । (३)

लक्ष्म । एष मिथिलावृत्तान्तः । nīla dalan nava kutpala | syāmala snigdha masrna 'soft tender.

सीता । अज्जहे दलणवणीलुप्पलसामलसिणिद्धमसिण
sobhyamāna mānasaladeha | saubhāgyena vismaya stimita²
सोहमाणमसलदेहसोहग्गेण विम्हअत्थिमिदाददीसन्त

² स्तिमितं

---

(१) के एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्य्यपुत्रम् ।

(२) नमोनम एतेषाम । एतेषामिति सम्बन्धविवक्षया षष्ठी । क्वचित् एदेअ इत्येव पाठः ।

(३) अनुगृहीतास्मि ।

---

* ब्रह्महिताय तपस्यतां ब्राह्मणानां तपोविघ्ननिवारणाय हितार्थम् । परस्सहस्राः सहस्राधिकाः प्रददृशुरित्यत्र । परात्कृतसहस्रयोरिति सुडागमः ।

Digitized by Google

सुन्दरसिरी अणादरखण्डिदसङ्करसरासणो सिहण्डमुद्धमुह मण्डलो अज्जउत्तो आलिहिदो । (१)

लक्ष्म । आर्ये ! पश्य ।

सम्बन्धिनो * वशिष्ठादिनेष तातस्ववार्चति ।
गौतमश्च शतानन्दोजनकानां पुरोहितः ॥

रामः । दृष्टव्यमेतत् ।

जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः ।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥

Vikramāditya

सीता । एदेक्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदिक्खिदा तुम्हे, अज्जो जाणामि, तस्मिंज्जेव्व पदेसे तस्मिंज्जेव्व काले वत्तामि । (२)

रामः । एवम् ।

---

(१) अहो दलन्नवनीलोत्पलश्यामलस्निग्धमसृणश्लक्ष्णोभमान मांसलदेहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसुन्दरश्रीः अनादरखण्डित शङ्करशरासनः शिखण्डमुग्धमुखमण्डलआर्य्यपुत्र आलिखितः । मसृणेति चिक्कणेत्यर्थः, देहसौभाग्येनेत्युपलक्षणे तृतीया । तातेत्यत्र ताआरजणेति क्वचित्पाठः । अनादरेति अवज्ञयेत्यर्थः । शिखण्डचूडा । शिखण्डोबर्हचूडयोरिति मेदिनी ।

हैमया

(२) । एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारोभ्रातरो विवाहदीक्षिता यूयम् । अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्त्ते । गोदानमङ्गलं विवाहात् प्राक् क्षत्रियाणां गवीदानरूपं माङ्गल्यकर्म । केशच्छेदनमिति केचित् ।

---

* सम्बन्धिनो वैवाहिकसम्बन्धवतः ।

Digitized by Google

समयः सवर्त्तत दूरवैष यत्र मां
समनन्दयत्सुमुखि गौतमार्पितः । *
अयमागृहीतकमनीयकङ्कण
स्तव मूर्त्तिमानिव महोत्सवः करः ॥

लक्ष्म । इयमार्य्या, इयमपार्य्या माण्डवी, इयमपि बधूः श्रुतकीर्त्तिः । †

सीता । वच्छ इअं पि अवरा का । (१)

लक्ष्म । सलज्जस्मितमपवार्य्य । अये उर्म्मिलां ‡ पृच्छत्यार्य्या । भवत्वन्यतः सञ्चारयामि । प्रकाशम् । आर्य्ये दृश्यतां द्रष्टव्यमेतत् । अयञ्च भगवान् भार्गवः ।

सीता । ससम्भ्रमं । कम्पिदम्हि । (२)

लक्ष्म । आर्य्ये ! पश्य अयमार्य्येण, इत्यर्द्धोक्ते ।

रामः । साक्षेपम् । वत्स ! वज्रतरं द्रष्टव्यमन्यतोदर्शय ।

सीता । सस्नेहवज्रमानं निर्व्वर्ण्य । सुष्ठु सोहसि अज्जउत्त ! एदिणा विणअमाहप्पेण । (३)

लक्ष्म । एते वयमयोध्यां प्राप्ताः ।

रामः । साधु । स्मरामि हन्त स्मरामि ।

---

(१) वत्स इयमपरा का ।

(२) कम्पितास्मि ।

(३) सुष्ठु शोभसे आर्य्यपुत्र एतेन विनयमाहात्म्येन । विनयमाहात्म्यं परशुरामविजयरूपस्वोत्कर्षप्रकटनशालीनत्वम् ।

---

*गौतमार्पितः श्रुतानन्देन योजितः ।

† माण्डवी भरतपत्नी, श्रुतकीर्त्तिः शत्रुघ्नपत्नी ।

‡ उर्म्मिला लक्ष्मणस्य पत्नी ।

Digitized by Google

जीवत्सु तातपादेषु नवे दारपरिग्रहे ।
मादृभिश्चिन्त्यमानानां * ते हि नोदिवसागताः ॥
दृश्यमपि तदा जानकी ।
प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै †
दृशमनुकुलैर्मुग्धालोकं मिथः प्रहृदंधती मुखम् ।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै
रकृत मधुरैरज्ञानां मे कुतूहलमङ्गकैः ‡ ॥
लक्ष्म । एषा मन्थरा ।
रामः । अनुत्तरमन्यतो दर्शयन् । देवि वैदेहि !
दृङ्नदीपादपः सोऽयं शृङ्गवेरपुरे पुरा ।
निषादपतिना यत्र स्निग्धेनासीत्समागमः ॥
लक्ष्म । विहस्य स्वगतम् । अये मध्यमाम्बाहृत्तान्तोऽन्तरित § आर्येण ।
सीता । अज्जो एसो जटासञ्जमणवुत्तन्तो । (१)
लक्ष्म । पुनर्संक्रान्तलक्ष्मीकैर्यदृङ्नेक्ष्वाकुभिः स्तुतम् ।

---

(१) आर्य एष जटासंयमनवृत्तान्तः ।

---

* चिन्त्यमानानां सादरमुपलाल्यमानाम् ।

† प्रान्तयोः सन्निधस्थगण्डभागयोरुन्मीलन्तोऽल्पमात्राः कुन्तला अलकायेषां तैः ।

‡ मुग्धालोकं मनोज्ञच्छायम् । ज्योत्स्नाप्रायैर्ज्योत्स्नावदिन्दुवदानन्दजनकैर्वा । अम्बानामित्यत्र अङ्गानामिति पाठस्तु न मनोरमः ।

§ मध्यमाम्बा कैकेयी तस्याश्चरित्तान्तोवनवासहेतुर्वरदययाचनरूपः ।

Digitized by Google

धृतं वाल्मे तदार्घ्येण पुण्यमारण्यकव्रतम् ॥

सीता । एषा प्रसन्नपुण्यसलिला भगवती भागीरथी । (१)

रामः । देवि रघुकुलदेवते ! नमस्ते ।

तुरगविचयव्यग्रा*नुर्वीं भिदः सगराध्वरे
कपिलमहसामर्षात् भ्रष्टान् † पितुः प्रपितामहान् ।
अगणितननूतापं तप्त्वा तपांसि भगीरथो
भगवति ! तव स्पृष्टानङ्गैस्त्रिरादुददीधरत् ॥

वा त्वमम्ब ! खुषायामरण्यतीव सीतायां शिवानुध्यानपरा भव ।

लक्ष्म । एष भरद्वाजावेदितस्त्रिचकूटाद्रिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामोनाम ।

रामः । सस्पृहमालोकयति ।

सीता । सुमरेदि एदं पदेसं अज्जउत्तो । (२)

रामः । अयि कथं विस्मर्यते ।

श्लथस्खलितमुग्धान्यध्वसञ्जातखेदा
दभ्रिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिस्फुटितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥

लक्ष्म । एष विन्ध्याटवीमुखे विराधसंवादः ।

---

(१) एषा प्रसन्नपुण्यसलिला भगवती भागीरथी ।

(२) स्मरत्येतं प्रदेशमार्यपुत्रः ।

---

* तुरगविचयव्यग्रान् आश्वमेधिकाश्वान्वेषणतत्परान् ।

† अमर्षात् कपिलं प्रति क्रोधं प्रकाश्य तस्य सहसा भ्रष्टान् दग्धान् ।

Digitized by Google

talavrata = Fächer Palm-blatt ātapatra = Sonnenschirm

सीता । अलं दाव एदिणा, पेक्खामि दाव अज्ज उत्तहत्थधरिदतालवेण्टादत्तं अत्तणोदच्छिणारण्णप्पवेसारम्भं । (१)

cataract Brahmin of the 3rd ord., acute.

रामः । एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रमतरूणि * तपोवनानि ।
येष्वातिथेयपरमाः † ग्रमिनोभजन्ते
नीवारमुष्टिपचनागृहिणीगृहाणि ॥ (kapaśiṣṭapāṭhāḥ)

wild rice kautul.

nirala = untrich sellen (eka eka = sthānam) enakaha = ekaka tais virah° the flying clouds make away its darkness.

लक्ष्म । अयमविरलानोकहनिवह ‡ निरन्तरस्निग्ध
नीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः § सन्तत-
मभिष्यन्दमानमेघमेदुरितनीलिमा ¶ जनस्थानमध्यगोगिरिः
प्रस्रवणो नाम ।

रामः । स्मरसि सुतनु तस्मिन् पर्व्वते लक्ष्मणेन
प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि ।

sevāyā

---

(१) अलं तावदेतेन, पश्यामि तावदार्य्यपुत्रहस्तधृततालवृन्तातपत्रमात्मनोदक्षिणारण्यप्रवेशारम्भम् । अत्र अत्तणा इति पाठस्तु न मनोरमः ।

---

* वैखानसाश्रमतरूणीत्यत्र वैखानसाश्रिततरूणीति क्वचित्पाठः ।

† आतिथेयमतिथिकर्म्म अतिथिसेवेत्यर्थः तदेव परममति-कर्त्तव्यं येषां ते ।

‡ अनोकहनिवहो वृक्षसमूहः ।

§ गोदावरीस्रोतसा सशब्दगुहः ।

¶ सन्ततमभिष्यन्दमानः प्रकाश्यमानो मेघस्येव मेदुरितो निविडः स्निग्धोवा नीलिमा यस्य सः ।

Digitized by Google

स्मरसि सुरसनीरां * तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्त्तनानि † ॥
अपिच । किमपि किमपि मन्दं मन्दमासत्तियोगा
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिल ‡ परिरम्भव्यापृतैकैकदोष्णो
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥

लक्ष्म । एषा पञ्चवट्यां शूर्पणखा ।

सीता । हा अज्जउत्त ! एत्तिअंज्जेव दंसणं । (१)

रामः । अयि विप्रयोगत्रस्ते ! चित्रमेतत् ।

सीता । जधा तधा भोदु, दुज्जणो असुहं उप्पादेदि (२) ।

रामः । हन्त वर्त्तमानइव मे जनस्थानवृत्तान्तः प्रतिभाति ।

लक्ष्म । अयेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्यथयति यथा चालितमपि § ।

---

(१) हा आर्यपुत्र ! एतावदेव दर्शनम् । शूर्पणखाकृत्यवधारादितः परं त्वां चिरं न द्रक्ष्यामीत्यर्थः ।

(२) यथा तथा भवतु, दुर्जनोऽसुखमुत्पादयति । यथातथेति चित्रमयत्वाच्चित्रकोवेत्यर्थः । असुखमिति संप्रत्यपि तस्य संभविष्यत्त्वादिति भावः ।

---

* सुरसनीरामित्यत्र सरस्तीरामिति क्वचित्पाठः ।

† वर्त्तनानि अवस्थानानि ।

‡ अशिथिलेत्यत्र सपुलकेति क्वचित्पाठः ।

§ चालितमपि प्रतिक्षतमपि ।

Digitized by Google

the flood of tears, tho' the quivering lower eyelids restrain it, yet others divine that it comes of a heart smitten with displeasure.

जनस्थाने शून्ये विकलकरणैः * रार्य्यचरितै
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ *

Remark

सीता । सास्रम् । अद्द देव रघुउलाणन्द ! एव्वं वि मम-
कारणादो किलिन्तो आसी । (१)

लक्ष्म । रामं निर्व्वर्ण्य साकूतम् । आर्य्य ! किमेतत् ।

version, association of ideas.

अयन्ते वाष्पौघस्खलितइव मुक्तामणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्ज्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति विरसाघ्रातहृदयः † ॥

rich waltzing kinbawegen des (very violent metaphor).

Fortlaufende Reihe

रामः । वत्स ! तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाङ्मया विसोढः ।

---

(१) अयि देव रघुकुलानन्द ! एवमपि मम कारणात् क्लान्ता आसीः ।

---

* शून्ये निर्लोके । विकलानि व्याकुलानि करणानीन्द्रियाणि येभ्यस्तैः । क्वचित्पाठस्तविकलैरित्येव पाठः । करणानि कारणं व्यञ्जकानि विकलानि स्वभावच्युतानिच तैरित्यर्थः । ग्रावा पाषाणः । रोदिति रुदितवान् आशंसायां लट् एवं दलतीत्यपि । अचेतनानां दुःखवर्णनया का कथा चेतनानामित्यर्थापत्तिं प्रयोजयति ।

† मुक्तामणिसरोमुक्ताहारः । धरणीं विसर्पन्नित्यन्वयः । आवेगोव्याकुलत्वम् । उन्नेयोऽनुमेयः । विरसोदुःखं तेनाघ्रातं मुक्तापितं हृदयं यस्य सः । भवति च भराघ्रातहृदयेति पाठे भरेण उद्रेकेणाघ्रातहृदयः ।

Digitized by Google

दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रणइव वेदनां करोति ॥ *

सीता। हद्धी हद्धी अज्ज अहंबि अदिभूमिं गदेण रण्ण-
रण्णेण अज्जउत्तसूण्णं विअ अत्ताणं पेक्खामि (१)

लक्ष्म। स्वगतं। भवत्वन्यतः क्षिपामि। चित्रमवलोक्य प्रकाशम्।

अथैतन्मन्वन्तरपुराणस्य गृध्रराजस्य तत्रभवतस्तातजटायुषश्चरितविक्रमोदारणम् †।

सीता। हा ताद! णिव्वूढो दे अपच्चसिणेहो। (२)

रामः। हा तात काश्यप शकुन्तराज! क्व पुनस्त्वादृशस्य महतस्तीर्थस्य ‡ साधोः सम्भवः।

लक्ष्म। अयमसौ जनस्थानपश्चिमतश्चित्रकुञ्जवान्नाम दनुकबन्धाधिष्ठितो दण्डकारण्यभूभागः, तदिदमस्यामूकपर्वते मतङ्गस्याश्रमपदम्, दृयञ्च श्रमणा नाम सिद्धेश्वरी, तदेतत्पम्पाभिधानं सरः।

---

(१) हा धिक् हा धिक् अथाहमपि अतिभूमिं गतेन रण्यरण्येन आर्यपुत्रशून्यमिवात्मानं पश्यामि। अतिभूमिं गतेन। रण्यरण्येन चिन्तया।

(२) हा तात! निर्व्यूढस्ते अपत्यस्नेहः।

---

* प्रतिकृतिवाञ्छया प्रतिकारेच्छया तत्कालं तस्मिन् काले विशेषः, पुनः संप्रति विपच्यमानः पुनः पुनः स्मरणेन विपाकं गच्छन्।

† चरित्रञ्च विक्रमश्च तयोरुदाहरणं निदर्शनम्।

‡ महतस्तीर्थस्य गङ्गादिमहातीर्थवत्पूतस्य पावकस्य।

Digitized by Google

सीता । जत्थ किल अज्जउत्तेण विच्छड्डिदामरिसाधीणं पमुत्तकण्ठं रुदिअं आसी ? । (१)

रामः । देवि ! रमणीयमेतत्पम्पासरः ।

एतस्मिन् मदकलमल्लिकाख्य * पक्ष
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
वाष्पाम्भःपरिपतनोद्गमान्तराले †
संदृष्टाः कुवलयिनो भुवोविभागाः ॥

लक्ष्म । अयमार्योहनूमान् ।

disputed, reading of. Mahopakāri (!)

सीता । एसो सो चिरणिव्विसजीअलोअपच्चुद्धरणगुरुओवआरी महाणुभाओ मारुदी । (२)

रामः । दिष्ट्या सोऽयं महावाहुरञ्जनानन्दवर्द्धनः ।
यस्य वीर्य्येण कृतिनो वयञ्च भुवनानिच ॥ ‡

---

(१) यत्र किलार्य्यपुत्रेण विच्छर्दितामर्षाधीनं प्रमुक्तकण्ठं रुदितमासीत् । विच्छर्दितउद्रेकं गतोयोऽमर्षः अपहर्त्तारं प्रति क्रोधस्तस्याधीनं यथा स्यात्तथेत्यर्थः ।

(२) एष स चिरनिर्व्विसजीवलोकप्रत्युद्धरणगुरुकोपकारी महानुभावो मारुतिः । चिरं निर्विसोदुःखितोयोजीवलोकोऽस्मद्विधस्तस्य प्रत्युद्धरणं दुःखान्मोचनं तद्रूपोगुरुकोमहान् यउपकारस्तद्दानित्यर्थः ।

(*) मल्लिकाख्याः मलिनचक्षुश्चरणाकराजहंसविशेषाः । मल्लिर्नैर्मल्लिकाख्यास्ते इत्यमरः ।

† वाष्पाम्भसां परिपतनञ्च, उद्गमः पुनःपतनोपक्रमश्च तयोरन्तराले मध्ये, तदानीमेव दर्शनसम्भवादिति भावः ।

‡ भुवनानि च कृतीनि कृतज्ञवन्ति ।

Digitized by Google

सीता । वच्छ! एसो कुसुमिदकअम्बतरुतणडविदवरहिणो किलामधेओ गिरी । जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुहुत्तं मुच्छन्तो तुए पहुदिएण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो । (१)

लक्ष्म । सोऽयं शैलः ककुभसुरभि*र्माल्यवान्नाम यस्मिन्
नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

रामः । वत्सैतस्माद्विरम विरमातः परं न क्षमोऽस्मि †
प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः ॥

लक्ष्म । अतः परमार्य्यस्य तत्रभवतां कपिराक्षसानाञ्चासंख्यातान्युत्तरोत्तराणि कर्म्माश्चर्य्याणि, ‡ परिश्रान्ता चेयमार्य्या तद्विज्ञापयामि विश्राम्यतामिति ।

सीता । अज्जउत्त! एदेण चित्तदंसणेण पच्चुप्पण्णदोहदाए अत्थि मे विण्णप्पं । (२) ।

---

(१) वत्स एष कुसुमितकदम्बतरुताण्डवितबर्हिणः किं नामधेयोगिरिः । यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मुहूर्त्तं मूर्च्छन् त्वया प्रहृदितेनावलम्बितस्तरुतले आर्य्यपुत्र आलिखितः । अनुभावः प्रभावः सौभाग्यं लावण्यञ्च तन्मात्रस्य परिशेषोयत्र सा धूसरामलिना च श्रीर्यस्य सः ।

(२) । आर्य्यपुत्र ! एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मेविज्ञाप्यम् । प्रत्युत्पन्नदोहदायाः सञ्जाताभिलाषायाः ।

---

* ककुभसुरभिरर्জ্জुनकुसुमैर्गन्धवान् ।

† एतस्मात् मद्वियोगोद्दीपकमाल्यवद्दर्शनात् । न क्षमोऽस्मीति श्रोतुमिति शेषः ।

‡ कार्म्मस्वर्य्याणि सप्ततालभेदवालिबन्धसमुद्रबन्धनादीन्यद्भुतकर्म्माणि ।

Digitized by Google

रामः। नन्वाज्ञापय।

सीता। जाणे पुणोवि पसन्नगम्भीरासु वणराइसु विहरिस्सं, पवित्तणिम्मलसिसिरावगाहाञ्च भअवदीं भाईरहीं अवगाहिस्सं। (१)।

रामः। वत्स लक्ष्मण!

लक्ष्म। एषोऽस्मि।

रामः। अचिरं सम्पाद्नीयोऽस्यादेहद इति, संप्रत्येव गुरुभिः संदिष्टं तदस्खलितसुखसम्पातं रथमुपस्थापय।

सीता। अज्जउत्त! तुह्मेहिंपि तहिं गन्तव्वं। (२)

रामः। अयि कठिनहृदये! एतदपि वक्तव्यमेव। *

सीता। तेणहि पिअं मे। (३)

लक्ष्म। यथाज्ञापयत्यार्य इति निष्क्रान्तः।

रामः। प्रिये वातायनोपकण्ठे मुहूर्त्तं संविष्टौ † भवावः।

सीता। एवं भोदु, अवहरिअमि खु परिस्समजणिदाए णिद्दाए। (४)।

(१) जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रनिर्म्मलशिशिरावगाहाश्च भगवतीं भागीरथीमवगाहिष्ये। जाने मनसि चिन्तयामि। प्रसन्नाः स्निग्धा अपि गम्भीरा दुरवगाहास्तासु।

(२) आर्य्यपुत्र! युष्माभिरपि तत्र गन्तव्यम्।

(३) तेन हि प्रियं मे।

(४) एवं भवतु, अपहृते खलु परिश्रमजनितया निद्रया। परिश्रमोऽत्र गर्भभारजनितः।

* वक्तव्यमेवेति किमिति शेषः।

† संविष्टौ शयानौ।

Digitized by Google

रामः । तेनहि निरन्तर*मवलम्बस्व मामेव शयनाय ।

जीवयन्निव ससाध्वसश्रमस्वेदविन्दु† रधिकण्ठमर्पयताम् ।
वाऊरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥

तथा कारयन् सानन्दं । प्रिये किमेतत् ।

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहोनिद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥ ‡ ॥

सीता । विहस्य । स्थिरप्रसादा तुह्मे, इदोदाणिं किमवरं । (१)

रामः ।

स्नानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।

---

(१) स्थिरप्रसादा यूयम् इत इदानीं किमपरम् । स्थिरप्रसादा इति मयि प्रसन्नो भूत्वा विनिश्चेतुमित्यादि कथयसीत्यर्थः । इत इत्यादि अस्मादपरं किं सौभाग्यमाकाङ्क्षणीयमित्यर्थः ।

---

* निरन्तरमव्यवधानं गाढमित्यर्थः ।

† साध्वसं चित्रलिखितशूर्पणखादिदृष्टान्तस्य भविष्यत्त्व भ्रमेण विरहसम्भावनयोत्पन्नत्रासः, श्रमोगर्भभारखेदश्च ताभ्यां जनितैः खेदविन्दुभिः सहितः ।

‡ शक्य इति विकारस्य विशेषणत्वात् पुंस्त्वं शक्यमिति पाठस्तु न मनोरमः । मदो मद्योपयोगजः सम्मोहानन्दसम्भेदः । भ्रमयति अस्थिरत्वं नयति सम्मीलयति विलोपयति समुन्मीलयतीतिपाठे, स्वयं स्थिरत्वं नयतीत्यर्थः ।

Digitized by Google

एतानि ते सुवचनानि सरोरुहाक्षि *
कर्णामृतानि मनसश्च रसायनानि ॥ † ॥

सीता । पिअंवद एहि संविसक्ष । (१)

इति अयनाय समन्ततो निरूपयति ।

रामः । किमन्वेष्टव्यम् । ‡

आविवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः ।
त्वापहेतुरनुपाश्रितोऽन्यया रामवाऊरुपधानमेष ते ॥

सीता । निद्दं नाटयन्ती । अत्थि एदं अज्जउत्त अत्थि एदं । (२) इति स्वपिति ।

रामः । कथं प्रियवचना वक्षसि प्रसुप्तैव । निर्व्वर्ण्य सञ्जेष्टम् ।

दूयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः §
किमस्या न प्रेयो, यदि ¶ परमसह्यस्तु विरहः ॥

---

(१) प्रियंवद एहि संविशावः । संविशावः अयनं कुर्व्वः ।

(२) अस्तीदमार्य्यपुत्र अस्तीदम् ।

---

* एतानि तानि वचनानि सरोरुहाक्ष्या इति क्वचित् पाठः ।

† रसायनानि पुष्टिकरौषधविशेषाः ।

‡ किम् उपधानादिकमन्वेष्टव्यं त्वयाभिष्यते । अपि संवेष्टव्य मितिपाठस्तु न क्वचिदः ।

¶ शिशिरः शीतलोमसृणोऽकठिनश्च । मसृणोऽकठिने स्निग्धे इति हेमः । मौक्तिकसरो मुक्ताहारः ।

§ यदीति सम्भावनायम् ।

Digitized by Google

प्रविश्य प्रतीहारी । देव उपस्थितः (१)

रामः । अये कः ।

प्रती । आसन्नपरिचारओ देवस्स दुम्मुहो । (२)

रामः । स्वगतम् । मुग्धान्तचारी दुर्म्मुखः, स मया पौरजानपदानपसर्पितुं * प्रयुक्तः । प्रकाशम् । आगच्छतु ।

प्रतीहारी निष्क्रान्ता ।

प्रविश्य दुर्म्मुखः । स्वगतम् । हा कधं सीदादेव्वाए ईदिसं अचिन्तणिज्जं जणाववादं देवस्स कधइस्सं, अहवा णिओओ क्खु ईदिसो मन्दभाअस्स । (३)

सीता । उत्त्रस्यते । हा अज्जउत्त ! कहिं सि (४) ।

रामः । अये सैवेयं रणरणकदायिनी † चिन्तादर्शनाद्विरहभावना देव्याः स्वप्नोद्वेगं करोति ।

सस्नेहमङ्गमस्याः परामृशन् ।

---

(१) देव उपस्थितः ।

(२) आसन्नपरिचारकोदेवस्य दुर्म्मुखः ।

(३) हा कथं सीतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि, अथवा नियोगः खल्वीदृशोमन्दभागस्य ।

(४) हा आर्य्यपुत्र कुत्रासि ।

---

* पौरजानपदान् पुरवासिनोजनपदवासिनश्च जनान् अपसर्पितुं चरितुं चरोभूत्वा अनुरक्तापरक्तान् पौरजानपदान् ज्ञातुमित्यर्थः । अपसर्पश्चरः स्पशश्चेत्यमरः । पौरजानपदे सञ्चारी प्रहित इति क्वचित्पाठः ।

† सैवेयमित्यत्र ममैवेति क्वचित्पाठः । रणरणकदायिनी चिन्ताकारिणी । चिन्ता रणरणश्च तदिति त्रिकाण्डम् ।

Digitized by Google

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र, जरसा यस्मिन्नहार्य्यो रसः ।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थिरं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥ *

दुर्मु । उपसृत्य । जयति जयति देवः । (१)

रामः । ब्रूहि यदुपलब्धम् ।

दुर्मु । उपसृप्यन्ति देवं पौरजानपदाः, विज्ञापयति वयं महाराजदशरथस्य रामदेवेनेति । (२)

रामः । अर्थवाद † एषः, दोषस्तु यः कश्चित् कथय, येन स प्रतिविधीयेत ।

दुर्मु । सावधानं शृणोतु देवः । (३) कर्णे इवमेवम् ।

रामः । अहह ! तीव्रसंवेगोवाम्ब इति मूर्च्छति ।

---

(१) जयति जयति देवः ।

(२) उपसृप्यन्ति देवं पौरजानपदाः विज्ञापयति वयं महाराजदशरथस्य रामदेवेनेति । दशरथस्येति सृ धातुयोगे कर्म्मणि षष्ठी ।

(३) शृणोतु देवः ।

---

* अद्वैतमेकरूपम् । अनुगुणमनुकूलं । रसोऽनुरागः । आवस्थं सौजन्याद्यानं तस्यात्ययात्प्राप्तात् । भद्रं कल्याणं । भद्रन्तु मङ्गले । मुस्तकश्रेष्ठयोः साधौ काञ्चने करणान्तरे इति हेम । करणान्तरञ्च क्रियाभेदः, क्रियाभेदेन्द्रियचैत्रकायसंवेशनेषु चेतिकरस्य पर्य्याये मेदिनी । एकं हि एकमपि ।

† अर्थवादः स्तुतिः ।

Digitized by Google

दुर्गे । आश्वसेदु देवी । (१)

रामः । आश्वस्य ।

हाहा धिक् परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः । *
एतत्तत्पुनरपि दैवदुर्विपाका
दालर्कं † विषमिव सर्व्वतः प्रसृप्तम् ॥

तत्किमत्र मन्दभाग्यः करोमि । विस्मृत्य सकरुणम् ।

अथवा किमन्यत् ।

सतां केनापि कार्य्येण ‡ लोकस्याराधनं व्रतम् ।
यत्पूरितं हि तातेन माञ्च प्राणांश्च मुञ्चता ॥

संप्रत्येव भगवता वशिष्ठेन सन्दिष्टम् । §

अपिच ।

यत्सावित्रै ¶ र्दीपितं भूमिपालै
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात्कश्मला किंवदन्ती **
स्याच्चेदस्मिन् हन्त धिङ्मामधन्यम् ॥

हा देवि देवयजनसम्भवे ! हा स्वजन्मानुग्रहपवित्रीकृत

(१) आश्वसितु देवः ।

* उपायैर्वह्निप्रवेशादिभिः ।

† आलर्कमुन्मत्तकुक्कुरसम्बन्धि ।

‡ केनापि कार्य्येण प्रियतमवस्तुपरित्यागादिनापि ।

§ वशिष्ठेन सन्दिष्टमिति युक्तः प्रजानामनुरञ्जने स्वा इत्यादिना ।

¶ सावित्रैः सूर्य्यवंशीयैः ।

** कश्मला निन्दिता किंवदन्ती जनश्रुतिः ।

Digitized by Google

वसुन्धरे ! हा जनकवंशनन्दिनि ! हा पावकविशिष्टात्मन्यतो प्रशस्तशीलशालिनि ! हा रामैकजीविते ! * हा महारण्यवास प्रियसखि ! हा तातप्रिये ! हा लोकप्रियवादिनि ! कथ मेवंविधायास्तवायमीदृशः परिणामः ।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्त्स्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥

दुर्मुखं प्रति । दुर्मुख ब्रूहि लक्ष्मणम्, एष ते नूतनो-राजा रामः समाज्ञापयति । कर्णे एवमेवम् ।

दुर्मु । कधं दाणीं अग्गिपरिसुद्धाए गब्भपरिप्फुडिद पवित्तरकुउलसन्ताणाए देवीए दुज्जणवअणादो एव्वं अणज्जं अज्झवसिदं देवेण । (१)

रामः । शान्तं । कथं दुर्ज्जनाः पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां, जातश्च दैवादचनीयवीजम् ।
यच्चाहुतं कर्म विशुद्धिकाले प्रत्येतु कस्तद्भुवि दूरवृत्तम् † ॥

तद्गच्छ ।

(१) कथमिदानीमग्निपरिशुद्धाया गर्भपरिस्फुटितपवित्ररघु-कुलसन्तानायादेव्या दुर्ज्जनवचनादेवमनार्य्यमध्यवसितं देवेन ।

* रामैकजीविते इत्यत्र राममयजीविते इति कचित्पाठः ।

† अभिमतोऽभीष्टतया परिगृहीतः नतु विद्वेषविषयतया इक्ष्वाकुवंशविद्वेषान्नैवं निन्दन्तीत्यर्थः । इक्ष्वाकुवंशोद्भवतइति पाठस्तु न सम्यक् । तर्हि कथं निन्दाया अवकाशइत्याह दैवादिति, वचनीयस्य निन्दायावीजं कारणं परिगृहीतसीतायाः पुनरादा-नरूपं । दूरवृत्तं दूरवर्त्तिन्यां लङ्कायां जातम् ।

Digitized by Google

दुर्मे । हा देवि । (१) इति निष्क्रान्तः ।

रामः । हा कष्टमतिबीभत्सकर्म्मा * नृशंसोऽस्मि संवृत्तः । अग्रजात् प्रभृति पोषितां प्रियां † सौहृदादपृथगाश्रयामिमाम् । स्वयमद्य परिददामि मृत्यवे, सैनिकोगृहशकुन्तिकामिव ॥ ‡ ॥

तत्किमित्यस्मन्नीचः पातकी देवीं दूषयामि । सीतायाः शिरः खैरमुन्नमय्य वाङ्मात्रमाकर्षन् ।

अपूर्व्वकर्म्मचाण्डालमयि मुग्धे ! विमुञ्च माम् ॥
श्रितासि चन्दनभ्रान्त्या दुर्व्विपाकं § विषद्रुमम् ॥

उत्थाय । हन्त विपर्य्यस्तः ¶ संप्रति जीवलोकः, अद्य पर्य्यवसितं ** जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्, असारः संसारः, कष्टप्रायं †† शरीरम् । अशरणोऽस्मि, किं करोमि, का गतिः, क्व गच्छामि, अथवा,

---

(१) हा देवि !

---

* अतिबीभत्सकर्म्मा अतिनिन्दितक्रियः । अतिभीमकर्म्मेति क्वचित्पाठः ।

† प्रियामित्यत्र प्रियैरिति पाठान्तरं, प्रियैरग्रजादिभिरित्यर्थः । एवमपृथगाश्रयामित्यत्र अपृथगाश्रयामिति, इमामित्यत्र प्रिया मिति च ।

‡ सैनिकः पशुपक्ष्यादिमांसविक्रयकर्त्ता । गृहशकुन्तिकां स्वगृहपालितपक्षिणीम् ।

§ दुर्व्विपाकं परिणामदारुणम् ।

¶ विपर्य्यस्तः वैपरीत्यं प्राप्तः ।

** पर्य्यवसितं समाप्तम् ।

†† कष्टप्रायं क्लेशबहुलम् ।

Digitized by Google

दुःखसंवेदनायैव रामे चैतन्यमर्पितम् । *
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः † ॥

हा अम्ब अरुन्धति ! हा भगवन्तौ वसिष्ठविश्वामित्रौ ! हा भगवन् पावक ! हा देवि भूतधात्रि ! हा तात जनक ! हा तात ! हा मातरः ! हा प्रियसख महाराज सुग्रीव ! हा सौम्य हनूमन् ! हा परमोपकारिन् लङ्काधिपते विभीषण ! हा सखि त्रिजटे ! दूषिताः स्थः ‡ परिभूताः स्थः, रामहतकेन । अथवा कोनामाहमेतेषामाक्रोशे § ।

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्वप्नलब्धा इव प्रभवः ॥

योऽहं ।

विश्रम्भादुरसि निपत्य लब्धनिद्रा
मुञ्चामुं प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्क ¶ स्फुरितकठोरगर्भगुर्वीं
कृत्याङ्गीवलिमिव निर्घृणः ** क्षिपामि ॥

---

* दुःखसंवेदनायैव केवलं दुःखानुभवार्थं, चैतन्यमिति अन्तर्पितं चैतन्ये काष्ठकुड्यादीनामिव दुःखानुभवेन स्यादिति भावः । अर्पितमिति विधात्रेति शेषः ।

† स्थिरैः सद्भिः वज्रकीलायितं दृढतरशङ्कुवदाचरितं । स्थिरैरित्यत्र हृदीति क्वचित्पाठः ।

‡ दूषिताइत्यत्र मुषिताइति क्वचित्पाठः वञ्चिताइत्यर्थः ।

§ कोनामाहमिति पातकित्वादनधिकारीत्यर्थः ।

¶ आतङ्कोऽत्र स्वप्नानुभूतरामपरित्यागजनितभयम् ।

** निर्घृणोनिर्दयः । दारुण इति क्वचित्पाठः ।

Digitized by Google

सीताया: पादौ शिरसि कृत्वा। देवि देवि! अयं पश्चिम * स्ते रामस्य शिरसि पादपङ्कजस्पर्शमर्हति रोदिति।

नेपथ्ये। अब्रह्मण्यमब्रह्मण्यम् †।

रामः। श्रुतवतां भोः किमेतत्।

पुनर्नेपथ्ये।

ऋषीणामुग्रतपसां यमुनातीरवासिनाम्।
लवणेनासितः क्षोम ‡ स्त्रातारं त्वामुपस्थितः॥

रामः। आः कथमद्यापि राक्षसभावः, तदावद्य दुरात्मनः कुम्भीनसीपुत्रस्य यमुन्मूलनाय शत्रुघ्नं प्रेषयामि।

कतिचित्पदानि गत्वा, पुनः प्रतिनिवृत्य। हा देवि! कथमेवंविधा § गमिष्यसि। भगवति वसुन्धरे! श्लाघां दुहितरमवेक्ष्य जानकीम्।

जनकानां रघूणाञ्च यत् कृत्यं गोचरङ्गतम्।
यां देवयजने ¶ पुण्ये पुण्यश्लोकमयीं जनः॥

इति निष्क्रान्तः।

सीता। हा सोम्म अज्जउत्त! कहिंसि। अहसोत्थाय। हद्दी हद्दी दुस्सिविणएरणअविप्पलद्धाहं अज्जउत्तं आक्कन्दामि। हद्दी हद्दी कधं एआरिणीं मं परिसुत्तं उज्झिअ अज्जउत्तो गदो, ता किं दाणीं एदं, भोदु, कुविस्सं।

---

* पश्चिमस्वरमः इतः परं पुनर्नभविष्यतीत्यर्थः।

† अब्रह्मण्यमवधीत्क्षिः। प्रस्तुते लवणेन ऋषयोऽवध्या न भवन्तीत्यर्थः।

‡ क्षोमः समूहः।

§ एवंविधा अग्रतः।

¶ देवयजने यज्ञभूमौ।

Digitized by Google

जदू तं पेक्खन्ती अत्तणोपदविम्बं। कोएत्थ परिअणो। (१)॥

प्रविश्य दुर्मुखः। देवि! कुमारलक्खणो विण्णवेदि, सज्जो रहो आरुहदु देईत्ति। (२)॥

सीता। इअमहं आरुहामि। उत्थाय परिक्रम्य। परिप्फुरदि विअ मे गब्भभारो, ता सणिअं गच्छामि। (३)॥

दुर्मु। इदो इदो देई। (४)॥

सीता। णमो णमो तवोधणाणं, णमोणमो रघुउलदेवदाणं, णमोणमो अज्जउत्तचरणकमलाणं, णमोणमो सअलगुरुअणाणं। (५)॥

इति निष्क्रान्ताः सर्वे।

इति चित्रदर्शनोनाम प्रथमोऽङ्कः। १॥

---

(१) हा सौम्य आर्यपुत्र! कुत्रासि। हाधिक् हाधिक् दुःखप्ररूढरूढकविप्रलब्धाहमार्यपुत्रमाक्रन्दामि। हाधिक हाधिक् एकाकिनीं मां परिभवमाशङ्क्य आर्यपुत्रेणागतस्तत् किमिदानीमिदं, भवतु कोपिष्यामि यदितं प्रेक्ष्यमाणा आत्मनः प्रभविष्यामि कोऽत्र परिजनः।

(२) देवि! कुमारलक्ष्मणो विज्ञापयति, सज्जोरथः, आरोहतु देवीति।

(३) इयमहमारोहामि। परिस्फुरतीव मे गर्भभारः, तत् शनैर्गच्छामः।

(४) इतइतोदेवी।

(५) नमोनमस्तपोधनानां नमोनमोरघुकुलदेवतानां नमोनम आर्यपुत्रचरणकमलानां नमोनमः सकलगुरुजनानाम्। अत्र क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति न्यायात् नमोयोगे चतुर्थीं बाधित्वा षष्ठी।

Digitized by Google

अथ

द्वितीयोऽङ्कः ।

नेपथ्ये । स्वागतं तपोधनायाः ।

प्रविश्य । अध्वगवेशा तापसी । अये वनदेवतेयं फलकुसुम-पल्लवार्घेण मामुपतिष्ठते ।

प्रविश्य । वनदेवता । अर्घं विकीर्य ।

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सङ्गिः सङ्गः कथमपि हि पुण्येन भवति । *A reward of a pious deed.*
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा, तदपि न पराधीन * मिह वः ॥

ताप । किमत्रोच्यते ।

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः, *Application to future and God.*
प्रकृत्या कल्याणी मति, रनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते । † ॥

इत्युपविशतः ।

---

* नपराधीनमिति । आत्मीयमिति मत्वा भोक्तव्यमित्यर्थः ।

† वृत्तिः क्रियासु प्रवृत्तिः प्रियप्राया जनप्रीतिकरी । वृत्तिर्विवरव्याजीवकौञ्छिक्यादिप्रवर्त्तने इति मेदिनी । वाचि वाक्प्रयोगे नियमः सावधानता अनर्थकवाक्प्रयोगवैमुख्यमित्यर्थः । कल्याणी परेषां कल्याणकरी । अनवगीतोऽनिन्दितः सुबोद्धुं इत्यर्थः । अविपर्यासितरसमप्रच्युतानुरागम् । रहस्यं गूढचरित्रम् । अनुपधि अकपटम् ।

Digitized by Google

वन । कां पुनरत्रभवतीमवगच्छामि ? ।

ताप । आत्रेय्यस्मि ।

वन । आत्रेयि ! कुतः पुनरिहागम्यते, किं प्रयोजनं वा दण्डकारण्यप्रवेशे ? ।

आत्रेयी ।

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांसउद्गीथविदो * वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां † वाल्मीकिपार्श्वादिह पर्य्येष्टामि ॥

वन । यदि तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतस ‡ मृषिं ब्रह्मपारायणाय § पासते, तत् कोऽयमचार्य्याया दीर्घप्रवासप्रयासः ।

आत्रे । तव महानध्ययनप्रत्यूहइति दीर्घप्रवासोऽङ्गीकृतः ।

वन । कीदृशः ।

आत्रे । तस्य भगवतः केनापि देवताविशेषेण सर्व्वप्रकाराद्भुतं सत्यत्यागमाचके वयसि वर्त्तमानं हारकदण्डमुपनीतं, तत् खलु न केवलमृषीणामपितु सचराचराणां भूतानामान्तराणि तत्त्वान्युपक्लेदयति ¶ ॥

---

* उद्गीथविदः सामवेदविशेषज्ञाः ।

† निगमान्तविद्यां वेदान्तविद्याम् ।

‡ प्राचेतसं वाल्मीकिम् ।

§ ब्रह्मपारायणाय वेदाध्ययनाय ।

¶ आन्तराणि तत्त्वान्यन्तःकरणानि । उपक्लेदयति प्रीणयति ।

Digitized by Google

वन । अयि * तयोर्नामसंविज्ञानमस्ति ?

आत्रे । तयैव किलदेवतया तयोः कुशलवाविति बालनी प्रभावस्याख्यातः ।

वन । कीदृशः प्रभावः ? ।

आत्रे । तयोः किल सरहस्यजृम्भकास्त्राणाजन्मसिद्धा-नीति ।

वन । अहो नु भोस्त्रिचमेतत् ।

आत्रे । तौ च भगवता वाल्मीकिना धात्रीकर्म्मवत्सलतां† परिवृत्त्य पोषितौ, परिरक्षितौ च, वृत्तचौड़कर्म्मणोश्च तयो स्त्रयीवर्म्ममितराविद्याः सावधानेन परिनिष्ठापिताः, सम-नन्तरञ्च गर्भैकादशे वर्षे चात्रेण कल्पेनोपनीय ‡ तौ त्रयी-विद्यामध्यापितौ, नत्वेताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति ।

यतः

दृष्टान्त !) वितरति गुरुः प्राज्ञे विद्यां यथैव, तथा जड़े,
नतु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
महान्) भवति च पुनर्भूयान् भेदः फलं प्रति, तद्यथा
प्रभवति शुचिर्निम्बोद्ग्राहे मणिर्न मृदां चयः § ॥

वन । अयमसावध्ययनविघ्नः ?

a pun (wd not a pebble).

---

* अधीत्यत्र अधीति क्वचित्पाठः ।

† धात्रीकर्म्मणि पालनादौ वत्सलतां प्रणयित्वम् ।

‡ गर्भैकादशे इति गर्भादेकादशे राज्ञइति मनूक्तेः । कल्पेन विधिना, उपनीय, उपनयनाख्यसंस्कारेण संस्कार्य्य ।

§ शुचिर्निर्म्मलः । विम्बोद्ग्राहे प्रतिविम्बग्रहणे । मृदां चयः शरावादिकम् ।

Prabh. : est forte en vue de ... / une pierre si elle est pure a la force d'absorber les reflets /.

Digitized by Google

आत्रे । अपरश्च ।

वन । अथापरः कः ?

आत्रे । अथ स ब्रह्मर्षिरेकदा मध्यन्दिनसमये नदीं तमसा मनुप्रपन्नः, तत्र युग्मचारिणीः क्रौञ्चयो * रेकं व्याधेन विध्यमानं ददर्श, आकस्मिकप्रत्यवभासाच्च † देवीं वाचमानुष्टुभेन ‡ च्छन्दसा परिणतामभ्युदैरयत् ।

careless

certain Lesart √ईर् in Bewegung setzen.

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः §
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ इति ।

वन । चिरमाम्नायादन्योऽयं नूतनश्छन्दसामवतारः ¶ ।

आत्रे । तेन खलु पुनः समयेन ** तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्, ऋषे ! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि, तद्ब्रूहि ††

plötzlich

---

* युग्मचारिणीर्मिथुनीभूय चरतीः क्रौञ्चयोर्वकयोः ।

† आकस्मिकप्रत्यवभासाम् अकस्मात् स्वयं प्रकाशमानाम् ।

‡ आनुष्टुभेनेति स्वार्थे टञ् ।

§ शाश्वतीर्वर्षीः, समाः संवत्सरान् व्याप्य ।

¶ आम्नायात् वेदविलसितच्छन्दसः । वस्तुतस्तु वेदेऽप्यनुष्टुप्छन्दोवद्वानि वाक्यानि दृश्यन्ते तदत्र अन्यदृत्यत्र अन्यत्रेति सप्तम्यन्त पाठः सम्यक्, आम्नायाद्वेदादन्यत्र पौरुषेयग्रन्थेषु नूतनोऽयं छन्दसामवतारइत्यन्वयः, मन्वादिसंहितास्तु तत्यस्वाङ्गिरसप्रभृतिर्निबद्धाः, यद्वा आम्नायपदेन आम्नायार्थप्रतिपादकत्वात्तासामपि ग्रहणमिति न विरोधइति ध्येयम् ।

** समयेनेति क्रियोपरमे व्याप्तर्थे तृतीया ।

†† ब्रूहि वर्णय ।

Digitized by Google

रामचरितम्, अव्याहतज्योतिरार्षं * ते चक्षुः प्रतिभातु, आद्यः कविरसीत्युक्तान्तर्हितः । अथ भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृग्गं विवर्त्तं † मितिहासं रामायणं प्रणिनाय ।

वन । हन्त तर्हि पण्डितः ‡ संसारः ।

आत्रे । तस्मादवोचं, तत्र महानध्ययनप्रत्यूहइति ।

वन । युज्यते ।

आत्रे । विश्रान्तास्मि,भद्रे ! संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वन । इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरी तीरेण ।

आत्रे । सवाष्पा । अयेतत्तपोवनम् ? अयेषा पञ्चवटी ? अपि सरिदियं गोदावरी ? अयमयं गिरिः प्रस्रवणः ? अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम् ?

वास । अस्त्येतत् सर्व्वम् ।

आत्रे । वत्से जानकि !

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम् § ।
त्वां नामशेषामपि दृश्यमानः ¶ प्रत्यक्षदृश्यामिव नः करोति ॥

---

* आर्षं ज्ञानमयम् ।

† विवर्त्तं परिणामम् । (seines geistigen Urprincips, im Gegensatz zu parināma)

‡ पण्डितइति नानेतिहासात्मकस्य रामायणस्यानुशीलना दिति भावः । मण्डित इति क्वचित्पाठः ।

§ प्रासङ्गिकीनामिति प्रथमं कथाप्रसङ्गेन स्मरणपथमवतीर्णाः ।

¶ दृश्यमानः पश्चात् प्रत्यभिज्ञाविषयः ।

Digitized by Google

वास। सभयं स्वगतं। कथं नामशेषामित्याह। प्रकाशम्। आर्य्ये! किमत्याहितं * सीतादेव्याः?।

आत्रे। न केवलमत्याहितं सापवादमपि।

वास। कथमिव।

आत्रे। कर्णे एवमेवम्।

वास। अहह! दारुणोदैवनिर्घातइति मूर्च्छति।

आत्रे। भद्रे! समाश्वसिहि समाश्वसिहि।

वास। हा प्रियसखि! हा महाभागे! ईदृशस्ते निर्भाग्यभागः। रामभद्र रामभद्र! अथवा अलं त्वया, आर्य्ये आत्रेयि! अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किंवृत्तमिति काचिदस्ति प्रवृत्तिः?। †

आत्रे। नहि नहि।

वास। हा कष्टमार्य्यारुन्धतीवशिष्टाधिष्ठिते रघुकुलगृहे, जीवन्तीषु च प्रवृद्धराज्ञीषु ‡ कथमिदं जातम्?।

आत्रे। श्वश्रूभ्यां सत्रे गुरुजनस्तदासीत्। संप्रति परिसमाप्तं तद्वादशवार्षिकं सत्रम्, श्वश्रूभ्यां च संपूज्य विसर्ज्जितामुरुवः, ततो भगवत्यरुन्धती नाहं बधूविरहितामयोध्यां गमिष्यामीत्याह, तदेव राममातृभिरनुमोदितं। तदनुरोधाद्भगवतोवशिष्टस्य परिशुद्धावाचो, यथा वाल्मीकितपोवनं गत्वा तत्र वत्स्याम इति।

---

* अत्याहितममङ्गलम्।

† प्रवृत्तिर्वार्त्ता।

‡ प्रवृद्धराज्ञीष्वित्यत्र अनित्यत्वात् समासान्ताभावः।

Digitized by Google

वास। अथ सराजा किमारम्भः संप्रति ?

आत्रे। तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः।

वास। अहह ! धिक् परिणीतमपि *।

आत्रे। भ्रान्तं पापम्।

वास। का तर्हि यज्ञे सहधर्मचारिणी ?

आत्रे। हिरण्मयी सीताप्रतिकृतिः।

वास। हन्त भोः।

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि कोहि विज्ञातुमर्हति॥

आत्रे। विसृष्टश्च वामदेवानुमन्त्रितो मेध्योऽश्वः, उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः, तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुर्दत्तदिव्यास्त्रसंप्रदायश्चतुरङ्गसाधनान्वितो † ऽनुप्रहितः।

वास। सखेहकौतुकाक्रान्तं। कुमारलक्ष्मणस्यापि पुत्रः, हन्त मातर्जीवामि ‡।

आत्रे। अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे, घोरस्वाङ्गनमत्रह्मण्यमुद्घोषितं ततोन राजापराधमन्तरेण प्रजास्वकालमृत्युस्मरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे, सहसैवाशरीरिणी वागुदचरत्।

---

* अहहेत्यादि अश्वमेधयज्ञे सपत्नीकस्यैवाधिकारादिति भावः, परिणीतमिति भावे क्तः।

† चतुरङ्गसाधनानि हस्त्यश्ररथपादातरूपसैन्यानि। हस्त्यश्ररथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः।

‡ हन्तेतिहर्षे, जीवामीति प्रशस्तजीवनवती भवामीत्यर्थः।

Digitized by Google

शम्बूकोनाम वृषलः पृथिव्यां तप्यते तपः ।
ग्रीर्षच्छेद्यः * स ते राम तं हत्वा जीवय द्विजम् ॥

इत्युपश्रुत्यैव कृपाणपाणिः पुष्पकं विमानमारुह्य सर्व्वा दिशोविदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः सञ्चरितुमारब्धवान् ।

वास । शम्बूकोनाम धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपस्यति, तदपि नाम † रामभद्रः पुनरपीदं वनमलंकुर्य्यात् ।

आत्रे । भद्रे गम्यतेऽधुना ।

वास । एवमस्तु, कठोरीभूतोऽयं दिवसः ।

तथाहि

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि
र्घर्म्मस्रंसितबन्धनैः स्वकुसुमैरर्च्चन्ति गोदावरीम् ।
क्षायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्रान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ‡

इति परिक्रम्य निष्क्रान्ते ।

विष्कम्भकः ।

---

* ग्रीर्षं मस्तकावच्छेदे छेद्यः, ग्रीर्षं छेद्यं यस्येति वा ।

† अपिनामेति सम्भावनायाम् ।

‡ क्षायेत्यादि क्षायायामपस्किरमाणाभक्षणार्थं हर्षेण विलिखन्तो ये विष्किराः पक्षिणस्तेषां मुखैर्व्याकृष्टावच्छिन्नसारिताः कीटायाभ्यस्ताट्यस्त्वचोवल्कलानि येषां ते, अपात् किरत्यतुष्यात् पक्षिहर्षादौ सुट्च क्षय्यपीत्यामनेपदं सुट्च, नगौको वाजिविकिरविविष्किरपतत्रय इत्यमरः । तथा कूजन्ति क्रान्तानां कपोतानां कुक्कुटानाञ्च कुलानि यत्र ते । कुलायद्रुमाः पक्षिणामावासवृक्षाः ।

Digitized by Google

ततः प्रविशति सदयोद्यतखड्गोरामभद्रः ।

रामः । रे हस्त दक्षिण ! मृतस्य शिशोर्द्विजस्य
जीवातवे * विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि दुर्वहगर्भखिन्न-
सीताविवासनपटोः, करुणा कुतस्ते ॥

अथ कथञ्चित् प्रकृत्य । कृतं रामसदृशं कर्म, अपि जीवेत् स ब्राह्मणशिशुः ? ।

प्रविश्य दिव्यपुरुषः । जयति जयति देवः ।
दत्ताभये त्वयि यमादपि दण्डधारे †
सञ्जीवितः शिशुरयं, मम चेयमृद्धिः ‡ ।
अम्बूकएष शिरसा चरणौ नतस्ते,
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥

रामः । इदमपि प्रियं नः, तदनुभूयतामुग्रस्य तपसः परिपाकः ।

यत्रानन्दास्च, मोदास्च, यत्र पुण्यास्च संपदः ।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवाः ॥ §

---

* जीवातवे जीविताय । जीवातुरस्त्रियां भक्ष्ये जीविते जीवनौषधे इति मेदिनी ।

† यमादपि दत्ताभये त्वयि दण्डधारे मयि दण्डं कुर्वति सति ।

‡ ऋद्धिर्दिव्यशरीरप्राप्तिरूपा ॥

§ आनन्दास्च मोदास्चेति आनन्दनामकामोदनामकास्च तत्रत्यसुखविशेषाइत्यर्थः । पुण्याभिसम्भवाइति पाठस्तु द्वितीय यत्रेत्यस्यानन्वितत्वान्न सम्यक् । तैजसास्तेजोमयाः नतु पार्थिवादयः ध्रुवानित्याः, शिवा इति क्वचित् पाठः ।

Digitized by Google

अम्बू । युष्मत्पादप्रसादोपायएवमहिमा, किमत्र तपसा। अथवा । महदुपजृतं तपसा ।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विच्छन्निह वृषलकं योऽजवानां व्रतानि ।
क्रान्त्वा प्राप्तः स दृढ तपसां संप्रसादो,ऽन्यथा चेत्
कालोधाचाः पुनरुपगमोदण्डकाथां वने वः ॥

रामः । किं नाम दण्डकेयं ? । सर्व्वतोऽवलोक्य । आं,

स्निग्धश्यामाः क्वचिदपरतोभीषणाभोगरूक्षाः, *
स्थाने स्थाने मुखरककुभो † झाङ्कृतैर्निर्झराणाम् ।
एते तीर्थाश्रममिरिसरिद्दुर्गकान्तार ‡ मिश्राः
संदृश्यन्ते परिचितभुवोदण्डकारण्यभागाः ॥

अम्बू । दण्डकेयमेव,अत्र किल निवसता देवेन,

चतुर्दश सहस्राणि रक्षसां भीमकर्म्मणाम् ।
क्षयश्च दूषणखरत्रिमूर्द्धानोरणे हताः ॥

येन सिद्धक्षेत्रेऽस्मिन् जनस्थाने सादृश्यमपि भीरुजानपदानामकृतोभयः § सञ्चारोजातः ।

रामः । न केवलं दण्डकेयं, जनस्थानमपि ।

अम्बू । वाढमेतानि खलु सर्व्वभूतलोमहर्षणान्युच्यन्ते

---

* अपरतोऽन्यत्र भीषणेन आभोगेन विस्तारेण रूक्षा दुर्दर्शाः ।

† मुखरककुभः सशब्ददिग्भः ।

‡ कान्तारो दुर्गमवर्त्म महारण्यं वा ।

§ येन राक्षसहननेन । भीरवोजानपदा जनपदवासिनस्तेषां । नास्ति कुतः कस्मादपि भयं यत्र सः ।

Digitized by Google

चण्डश्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्य्यन्तानि * दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते

तथाहि।

निष्क्रूजल्लिखिताः क्वचित्, क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तमभीरभोगभुजगश्वासप्रदीप्ताग्नयः।
सीमानः प्रदरोदरेषु विलसत्खल्पाम्भसो, यासु तं
दृष्ट्वद्भिः प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते॥ †

रामः। पश्यामि च जनस्थानं भूतपूर्व्वखरालयम्।
प्रत्यक्षानिव वृत्तान्तान् पूर्व्वाननुभवामि च॥
सर्व्वतोऽवलोक्य। सर्व्वथा प्रियारामाहि ‡ वैदेह्यासीत्, एतानि तानि § नाम कान्तारादि किमितः परं भयानकं ¶ स्यात्। सास्रम्।

---

* जनस्थानं पर्य्यन्तः प्रान्तसीमा येषां तानि।

† क्वचिन्निष्क्रूजल्लिखिताः निःशब्दतया गम्भीराः। तथा क्वचिदपि प्रोच्चण्डाविकटाः सत्त्वानां जन्तूनां स्वनाः शब्दायत्र ताः। स्वेच्छया सुप्तास्तथा गभीरोन्निद्रोभोगः शरीरं येषां तादृशा ये भुजगास्तेषां श्वासैः श्वासेषु वा प्रदीप्ता अग्नयोयत्र ताः। तथा प्रदरोदरेषु भूविदारमध्येषु विलसत् खल्पमम्भोयासु ताः। यासु सीमसु। दृष्ट्वद्भिः पिबद्भिः प्रतिसूर्य्यकैः शङ्खशुक्तैः। स्याद्दरः शङ्खशुक्तयात् शङ्खशुक्तृस्त्वाञ्जनः। प्रतिसूर्य्य इति त्रिकाण्डशेषः।

‡ प्रियारामा प्रियवनवासा। [आरामशब्दोवनमात्रपरः

§ तानि प्रियया सहितेन मया पूर्व्वमध्युषितानि।

¶ किमितः परं भयानकमिति प्रियायाः स्मारणेन वियोगदुःखोद्दीपनादितिभावः।

Digitized by Google

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इति हा रमते सीता * खेदस्तस्याः स तादृशः ॥ †
अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति ‡ ।
तत्तस्य किमपि § द्रव्यं योहि यस्य प्रियोजनः ॥

अम्बू । तदलमेभिर्दूरादेवैः । अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तै, रविरलनिविष्टनीलबहलच्छायतरुणतरुषण्डमण्डितान्यसम्भ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगभीराणि मध्यमारण्यकानि ।

दूरं समदशकुन्ताक्रान्तवानीरवीरुत्
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥

अपिच ।

---

* इति अभिप्रेत्य हा खेदे सीता रमते अरमतेत्यर्थः । अत्र इति चारमतीवासाविति इत्यारमयतीवासावित्यादीनि पाठान्तराणि दृश्यन्ते ।

† तादृशः मत्सान्निध्यसुखप्रयोजकः स पूर्व्वानुभूतः स्नेहो मय्यासीदिति शेषः, यत्तुतत्तु स इत्यत्र क्व इति पाठः सम्यक् ।

‡ अकिञ्चिदपि कुर्व्वाणः किञ्चित् प्रीतिकरं कर्म्माकुर्व्वन्नपि कवीनां निरङ्कुशत्वादत्र गमकतामाप्नुयेत्या । सौख्यैः स्वसान्निध्यमात्रेण सुखधाराजननैः दुःखान्यपोहति निवारयति प्रियजनइति शेषः ।

§ किमपि लोकोत्तरम् ।

Digitized by Google

दधति कुहरभाजामत्र भल्लूकयूना
मनुरसितगुरूणि स्थानमम्बूकृतानि । *
शिशिरकटुकषायः स्थायते † भल्लकीना
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥

रामः । सवाष्पस्तम्भं । शिवास्ते पन्थानो, देवयानं प्रति-पद्यस्व पुण्येभ्योलोकेभ्यः ।

शम्बू । यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । इति निष्क्रान्तः ।

रामः । एतत्तदेव हि वनं पुनरद्य दृष्टं,
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ ‡

अपिच ।

एते तएव गिरयोविरुवन्मयूरा
स्तान्येव मत्तहरिणानि वनस्थलानि ।

---

* भल्लूकयूनां तरुणभल्लूकानाम्, अनुरसितगुरूणि अनुध्वनिना गभीराणि, अम्बूकृतानि सनिष्ठीवनमुखारावाः, स्थानं स्फीतिं दधति धारयन्ति ।

† शिशिरः शीतलः, कटुरुग्रः, कषायः सुरभिश्च । स्थायते स्फीतिं गच्छति सर्व्वत्र प्रसरतीत्यर्थः ।

‡ यस्मिन् पुरा चिरमेव वसन्तोवयं स्वधर्मे क्षत्रियोचितनित्य नैमित्तिकादिकर्म्मानुष्ठाने रताः सन्त आरण्यकाः अरण्यवासिमुनयः, तथा सांसारिकेषु सुखेषु विषयोपभोगसुखेषु रसज्ञाः सन्तः गृहिणश्च अभूमेत्यन्वयः ।

Digitized by Google

आमञ्जुवञ्जुलतानिच * तान्यमूनि
नीरन्ध्रनीलनिचुलानि † सरित्तटानि ॥
मेघमालेव यस्यायमारादपि ‡ विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥
यत्रैवासीन्महति शिखरे गृध्रराजस्य वास
स्तस्याधस्तादयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विगतश्यामलानोकहश्री
रन्तःकूजत्कुररशकुनोयत्र रम्योवनान्तः ॥

आ, तदेव सा पञ्चवटी, यत्रातिचिरनिवासेन विविधविश्रम्भातिप्रसङ्गसाक्षिणः § प्रदेशाः, प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता प्रतिवसति, तत् किमिह मापतितमद्य रामस्य, । संप्रति हि ॥

चिरोद्वेगारम्भी प्रसृतइव तीव्रोविषरसः
कुतश्चित् संवेगान्निहितइव शल्यस्य शकलः । ¶

---

* आमञ्जुवञ्जुलतानीत्यत्र आमत्तमञ्जुलतानीति क्वचित्पाठः ।

† नीरन्ध्रा अविरला नीलाः श्यामलाश्च निचुला इञ्जसदृक्षा यत्र तानि, नीलेत्यत्र नीपेति क्वचित्पाठः ।

‡ यस्यायमारादपीत्यत्र यच्छाया दूरादेवेति पाठान्तरम् ।

§ विविधोयोविश्रम्भातिप्रसङ्गो निःशङ्कविहारोत्कर्षस्तस्य साक्षिणः सूचकाः ।

¶ संवेगात् सम्भ्रमेण क्रियमाणव्यापारात् निहितोऽङ्गेषु प्रविष्टः, कर्त्तरि क्तः । यद्वा संवेगात् क्रियमाणेन व्यापारविशेषेणार्पितः । निहित इत्यत्र प्रवल इति पाठस्तु न मनोरमः ।

Digitized by Google

अहोरूढग्रन्थिः स्फुटितइव हन्मर्मणि * पुन
र्घनीभूतः शोकोविकलयति संमूर्च्छयति च † ॥

तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि, । निरूप्य अहो अनवस्थितेा ‡ भूमिषन्निवेशः । तथाहि ।

पुरा यत्र स्रोतः पुलिनमधुना तच्च सरितां
विपर्य्यासं यातोघनविरलभावः § क्षितिरुहाम् ।
वहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति ¶ बुद्धिं दृढयति ॥

हन्त परिहरन्नपि मामितः पञ्चवटीस्नेहो बलादपकर्षतीव । सकरुणम् ।

यस्यान्के दिवसास्तया सह मया नीतायथा खे गृहे
यस्मिन्निकथाभिरेव सततं दीर्घाभिराक्षीयते ।
एकः संप्रति नाश्रितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसभाव्य ** वा ॥

प्रविश्य । ग्राम्यकः । जयति देवः । देव, भगवानगस्त्यो मत्तः श्रुतसन्निधानस्त्वामाह, परिकल्पितविमानावतरण

---

* हृन्मर्मणि हृदयरूपमर्म्मस्थाने रूढग्रन्थिः सञ्जातबन्धः ।

† संमूर्च्छयति चेत्यत्र, मां नूतन इवेति क्वचित्पाठः ।

‡ अनवस्थितेोऽस्थिरः ।

§ विपर्य्यासमिति घनभावेोविरलभावं यातः, विरलभावो घनभावं यात इत्यर्थः ।

¶ तदिदमितीति शैलानां प्रायेण तादृश्यात्तथाभिधारादिति भावः ।

** असभाव्य सत्यमवस्थानादिना असम्भाव्य ।

Digitized by Google

मङ्गला * प्रतीक्षते वत्सला लोपामुद्रा, सर्व्वेच महर्षयः, स्वदेहि सम्भावयास्मान्, अथ प्रजविना पुष्पकेण स्वदेशमुपसंगम्य स्वमेधाय सज्जोभविष्यसीति ।

रामः । यथाज्ञापयति भगवान् ।

अम्बू । ततस्तर्हि देवः प्रवर्त्तयतु पुष्पकम् ।

रामः । भगवति पञ्चवटि! गुरुजनोपरोधात् क्षणं क्षम्यतामतिक्रमोरामस्य ।

अम्बू । देव पश्य पश्य ।

कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः ॥ †

---

* विमानतोऽवतरणे यन्मङ्गलं मङ्गलाचरणवस्तु दूर्व्वागुरुप्रभृतिकं तत्परिकल्पितं यया सा ।

† कूजदित्यादि, कूजन्ती या कुञ्जरूपकुटीरवर्त्तिनी कौशिक घटा पेचकसमूहस्तस्य घुत्कारः घुद्घुदित्यव्यक्तशब्दस्तद्वान् यः कीचकस्तम्बाडम्बरः सखनवंशगुच्छविस्तारस्तत्र मूकं कौशिकभयेन निःशब्दं मौकुलिकुलं काकसमूहोयत्र सः । एक दृग्वलिभुग्ध्वाङ्क्षोमौकुलिर्वायसोऽन्यभृदिति हेमचन्द्रः । मौकुलीत्यत्र मौकवीति पाठस्तु न सम्यक् । प्रचलाकिनां मयूराणां । प्रचलाकी सितापाङ्गशिखावलगलव्रताहति त्रिकाण्डशेषः । उद्वेल्लन्ति ऊर्द्धं गच्छन्ति । चन्दनेत्यत्र रोहिणीति क्वचित्पाठः । कुम्भीनसाः क्रूरसर्पाः । कुम्भीनसः क्रूरसर्पे स्त्रियां सवयमातरीति मेदिनी ।

Digitized by Google

अपिच ।

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षौणीभृतोदक्षिणाः ।
अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै
रुत्ताला ददृमे गभीरपथसः पुण्याः सरित्सङ्गमाः ॥

इति निष्क्रान्ताः सर्व्वे ।

इति पञ्चवटीप्रवेशो नाम
द्वितीयोऽङ्कः ।

Digitized by Google

अथ तृतीयोऽङ्कः ।

॥ ततः प्रविशति बहीदृश्यं तमसा मुरला च ॥

तमसा । सखि मुरले ! किमसि सम्भ्रान्तेव ?

मुरला । भगवति तमसे ! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं, जानासेव यथा बधूत्यागात् प्रभृति,

अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणोरसः ॥ *

तेन च तथाविधेष्टजनकष्टपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तानेन † संप्रत्यतितरां परिक्षीणोरामभद्रः, तमव-

---

* गभीरत्वादप्रतर्क्यागाधत्वादनिर्भिन्नः अप्रकाशितः । अनिर्भिन्नगभीरत्वादित्येकपदमेतु न सम्यक् । अतएवान्तर्मध्ये गूढा प्रच्छन्ना घना निविडा व्यथा यत्र सः । अतएव पुटे आवरणेन नीरन्ध्रपात्रे यः पाकस्तत्प्रतीकाशस्तत्सदृशः, करुणः करुणविप्रलम्भः नतु करुणाख्यः, वीरशृङ्गार्यन्यतरस्यैव नायकस्य नाटकप्रकृतित्वात् प्रबन्धस्यास्य च नाटकत्वात्। रसोऽत्र विप्रलम्भरत्याख्यः स्थायिभावः ।

† तथाविधः प्राणप्रतिमोयः इष्टजनः सीताख्यस्तस्मिन् यः कष्टपातोनिर्जनारण्यप्रवेशादिस्तस्माज्जन्म उद्भोनिर्यस्य तेन, प्रकर्षगतेन परां काष्ठामधिरूढेन, तथा दीर्घः शोकसन्तानः शोकाख्यव्यभिचारिभावधारा यत्र तेन, दीर्घशोकसन्तापेनेति क्वचित् पाठः । इष्टशोकेन तेन करुणविप्रलम्भेन ॥

Digitized by Google

लो। क्व कम्पितमिव मे हृदयम्, अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने बधूसहनिवासविश्रम्भसाक्षिणः * प्रदेशाद्रष्टव्याः, तेषु च निसर्गधीरस्यापेवंविधावस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य, † तद्भगवति गोदावरि! तव त्वया सावधानया भवितव्यम्,

कीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं खेदं खेदं प्रेक्षितैस्तर्पयेति॥

तम। उचितमेव दाक्षिण्यं स्नेहस्य, ‡ सञ्जीवनोपायस्तु मौलिक § एव रामभद्रस्याद्य सन्निहितः।

मुर। कथमिव?

तम। श्रूयताम्। पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य गते लक्ष्मणे, सीतादेवी प्राप्तप्रसववेदनात्मानमतिदुःखसंवेगाद्गङ्गाप्रवाहे निक्षिप्तवती, तदैव तत्र दारकद्वयं

---

* बधा सह निवासेन योविश्रम्भः प्रणयः, सहनिवासेन बधां यः प्रणयोवा तस्य साक्षिणः स्मारकाः। विश्रम्भः केलिकलहोवा। विश्रम्भः केलिकलहे विस्रसे प्रणयेऽपिचेति मेदिनी।

† तेषु च प्रदेशेषु अतिगम्भीरः कथमप्यप्रतिकार्य्य आभोगः संपूर्णता यस्य तादृशोयः शोकस्तेन यः क्षोभस्तस्य संवेगउद्रेकस्तस्मात्, प्रमादोऽसावधानता मनसोदौर्ब्बल्यं वा तस्य स्थानानि उत्पत्तिभूमयः शङ्कनीयानि रामस्य मोहजनकत्वेन चिन्तनीयानि। तेषु चेत्यत्र तानि चेति क्वचित्पाठः तद्भूयांसि प्रमादस्थानानीत्यर्थः।

‡ स्नेहस्य दाक्षिण्यं स्नेहेन प्रियजनं प्रत्यानुकूल्यम्।

§ मौलिकः प्रथमं निरूपितः।

Digitized by Google

प्रसूता * भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना † रसातलञ्च नीता, स्वन्यत्यागात् परेणच तद्दारकदृश्यं तस्याः, प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती ।

सुर । सविस्मयम्,

ईदृग्जानां विपाकोऽपि जायते परमाद्भुतः ।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥ ‡

तम । इदानीन्तु अम्बुकदृत्तान्तेनानेन सम्भावितजनस्थानगमनं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी, यदेव लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्क्य सीतासमेता । केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता ।

सुर । सुविचिन्तितं भगवत्या, राजधानीस्थितस्य खलु तैस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्यापृतस्य नियतास्त्रिचित्तविक्षेपाः, अत्यद्भुतस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशोमहाननर्थ इति, तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात् ।

तम । उक्तमेव भगवत्या भागीरथीदेव्या, वत्से देवयजनसम्भवे सीते, अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशजन्मसंवत्सरस्य संख्यामङ्कलक्षयन्ति ¶ रभिवर्त्तते, तदात्मनः पुराणश्रुरमेता-

---

* प्रसूतेति कर्त्तरि क्तः गुणीभूतगत्यर्थकत्वात् सूङ्धातोः ।

† अभ्युपपन्ना कृतानुकूल्या सुरक्षितेत्यर्थः ।

‡ उपकरणीभावमानुकूल्यम् । एवंविधोजनः गङ्गादेवी प्रभृतिरतिमहान् जनः ।

¶ संख्यामङ्कलक्षयन्तिरिति वर्षसमसंख्यकग्रन्थिमद्गुणुलुनिम्बश्वेतसर्षपदूर्व्वागोरोचनाख्यमङ्कलक्षवस्तुसहितसूत्रधारणविधिरित्यर्थः ।

Digitized by Google

वतोमानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व, न च त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावादनदेवताश्रपि द्रक्ष्यन्ति, किं पुनर्मर्त्या इति, अरुन्धती चापिता, तमसे ! त्वयि प्रकृष्टप्रेमैव बधूर्वत्सा जानकीति, अतस्त्वमेवास्याः प्रत्यन्तरीभवेति, * साहमधुना यथादिष्टमनुतिष्ठामि ।

सुर । अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि, रामभद्रोऽप्यागतएवेति तर्कयामि ।

तम । तदियं गोदावरीह्रदान्निष्क्रम्य ।

परिपाण्डुदुर्ब्बलकपोलसुन्दरं
दधती विलोलकवरीकमाननम् ।
करुणस्य † मूर्त्ति, रथवा शरीरिणी
विरहव्यथैव वनमेति जानकी ॥

सुर । इयं हि सा ।

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं ‡
हृदयकुसुमशोषी § दारुणो दीर्घशोकः ।
क्लपयति परिपाण्डु श्याममस्याः शरीरं
शरदिजदव घर्म्मः केतकीगर्भपत्रम् ॥

इति परिक्रम्य निष्क्रान्ते । विष्कम्भकः ।

---

* प्रत्यन्तरीभव सन्निहिता भव ।

† करुणस्य करुणविप्रलम्भस्य ।

‡ बन्धनाद्विप्रलूनं वृन्ताच्छिन्नम् ।

§ शोषीत्यत्र शोथीति पाठस्तु न सम्यक् ।

Digitized by Google

ततः प्रविशति पुष्पावचयव्यग्रहस्ता सकरुणोत्सुक्यमाकर्ण-यन्ती सीता ।

सीता । अज्जे, जाणामि पिअसही मे वासन्ती वाहरदि (१) ।

नेपथ्ये ।

सीतादेव्याः स्वकरकलितैः शङ्कपीपल्लवाग्रै
रग्रे लोलः करिकरभकोयः पुरा पोषितोऽभूत् ।

सीता । किं तस्स । (२)

पुनर्नेपथ्ये ।

बध्वा सार्द्धं पयसि विहरन् सोऽयमन्येन वेगा
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः * ॥

सीता । ससम्भ्रमं कतिचित्पदानि गत्वा । अज्जउत्त ! परित्ताहि परित्ताहि मम तं पुत्तअं । विचिन्त्य । हद्धी हद्धी तादृं ज्जेव चिरपरिचिदाइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणीं अणुबन्धन्ति, हा अज्जउत्त ! इति मूर्च्छति । (३)

---

(१) अहो, जानामि प्रियसखी मे वासन्ती व्याहरति ।

(२) किं तस्य ।

(३) आर्यपुत्र ! परित्रायस्व परित्रायस्व मम तं पुत्रकम् । हा धिक् हा धिक् तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति, हा आर्यपुत्र ! । अनुबध्नन्ति प्राप्नुवन्ति ।

---

* अभियुक्तः परिभवायाक्रान्तः ।

Digitized by Google

प्रविश्य तमसा। वत्से समाश्वसिहि समाश्वसिहि।

नेपथ्ये। विमानराज अत्रैव स्थीयताम्।

सीता। समाश्वस्य समाध्मातोत्कण्ठोल्लासं। अच्छरिए जलभरिदमेहत्थणिदगम्भीरमंसला कुदोणु एसा भारदी? णिग्घोसभरन्तकण्णविवरं मंपि मन्दभाइणीं उत्ताविदि। (१)

तम। सस्मिताश्रु। अयि वत्से!

किमयमेकोऽपि जिनदे कुतस्ये *ऽपि ममीदृशी।
स्तनयित्नो † र्मयूरीव चकितोत्कण्ठिता स्थिता॥

सीता। भअवदि! किं भणासि अपरिप्फुडत्ति, मए उण सरसंजोएण पच्चभिआणिदं, अज्जउत्तोव्वेव वाहरदि। (२)

तम। श्रूयते, तपस्यतः किल गूढस्य दण्डधारणार्थमेष्वाकोराजा जनस्थानमागतइति।

सीता। दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ। (३)

नेपथ्ये।

यत्र द्रुमाश्रमि मृगाश्रमि बन्धवोमे
यानि प्रियासहचरस्थिरमध्यवात्सम्।

---

(१) अहो, जलभृतमेघस्तनितगम्भीरमांसला कुतोनु एषा भारती, निर्घोषभ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युच्छ्वासयति।

(२) भगवति! किं भणसि अपरिस्फुटेति। मया पुनः स्वरसं योगेन प्रत्यभिज्ञातम्, आर्यपुत्रएव व्याहरति।

(३) दिष्ट्या अपरिहीनराजधर्मः खलु स राजा।

---

* कुतस्ये कुतोभवे अनिश्चितोपादाने इत्यर्थः।

† स्तनयित्नोर्मेघस्य।

Digitized by Google

एतानि तानि वञ्जुलनिर्झरकन्दराणि
गोदावरीपरिसरस्य ‡ गिरेस्तटानि ॥

सीता । दृष्ट्वा । हा कधं पभादचन्दमण्डलावण्डरपरिक्खामदुव्वलेण आआरेण, अअं सोम्मगम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तोव्वेव, ता मं धारेहि । (१)

इति तमसामाश्लिष्य मूर्च्छति ।

तम । धारयन्ती । वत्से ! समाश्वसिहि समाश्वसिहि ।

नेपथ्ये ।

अनेन पञ्चवटीदर्शनेन ।

अस्मदीनस्य दुःखाग्नेरधोहामं ज्वलिष्यतः ।
उत्पीड़ * इव धूमस्य मोहः प्रागावृणोति माम् ॥

हा प्रिये जानकि !

तम । खगतम । इदं तदाग्रङ्कितं गुरुजनेनापि ।

सीता । समाश्वस्य । हा कधं एदं । (२)

पुनर्नेपथ्ये । हा देवि दण्डकारण्यवासप्रियसखि विदेहराजपुत्रि ! इति मूर्च्छति ।

सीता । हद्धी हद्धी मं मन्दभाइणीं उद्दिस्स अज्जउत्तो

---

(१) हा कथं प्रभातचन्द्रमण्डलापाण्डरपरिक्षामदुर्बलेनाकारेण अयं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञातआर्यपुत्र एव तन्मां धारय । आकारेणेत्युपलक्षणे तृतीया ।

(२) हा कथमिदम् ।

---

‡ गोदावरी परिसरे यस्य सतथा तस्य ।

* उत्पीडः समूहः ।

Digitized by Google

णेत्तणीलुप्पलो मुच्छिदोम्हि, हा हा कधं धरणीवट्टे णिरुत्साहणीसहं विपल्लत्थो, भअवदि तमसे ! परित्ताअहि परित्ताअहि जीवावेहि अज्जउत्तं । (१) इति पादयोः पतति ।

तम । त्वमेव ननु कल्याणि ! सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शोहि पाणिस्ते यत्रैष निरतोजनः * ॥

सीता । जं भोदु तं भोदु, जधा भअवदी भणादि । (२)

ससम्भ्रमं निष्क्रान्ता ।

ततः प्रविशति भूमौ निपतितः साश्रुया सीतया स्पृश्यमानः साङ्गदोच्छ्वासोरामभद्रः ।

सीता । किञ्चित्सहर्षं स्वगतम् । जाणे पुणोवि पच्चागदं विअ जीविदं तेलोक्कणाहस्स । (३)

रामः । हन्त भोः किमेतत् ।

---

(१) हा धिक् हा धिक् मां मन्दभागिनीमुद्दिश्य आर्यपुत्रेणानीतोत्पलोमूर्च्छितएव, हाहा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्य्यस्तः, भगवति तमसे परित्रायस्व परित्रायस्व जीवयार्य्यपुत्रम् । निरुत्साहनिःसहम् उत्साहाभावेन दुर्व्वलं यथा तथा। विपर्य्यस्तः पतितः ।

(२) यद्भवतु तद्भवतु, यथा भगवती भणति । तथा करवाणीति शेषः ।

(३) जाने पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य ।

---

* एष रामरूपोजनः यत्र तव प्रियस्पर्शपात्रौ निरतः एकान्तसङ्गतः आसीदिति शेषः ।

Digitized by Google

प्रद्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजोनु सेकः। *
आतप्तजीवितमनःपरितर्पणोमे
सञ्जीवनौषधिरसौ नु हृदि प्रसिक्तः॥
स्पर्शैः पुरा परिचितोनियतं स एष
सञ्जीवनस्य मनसः परिमोहनस्य।
सन्तापजां सपदि यः प्रतिहत्य मूर्च्छा
मानन्दनेन जडतां पुनरातनोति॥

सीता। सणाध्वसोत्कम्पमपसृत्य। एत्तिकं ज्जेव मे दाणिं वज्जदरं। (१)

रामः। उपविश्य। न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि?।

सीता। हद्धी हद्धी किंत्ति मं अज्जउत्तो मग्गिस्सदि। (२)

रामः। भवतु, पश्यामि।

सीता। भअवदि तमसे! ओसरक्ख, जइ दाव मं पेक्खिस्सदि, तदो अणब्भणुण्णादसण्णिधाणेण अहिअं पि मम महाराओ कुप्पिस्सदि। (३)

---

(१) एतावदेव मे इदानीं वज्रतरम्।

(२) हा धिक् हा धिक् किमिति मामार्यपुत्रोमार्गिष्यति।

(३) भगवति तमसे अपसरामः, यदि तावन्मां प्रेक्षिष्यते, तदा अनभ्यनुज्ञातसन्निधानेन अधिकमपि मम महाराजः कोपिष्यति।

---

* हरिचन्दनो देवतरुविशेषः तस्य पल्लवानां प्रद्योतनममृतस्रावम्। निष्पीडितोय इन्दुकरकन्दलः चन्द्रकिरणसमूहखण्डः तन्निःसृतनिर्यासकल्पः।

Digitized by Google

तम । अयि वत्से ! भागीरथीप्रसादादनदेवतानामपथदृश्या संवृत्तासि ।

सीता । आं अत्थि एदं । (१)

रामः । हा प्रिये जानकि ! ननु प्रिये जानकि !

सीता । समन्युगद्गदम् । अज्जउत्त ! असरिसं खु एदं वअणं दूसस्स वुत्तन्तस्स । साम्प्रम् । अहवा किंत्ति वज्जमईं जम्मन्तरेसु वि पुणो असम्भाविददुल्लहदंसणं मंज्जेव मन्दभाइणीं उद्दिसिअ वच्छलस्स एवं वादिणो अज्जउत्तस्स उअरि णिरणुक्कोसा भविस्सं, अहं एदस्स हिअअं जाणामि मम वि एसोत्ति । (२)

रामः । सर्व्वतोविलोक्य सनिर्व्वेदं । हा न काचिदत्र ।

सीता । भअवदि तमसे ! णिक्कारणपरिच्चाइणोवि एदस्स एदिणा एवंविधेण दंसणेण कीदिसोमे हिअआणुबन्धोत्ति ण आणामि ण आणामि । (३)

---

(१) आं, अस्तीदम् ।

(२) आर्य्यपुत्र ! असदृशं खल्वेतदचनमस्य वृत्तान्तस्य । अथवा किमिति वज्रमयीं जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनां मामेव मन्दभागिनीमुद्दिश्य वत्सलस्यैवंवादिनआर्य्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि, अहमेतस्य हृदयं जानामि ममाप्येवमिति । अस्य वृत्तान्तस्य निष्कारणपरित्यागरूपस्य असदृशमयोग्यम् वज्रमयीमित्यत्र वज्रमईव इति प्रथमान्तपाठः सम्यक् । जन्मान्तरेष्वपि पुनरसम्भावितं दुर्लभदर्शनं त्वदीयदुष्प्रापदर्शनं यथेति विग्रहः । वत्सलस्य स्नेहवतः । निरनुक्रोशा निर्दया ।

(३) भगवति तमसे ! निष्कारणपरित्यागिनोऽप्येतस्यैतेनैवंविधेन दर्शनेन कीदृशोमे हृदयानुबन्धइति न जानामि न जानामि । एवंविधेन महिरहजनित वैकल्यविषयेण । हृदयानुबन्धः हृदयस्यावस्था । न जानामि न निर्द्धार्य्य वक्तुं शक्नोमि ।

Digitized by Google

नम । जानामि वत्से ! जानामि ।

नटस्थं नैराश्यादपिच कलुषं विप्रियवशा
द्वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भितमिव ।
प्रसन्नं सौजन्यादपितु करुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षणइव ॥ *

रामः । देवि !

प्रसादइव मूर्त्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति मां त्वं पुनः किमसि नन्दिनि ॥ †

सीता । एदे दे अगाधदंसिदसिणेहसंभारा आणन्दणिस्सन्दिणो सुदा मए अज्जउत्तस्स उल्लावा, आणं पच्चएण णिक्कारणपरिच्चाअसिलिट्ठोवि वङ्कमदो मे जम्मलाहो । (१)

(१) एते ते अगाधदर्शितस्नेहसम्भारा आनन्दनिष्यन्दिनः श्रुता मया आर्यपुत्रस्योल्लापाः, येषां प्रत्ययेन निष्कारणपरित्यागश्लिष्टोऽपि वज्रमतेर्मे जन्मलाभः । अगाधमत्यधिकं यथा तथा दर्शितः स्नेहसम्भारः स्नेहातिशयो यत्र ते । उल्लापा उक्तिविन्यासाः । प्रत्ययेन साक्षात्प्रवणेन । निष्कारणपरित्यागश्लिष्टः निष्कारणपरित्यागरूपकलङ्कचिह्नितः । श्लिष्ट इत्यत्र श्लिष्टइति क्वचित्पाठः । सम्श्लेषीकृतइत्यर्थः ।

* नैराश्यात् पुनःप्राप्तिप्रत्याशाभावात्तटस्थमुदासीनं । विप्रियवशात् निष्कारणपरित्यागरूपाप्रियकर्म्मकरणात् कलुषं कोपेनाविलं । झटिति घटनाय पुनर्मेलनाय उत्तम्भितमिव कृतत्वरमिव । सौजन्यात् निर्दोषत्वज्ञानात् प्रसन्नं कोपशून्यं । करुणैः करुणावचनजातप्रवणैः, गाढकरुणं कृपार्द्रयं करुणारसव्याप्तं वा । द्रवीभूतं गलितमिव । अस्मिन् क्षणे इति उत्तरार्द्धमतिविप्रियवशयेत्यन्वेति द्रवेत्यस्य द्रवीभूतमित्यनेनान्वयः ।

† नन्दिनि आनन्दजनिके ।

Digitized by Google

रामः । अथवा कुतः प्रियतमा, नूनं संकल्पाभ्यासपाटवोपादानएष रामस्य भ्रमः ।

नेपथ्ये । प्रमादः प्रमादः । सीतादेव्याः स्वकरकलितैरित्यर्द्धं पठ्यते ।

रामः । सकरुणौत्सुक्यं । किं तस्य ?

पुनर्नेपथ्ये । बध्वा सार्द्धमित्युत्तरार्द्धं पठ्यते ।

सीता । को दाणीं अहिउज्जिस्सदि । (१)

रामः । क्वासौ दुरात्मा यः प्रियायाः पुत्रकं बधूद्वितीयमभिभवति । दृत्युत्तिष्ठति ।

प्रविश्य । सभ्रान्ता वासन्ती । कथं देवो रघुनन्दनः ?

सीता । कधं पिअसही मे वासन्ती ? (२)

वास । जयति जयति देवः ।

रामः । निरूप्य । कथं देव्याः प्रियसखी वासन्ती ?

वास । देव ! त्वर्य्यतां त्वर्य्यताम, इतोजटायुगिरिशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य्य सम्भावयतु देव्याः पुत्रकं देवः ।

सीता । हा तात जटायो ! सुण्णं तए विणा जणट्ठाणं । (३)

रामः । अहह ! हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः । *

---

(१) कहदानीमभियोक्ष्यते । अभियोक्ष्यते तत्परित्राणाय मया नियोक्ष्यते । णिउज्जिस्सदीति पाठः सम्यक् ।

(२) कथं प्रियसखी मे वासन्ती !

(३) हा तात जटायो ! शून्यं त्वया विना जनस्थानम् ।

---

* कथोद्घाताः सीताविषयककथाया उपक्रमाः ।

Digitized by Google

वास । इतस्ततो देवः ।

सीता । भअवदि ! सच्चंज्जेव वणदेवदा वि मं ण पेक्खदि ? (१)

तम । अयि वत्से ! सर्व्वदेवताभ्यः प्रकृष्टमैश्वर्य्यं भागीरथीदेव्याः, तत्किमाशङ्कसे ।

सीता । तदो अणुसरह्म । (२) इति परिक्रामतः ।

रामः । परिक्रम्य । भगवति गोदावरि ! नमस्ते ।

वास । निरूप्य । देव देव ! मोदस्व विजयिना बधूद्वितीयेन देव्याः पुत्रकेण ।

रामः । विजयतामायुष्मान् ।

सीता । अह्महे ईदिसो एस संवुत्तो ! (३)

रामः । देवि ! दिष्ट्या वर्द्धसे ।

येनोद्गच्छद्विसकिसलयस्निग्धदन्ताङ्कुरेण
व्याक्षिप्तस्ते सुतनु ! लवलीपल्लवः कर्णपूरात् ।
सोऽयं पुच्छस्तव मदमुचां वारणानां विजेता
यत्कल्याणं वयसि तरुणे * भाजनं तस्य जातः ॥

सीता । अविउत्तो दाणीं अअं दीहाऊ दुमाए सोम्मदंसणाए भोदु । (४)

---

(१) भगवति ! सत्यमेव वनदेवतापि मां न प्रेक्षते ?

(२) ततोऽनुसरामः ।

(३) अहो ईदृग्एव संवृत्तः । ईदृग्लक्षणवयस्कः ।

(४) अवियुक्तइदानीमयं दीर्घायुरनया सौम्यदर्शनया भवतु । सौम्यदर्शनया करिण्या । अनया अवियुक्तो भवत्वित्यन्वयः । आवयोरिव अनयोर्विरहो माभूदित्यर्थः ।

---

* तरुणे वयसि यत्कल्याणं प्रतिपक्षविजयादिरूपं मङ्गलम् ।

Digitized by Google

रामः । सखि वासन्ति ! पश्य पश्य कान्तानुवृत्तिचातुर्य्यमप्यनुशिक्षितं वत्सेन ।

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपातिताः
पुष्पत्पुष्करवासितस्य पयसोगण्डूषसंक्रान्तयः ।
सेकः श्रीकरिणा करेण विहितः कामं,विरामे पुन
र्यत्नस्नेहादनराखनालनलिनीपत्रातपत्रं धृतम् ॥ *

सीता । भअवदि तमसे ! अअं दाव ईदिसो आदो, दे उण ण आणामि कुसलवा एत्तिकेण कालेण कीदिसा विअ होन्ति । (१)

तम । यादृशोऽयं तादृशौ तावपि ।

---

(१) भगवति तमसे ! अयं तावदीदृशो जातः । तौ पुनर्न जानामि कुशलवावेतावता कालेन कीदृशाविव भवतः ।

---

* लीलया उत्खातानामुद्धृतानां मृणालकाण्डानां मृणालसम्बन्धानां ये कवलच्छेदाः ग्रासभूताः खण्डास्तेषु पुष्यद्भिः प्रस्फुटद्भिः पुष्करैः पद्मैर्वासितस्य सुरभीकृतस्य पयसोगण्डूषसंक्रान्तयः गण्डूषः मुखार्थं तेन संक्रान्तयः संयोजनानि हृदभिहितभावत्वात् मुखेन संक्राम्यमाणतादृग्जलबिन्दवइत्यर्थः संपातिता निक्षिप्ताः संपादिता इति क्वचित्पाठः । करिण्याभोजनसौकर्य्यार्थमितिभावः । ततश्च श्रीकरिणा जलकणान् मुञ्चता करेण मुखेन काममत्यर्थं सेको विहितः । विरामे पुनः सेकस्यावसानेच अनराखमवक्रं नाखं यस्य तादृशं नलिनीपत्ररूपमातपत्रं छत्रं धृतम् आतपनिवारणायेति शेषः । यदिति स्नेहादिति च वाक्यत्रयेऽन्वेति ।

Digitized by Google

सीता । ईदिसी अहं मन्दभाइणी, जाए ण केवलं णिरन्तरं अज्जउत्तविरहो पुत्तविरहोवि । (१)

तम । भवितव्यतेयमीदृशी ।

सीता । किं वा मए पसूदाए, जेण तादिसंपि मम पुत्तकाणं ईसिविरलकोमलधवलदसणुज्जलकवोलं अणुवद्धमुद्धकाअलिविहसिदं णिवद्धकाकसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिअं अज्जउत्तेण । (२)

तम । अस्तु देवताप्रसादात् ।

सीता । भअवदि तमसे ! एदिणा अपच्चसंसुमरणेण उच्छुसिदपहुदत्थणी ताएच्च पिदुणो सण्णिधाणेण खणमेत्तं संसारिणीच्चि संवुत्ता । (३)

---

(१) ईदृशी अहं मन्दभागिनी । यस्या न केवलं निरन्तरमार्य्यपुत्रविरहः, पुत्रविरहोऽपि ।

(२) किं वा मया प्रसूतया, येन तादृशमपि मम पुत्रयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धकाकपक्षकममलमुखपुण्डरीकयुगलं न परिचुम्बितमार्य्यपुत्रेण । प्रसूतयेति अनुपात्तकर्म्मत्वेनाकर्म्मकस्य सूङः कर्त्तरि क्तः । प्रसूतया मया किं मम पुत्रप्रसवेन किं फलमुत्पन्नमित्यर्थः । अनुबद्धा मुग्धा मनोज्ञा काकली सूक्ष्ममधुरास्फुटध्वनिर्यत्र तादृशं विहसितं यत्र तत् । काकपक्षकः काकपक्षः केशभागविशेष इत्यर्थः । निबद्धः स यत्र तत् ।

(३) भगवति तमसे ! एतेनापत्यसंस्मरणेन उच्छ्वसितप्रभृतस्तनी तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिण्यस्मि संवृत्ता । संसारिणी संसारसुखवती तच्च सुखं स्त्रीणां पतिसान्निध्यसहितमपत्यसद्भावजन्यम् ।

Digitized by Google

तम । किमत्रोच्यते ? प्रसवः खलु प्रकर्षपर्य्यन्तः स्नेहस्य । परश्चैतदन्योऽन्यसंश्लेषणं पित्रोः । *

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥ †

वास । इतोऽपि देवः पश्यतु ।

अतरुणमदताम्रवोत्सवान्ते-
ष्वयमचिरोद्गतमुग्धलोलवर्हः ।
मणिमुकुटइवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ ‡

---

* प्रसवः पुत्रः, स्नेहस्य प्रकर्ष उत्कर्ष आधिक्यमित्यर्थः तस्य पर्य्यन्तः श्रेष्ठसीमा स्नेहस्य परा काष्ठा पुत्रएव पर्य्यवस्यतीत्यर्थः । अतएवोक्तं नच पुत्रसमः स्नेह इति । परश्चैतदिति एतत् प्रसवरूपं पित्रोः परमत्यन्तं केवलंवा अन्योऽन्यसंश्लेषणं परस्परसम्बन्धः ।

† दम्पत्योरन्तःकरणतत्त्वस्य चतुर्विंशतितत्त्वान्तर्गतस्य मनसः । अन्तःकरणयुगस्येति पाठः सम्यक् । स्नेहस्य संश्रयः सम्यक् श्रयणं तस्मात् अपत्यमिति अपत्यरूपएकआनन्दमयग्रन्थिर्बध्यते विधात्रेति शेषः, नेदमपत्यं किन्तु दम्पत्योरन्तःकरणयोरानन्दमयग्रन्थि रित्यर्थः ।

‡ अतरुणः प्ररूढोयोमदआनन्दोविकारविशेषोवा तेन ये ताम्रवोत्सवास्तत्यामोदास्तेषामन्तेषु विरामेषु । अचिरोद्गतेति यौवनस्याचिरोत्पन्था इति भावः । मणिमुकुटइवेति कदम्ब उच्चस्थेत्यर्थः । स एष इति सीतादेव्या यः पुत्रीकृत्य पालित इत्यर्थः ।

Digitized by Google

सीता । सकौतुकास्मम् । एसो सो एसो सो । (१)

रामः । वत्स ! मोदस्व, वयमद्य वर्त्तामहे । *

सीता । एवं भोदु । (२)

रामः । भ्रमिषु कृतपुटान्तर्मण्डलाकृत्ति चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या । †
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन ‡ स्मरामि ॥

हन्त तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते ।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत् ।

सीता । निरूप्य सास्रं । सुट्ठु पच्चभिण्णादं अज्जउत्तेण । (३)

रामः । स्मरति § गिरिमयूरएष देव्याः
स्वजनदृवाच यतः प्रमोदमेति ॥

---

(१) एष सः एष सः । स इति यः पूर्व्वं मया पुत्रीकृत्य पालित इत्यर्थः ।

(२) एवं भवतु । मुदितोभवत्वित्यर्थः ।

(३) सुष्ठु प्रत्यभिज्ञातमार्य्यपुत्रेण ।

---

* वर्त्तामहे जीवामः ।

† भ्रमिषु मण्डलगतिषु कृता पुटयोरावरणयोरन्तर्मध्ये मण्डलाकृत्तिः मण्डलाकारेणावर्त्तनं येन तादृशं चक्षुः कर्म्म प्रचलितयोश्चतुरयोः सविलासयोर्भ्रुवोर्लास्याख्यवैनर्त्तनैर्मण्डयन्त्या शोभयन्त्या ।

‡ वत्सलेन स्नेहवता ।

§ स्मरतीति तं कदम्बमिति शेषः ।

Digitized by Google

वास । अत्र तावदासनपरिग्रहं करोतु देवः ।

एतत्तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयमिलातलन्ते ।
अत्र स्थिता हृणमदादनुशो यदेभ्यः
सीता, ततोहरिणकैर्न विभुच्यते स्म ॥

रामः । दृढन्तावदग्रकायमेव द्रष्टुम् । इत्यन्यतोरूदनुपविशति ।

सीता । सहि वासन्दि ! किं तुए कदं अज्जउत्तस्स मम अ एदं दंसअन्तीए, हद्धी हद्धी सोज्जेव अज्जउत्तो, तंज्जेव पञ्चवटीवणं, साज्जेव वासन्दी, ते ज्जेव विविहविस्सम्भसाक्खिणो गोदावरीकाणणुद्देसा, ते ज्जेव आदण्णिव्विसेसा मअपक्खिपादवा, साज्जेव चाहं, मम उण मन्दभाइणीए दीसन्तंपि सव्वं ज्जेव एदं णट्ठन्ति, ता दृदिसो जीअलोअस्स परिवत्तो । (१)

वास । सखि सीते ! कथं न पश्यसि रामस्यावस्थाम् । *

---

(१) सखि वासन्ति ! किं त्वया कृतमार्य्यपुत्रस्य मम च एतद्-दर्शयन्त्या । हा धिक् हा धिक् सत्यवार्य्यपुत्रः, तदेव पञ्चवटीवनं, सैव वासन्ती, तएव विविधविश्रम्भसाक्षियोगोदावरीकानने देशाः तएव जातनिर्व्विशेषा मृगपक्षिपादपाः, सैव चाहं, मम पुनर्मन्दभागिन्या दृश्यमानमपि सर्व्वमेवैतन्नास्तीति, तदीदृशो जीवलोकस्य परिवर्त्तः । जातनिर्विशेषाः शून्यप्रायाः ।

---

* सीतां मनसिकृत्य वासन्त्याः सीते इत्यादि सम्बोधनं भागीरथ्यावरेव सीतायाः साक्षाद्दर्शनाभावात् ।

Digitized by Google

कुवलयदलस्निग्धैरङ्गैर्दृशो नयनोत्सवं
सततमपि ते खेच्छादृश्यो नवोनवएव यः । *
विकलकरणः पाण्डुच्छायः मृषा परिदुर्बलः
कथमपि सदृत्युक्षेतव्यस्तथापि दृशोः प्रियः ॥ †

सीता । पेक्खामि सहि पेक्खामि (१)

तम । पुचि ! पश्यन्ती प्रियं भूयाः । ‡

सीता । हा देव्व एसो मए विणा, अहम्पि एदेण विणेत्ति सविणेवि केण सम्भाविदं आसी, ता मुहुत्तकंपि जम्मन्तरादो विअ अणुलद्धदंसणा वाहसलिलन्तरेसु पेक्खामि दाव वच्छस्स अङ्गाउत्तं । (२) इति पश्यति ।

तम । सस्नेहासं परिष्वज्य ।

विलुलितमतिपूरैर्वाष्पमानन्दशोक
प्रभवमवसृजन्ती दृष्णयोस्तानदीर्घा ।

---

(१) पश्यामि सखि पश्यामि ।

(२) हा दैव एष मया विना अहमप्येतेन विनेति स्वप्नेऽपि केन सम्भावितमासीत् । तन्मुहूर्त्तकमपि जन्मान्तरत इव अनुलब्धदर्शना वाष्पसलिलान्तरेषु पश्यामि तावदत्सखमार्य्यपुत्रम् । जन्मान्तरत इति सप्तम्यन्तं । वाष्पसलिलानामन्तरेषु पतनपुनरुत्पत्तिमध्येषु ।

---

* स्वेच्छादृश्यइत्यत्रापिकारोबोध्यः सततं दृश्यमानोऽपीत्यर्थः नवोनव इति प्रेमातिशयसद्भावादितिभावः ।

† कथमपि निर्मुक्ताभिनिवेशेन स इति सोऽयमिति उन्नेतव्यः प्रत्यभिज्ञातव्यः । दृशोः प्रिय इति अस्माकमिति शेषः ।

‡ प्रियं पश्यन्ती भूयाः सचिरं प्रियं पश्य ।

Digitized by Google

क्षपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः ॥ *

वास० ।

ददतु तरवः पुष्पैरर्घं फलैश्च मधुच्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः ।
कलमविरलं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवोरामः स्वयं वनमागतः ॥ †

रामः । एहि सखि वासन्ति ! नन्दितः क्षीयताम् ।

वास० । उपविश्य सार्धं । महाराज ! अपि कुशलं कुमार-लक्ष्मणस्य ? ।

रामः । अश्रुतिमभिनीय ।

करकमलविक्षोणैरम्बुनीवारशय्यै
स्तरुशकुनिकुरङ्गान् मैथिली यानपृच्छत् ।

---

* अतिपूरैः प्रवाहाधिक्येन विक्षुब्धितं सवेगं यतत् । दृष्ट्या सादरदृष्टया उत्ताना विस्फारिता अतएव दीर्घा च । उत्तान-दीर्घा अतिदीर्घा वा । क्षपयति क्षालयति सादरं विषयीकरोती-त्यर्थः । धवला कोपकषायितत्वाभावेन श्वेतप्रधाना बहलमुग्धा अतिमनोज्ञा च ।

† मधुच्युतो मधुवर्षिणः एतेन मधुपर्कदानमपि प्रतिपादितं । स्फुटितानां कमलानामामोदः सौरभं तस्य प्रायोबाहुल्यं यत्र ते । प्रवान्तु मन्दं वहन्तु । वनानिला वनसंसर्गितया शीतलावयवः । रत्युत्कण्ठाः रामागमनप्रीत्या उत्तोलितग्रीवाः सन्तः । रत्युत्कर्षा इति पाठस्तु न मनोरमः ।

Digitized by Google

भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रवइव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ *

वास । महाराज ! ननु पृच्छामि, अपि कुशलं कुमार लक्ष्मणस्य ? ।

रामः । स्वगतम् । अये महाराजेति निर्व्यूढप्रेमामन्त्रणं पदं, सौमित्रिमात्रे च वाष्पस्खलिताक्षरः † कुशलप्रश्न, तथा मन्ये विदितसीतावृत्तान्तेयमिति । प्रकाशम् । आः ‡ कुशलं कुमारस्येति रोदिति ।

वास । अयि देव ! किमिति दारुणोदारुणः § खल्वसि ।

सीता । सहि वासन्दि ! किं तुमं सि एव्वं वादिणी, पिअा रट्ठोक्कु सव्वस्सु अज्जउत्तो, विसेसदो मम पिअसहीणं । (१)

वास । त्वं जीवितं त्वमसि मे हृदयं द्वितीयं,
त्वं कौमुदी नयनयो, रमृतं त्वमङ्गे ।

---

(१) सखि वासन्ति ! किं त्वमस्येवंवादिनी, प्रियार्हः खलु सर्वस्यार्यपुत्रः, विशेषतो मम सखीनाम् । असि भवसि । प्रियार्हः प्रियालापयोग्यः ।

---

* कोऽपि अनिर्वचनीयः विकारः शोकजाड्यं । हृदयस्य उरीकृतकाठिन्यस्यापि मनसः द्रवइव गलितप्रायत्वमिव प्रस्तरोद्भेदयोग्यः पाषाणद्रवसदृशः ।

† महाराजेति ननु प्रियसुहृत् सीतापते इति । निर्व्यूढयं स्नेहाव्यङ्गकम् । आमन्त्रणपदं सम्बोधनपदम् । सौमित्रिमात्रे ननु सीतायाश्च । वाष्पस्खलिताक्षरः ननु हर्षगद्गदस्वरः ।

‡ आहत्यनाख्यायाम् ।

§ दारुणोदारुणोऽतिदारुणः प्रियतमापरित्यागेनेति शेषः ।

Digitized by Google

इत्यादिभिः प्रियशतैरनुरुध्य * मुग्धां
तामेव, ग्राम्यमथवा किमिहोत्तरेण ॥ †

इति मूर्च्छति ।

रामः । स्थाने खलु वाक्यनिवृत्तिः ‡ मोहस्य, सखि ! समाश्वसिहि समाश्वसिहि ।

वास । समाश्वस्य । तत्किमिदमकार्य्यमनुष्ठितं देवेन ।

सीता । सहि वासन्ति ! विरम विरम । (१)

रामः । लोको न मृष्यतीति । §

वास । तत्कस्य हेतोः ।

रामः । सएव जानाति किमपि ।

तम । उचितस्तदुपालम्भः ¶ ।

---

(१) सखि वासन्ति ! विरम विरम ।

---

* अनुरुध्य सन्तोष्य ।

† तामेवेति एवकारोऽप्यर्थे, अतिप्रेमास्पदीभूतामपीत्यर्थः । निष्करुणं परित्यक्तवानसीतिवाक्यशेषः, अतएवाक्षेपः सचानुपालोऽग्रक्यवक्तव्यत्वद्योतनेन दुःखातिशयं व्यनक्ति । अथवा ग्राम्यं इदानीं तत्कथनेनालं । किमिति तन्न कथयसीत्याह किमिहोत्तरेणेति इह उत्तरेण परित्यक्तवानिति वाक्योत्तरांशकथनेन किं न किमपि प्रयोजनमस्तीत्यर्थः ।

‡ स्थाने उपयुक्तस्थले वाक्यनिवृत्तिर्वाक्योत्तरांशानुक्तिः दुःखातिशयद्योतनादिति भावः । वाक्यनिवृत्तिः स्थाने युक्तेति वा ।

§ न मृष्यति सीताया मुहावस्थितिं न सहते ।

¶ तदुपालम्भः लोकं प्रत्युक्तोऽयः ।

Digitized by Google

वास। अयि कठोर! यज्ञः किल ते प्रियं
किमयमेवानु घोरमतः परम्। *
किमभवदिपिने हरिणीदृशः
कथय नाथ! कथं वत मन्यसे॥

सीता। तुमं ज्जेव सहि वासन्दि! दारुणा कठोरा अ, जा एवं विलवन्ती पदीवेसि। (१)।

तम। प्रणयएवेदं व्याहरति शोकस्य।

रामः। सखि! किमत्र मन्तव्यम्।

वत्सैकहायनकुरङ्गविलोलदृष्टे †
सास्राः परिस्फुरितगर्भभरालसाथाः।
ज्योत्स्नामयीव ‡ मृदुबालमृणालकल्पा
कथाङ्गिरङ्गलतिका नियतं विलुप्ता॥

सीता। अज्जउत्त! धरामि एसा धरामि। (२)

रामः। हा प्रिये जानकि! क्वासि॥

---

(१) त्वमेव सखि वासन्ति! दारुणा कठोराच, या एवं विलपन्ती प्रदीपयसि। प्रदीपयसि प्रदीप्तविरहदुःखमार्य्यपुत्रं करोषि।

(२) आर्य्यपुत्र! प्रिये एषा प्रिये। प्रिये जीवामि।

---

* यज्ञोलिप्सुना त्वया अत्यन्तमयज्ञः सूचितमिति विषमम्।

† वत्सोभयचपलः एकहायन एकवर्षवयस्कोयः कुरङ्गोहरिणस्तस्येव विलोला दृष्टिर्यस्याः सा तथा तस्याः।

‡ ज्योत्स्नामयी ज्योत्स्नावत्कोमला।

Digitized by Google

सीता । हद्धी हद्धी अज्जउत्तोवि पमुक्तकण्ठं रो-दृदि । (१)

तम । वत्से ! साम्प्रतिकमेवैतत्, * कर्त्तव्यानि दुःखितै † र्दुःखनिर्व्वापनानि, यतः ।

पूरोत्पीडे तड़ागस्य परीवाहः प्रतिक्रिया ‡ ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते ॥
विश्लेषतो रामभद्रस्य बहुतरप्रकारकष्टोजीवलोकः ।
इदं विश्वं पाह्यं विधिवदभियुक्तेन मनसा
प्रियाशोकोजीवं कुसुममिव घर्म्मः क्लमयति ।
स्वयं कृत्वा त्यागं विलपनविनोदोऽयसुलभ
स्तदद्यापुच्छामोभवति ननु लाभोविदुदितम् ॥ §

रामः । कष्टं भोः कष्टम् ।

---

(१) हाधिक् हाधिक् आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रोदिति ।

---

* सांप्रतिकं युक्तिसिद्धम् ।

† दुःखितैः सद्भिः ।

‡ पूरोत्पीडे जलराशेरुद्रेके सति । परीवाहोजलोच्छ्वासः जलनिर्गमनमार्गेण जलनिःसारणमित्यर्थः प्रतिक्रिया समाधा नम् ।

§ अभियुक्तेन सततोद्योगवता तत्तत्कार्य्यजातव्यग्रेणे-त्यर्थः । विलपनेन विनोदः शोकापनोदनम् । असुलभोदुर्लभः नगरे क्षितस्येति शेषः । अद्यापीत्यत्र अत्रहीति पाठः सम्यक् अत्र निर्जनारण्ये । उच्छ्वासोदीर्घच्छ्वासपरित्यागेन शोकं क्षपयन् । ननु यतः, लाभोहितकरम् ।

Digitized by Google

दहति हृदयं गाढोद्वेगोदिधा नतु भिद्यते *
वहति विकलः कायोमोहं न मुञ्चति चेतनाम् । †
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधि ‡ र्मर्म्मच्छेदी न कृन्तति जीवितम् ॥

सीता । एवमेदं । (१)

रामः । हे भवन्तः पौरजानपदाः ।

न किल भवतां स्थानं देव्याग्रहेऽभिमतं तत
स्तृणमिव वने शून्ये त्यक्ता न वाथनुशोचिता ।
चिरपरिचितास्ते मे भावाः परिद्रवयन्ति मा
मिदमशरणैरद्यापीवं प्रसीदत हृद्यते ॥ §

---

(१) एवमिदम् ।

---

* दहति पिनष्टि । गाढोद्वेगं गाढोत्कण्ठमिति च पाठे पिष्टं भवतीत्यर्थः ।

† कायस्य मोहचेतनयोः सम्बन्धादवच्छेदकत्वात् परम्परया ।

‡ विधिर्दैवम् ।

§ किल यतः देव्याः सीताया मम ग्रहे स्थानं भवतां नाभिमतं ततोहेतोः । शून्ये निर्मनुष्ये । वनेऽनाथा त्यक्तेति क्वचित् पाठः । चिरपरिचिताः पूर्वं सीतया सार्द्धं विहारासक्तत्वेन चिरमनुभूता भावाः पदार्थाः वनप्रदेशादयः परिद्रवयन्ति तत्स्मारणाद्याकुलयन्ति । इदमशरणैरस्मिन् विषये निरुपायैः सद्भिः । समस्तमिदम् । इमंमितिपाठे मामित्यस्य विशेषणम् इमं जीवन्तम् । इदं हृद्यते इति क्रियाविशेषणन्तु न सम्यक् । अस्माभिरेवं विमुक्तकण्ठं रुद्यते अद्यापि यूयं प्रसीदत सीतायाग्रहेऽवस्थानमनुमन्यध्वं तथा सति तामन्वेषयामीतिभावः ।

Digitized by Google

तम । अतिगम्भीरमापूरणं शोकसागरस्य ।

वास । देव ! अतिक्रान्ते * धैर्यमवलम्ब्यताम् ।

रामः । सखि ! किमुच्यते धैर्यमिति ।

देव्या शून्यस्य जगतोदादग्रः † परिवत्सरः ।
प्रनष्टमिव नामापि नच रामोन जीवति ॥ ‡

सीता । मोहिदम्हि अज्जउत्तस्स एदेहिं वअणेहिं (१)

तम । एवं वत्से ।

नैताः प्रियतमावाचः स्नेहार्द्राः, शोकदारुणाः ।
एतास्तामधुनोधाराश्चोतन्ति सविषास्त्वयि ॥ §

रामः । अयि वासन्ति ! मया खलु

यथा तिरश्चीनमनातपत्रं प्रत्युप्तमन्तः, सविषश्च दंशः । ¶
तथैव तीव्रोहृदि शोकशङ्कुर्मर्म्माणि कृन्तन्नपि किं न सोढः ।

सीता । एवं हि मन्दभाइणी पुणोवि आआसआरिणी अज्जउत्तस्स । (२)

---

(१) मोहितास्मि आर्य्यपुत्रस्यैतैर्वचनैः ।

(२) एवमस्मि मन्दभागिनी पुनरप्यायासकारिण्यार्य्यपुत्रस्य । अस्मि भवामि ।

---

* अतिक्रान्ते अतीतविषये ।

† किमुच्यत इति धैर्य्यवानेवास्मीत्यर्थः ।

‡ नचेति धैर्य्यं विना रामः कथं जीवतीत्यर्थः ।

§ । एतावाचः स्नेहार्द्राइति ज्ञात्वा प्रियतमा न, किन्तु शोकेन दारुणाद्दुःखदा । एताः सविषामधुनोधाराश्चोतन्तीत्यन्वयः ।

¶ तिरश्चीनं वक्रभावेन प्रविष्टं । अनातपत्रं व्यक्तदण्डाकारच्छत्रशून्यम् । दंशः सर्पादिदंशनम् ।

Digitized by Google

रामः । एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मे संस्तुतवऋतरप्रियदर्शनादुद्दामोऽयमावेगः । * तथाहि

लोलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
योयोयत्नः कथमपि मया धीयते तन्मनन्तः । †
भित्त्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥

सीता । एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःक्ख-संक्खोहेण पप्फुरिदणिअदुक्खं विअ आकम्पिदं मे हिअअं । (१)

वास । स्वगतं । कष्टमभ्यापन्नोदेवस्तदन्यतः क्षिपामि

---

(१) एतेनार्य्यपुत्रस्य दुर्व्वारदारुणारम्भेण दुःखसंक्षोभेण प्रस्फुरितनिजदुःखमिवाकम्पितं मे हृदयम् । दुर्व्वारोऽवारणीयोदारुणोऽसह्यआरम्भउद्रेकोयस्य तादृशेन दुःखेन जनितोयः संक्षोभोव्याकुलत्वं तेन ।

---

* अतिनिष्कम्पमतिनिश्चलमतिसावधानमित्यर्थः यथा तथा स्तम्भितं स्थिरीकृतमन्तःकरणं येन तस्य । निष्कम्पेत्यत्र निगूढेति क्वचित्पाठः । संस्तुतानि पूर्व्वं परिचितानि वऋतराणि नत्वेकंदेवा यानि प्रियाणि रम्यवस्तूनि तेषां दर्शनादुद्दाम उद्भटः आवेगोव्याकुलत्वम् ।

† लोलोल्लोलमतिलोलं यथा तथा क्षुभितः क्षोभंगतो वर्द्धनोन्मुखइत्यर्थः यः करुणोरसविशेषस्तत्स्थायिभावः शोक इत्यर्थः । तस्य यदुज्जृम्भणमुद्रेकस्तस्य स्तम्भनार्थं प्रतिरोधाय । मया धीयत इत्यत्र समाधीयत इति पाठे मयेति शेषः ।

Digitized by Google

तावत् । प्रकाशं । चिरपरिचितानामिदानीं जनस्थानभागानामवलोकनेनात्मानमानन्दयतु देवः ।

रामः । एवमस्तु । दृष्ट्युत्थाय परिक्रामति ।

सीता । सन्दीवणाओज्जेव दुक्खस्स पिअसहीविणोदणोवाआओत्ति मण्णेदि । (१)

वास । देव देव !

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः स्खिरकौतुका चिरमभूद्गोदावरीरोधसि ।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्पृहा
कातर्य्यादरविन्दकुड्मलनिभोमुग्धः प्रणामाञ्जलिः ॥

सीता । दारुणासि सहि वासन्ति ! दारुणासि, जा एदेहिं हिअअमम्मगूढ़सल्लसरिसेहिं पुणो पुणो मं मन्दभागिणीं अज्जउत्तं वि दूणवेसि । (२)

रामः । चण्डि जानकि! दृतस्तोदश्यसदृव नचानुकम्पसे ।
हाहा देवि स्फुटति हृदयं संवते देहबन्धः
शून्यं * मन्ये जगदविरतज्वाल,मन्तर्ज्वलामि ।

---

(१) सन्दीपनादेव दुःखस्य प्रियसखीविनोदनोपायादिति मन्यते ।

(२) दारुणासि सखि वासन्ति ! दारुणासि, या एतैर्हृदयमर्म्मगूढशल्यसदृशैः पुनःपुनर्मां मन्दभागिनीमार्य्यपुत्रमपि दुनोषि । हृदयरूपं यन्मर्म्मस्थानं तत्र गूढं प्रविष्टं यच्छल्यं तत्सदृशैर्वचनैरिति शेषः ।

---

* शून्यं शरणरहितम् निर्विनोदम्बा ।

Digitized by Google

सीदन्नन्धे तमसि विधुरोमज्जतीवान्तरात्मा,
विश्वङ्मोहः स्खलयति, कथं मन्दभाग्यः करोमि॥*

इति मूर्च्छति।

सीता। हद्धी हद्धी पुणोवि अमूढो अज्जउत्तो। (१)

वास। देव समाश्वसिहि समाश्वसिहि।

सीता। हा अज्जउत्त! मं मन्दभाइणीं उद्दिस्सिअ सअल-जीअलोअमङ्गलाधारस्स दे जअलाहस्स वारंवारं संसइद जीविददारुणो दसापरिणामोत्ति हाहदम्हि। (२)

इति मूर्च्छति।

तम। वत्से! समाश्वसिहि समाश्वसिहि, पुनरुत्पाणिस्सइ एव सञ्जीवनोपायोरामभद्रस्य।

वास। कथमद्यापि नेच्छसिति, हा प्रियसखि सीते! क्वासि, सम्भावयात्मनोजीवेश्वरम्।

सीता। ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति।

वास। दिष्ट्या प्रत्यापन्नजीवनोरामभद्रः।

---

(१) हा धिक् हा धिक् पुनरपि प्रमूढआर्य्यपुत्रः।

(२) हा आर्य्यपुत्र! मां मन्दभागिनीमुद्दिश्य सकलजीवलोक मङ्गलाधारस्य ते जगन्नाथस्य वारंवारं संशयितजीवित दारुणोदशापरिणामइति हा हतास्मि।

---

* विश्वक् समस्तभावजातं स्खलयति ज्ञानाविषयं करोति। कथं किम्।

Digitized by Google

रामः। आलिम्पन्नमृतमयैरिव प्रलेपै
रन्तर्वा वहिरपि वा शरीरधातून्। *
संस्पर्शः पुनरपि जीवयत्यकस्मा
दानन्दादपरविधं तनोति मोहम्॥
आनन्दनिमीलिताक्षएव सखि वासन्ति! दिष्ट्या वर्द्धसे।
वास। देव कथमिव?
रामः। सखि! किमन्यत्, पुनः प्राप्ता जानकी।
वास। अयि देव! का वा?
रामः। स्वर्गसुखमभिनीय। पश्य नन्वियं पुरतएव।
वास। अयि देव! किमिति मर्म्मच्छेददारुणैरतिप्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं मां दहसि।
सीता। ओसरिदुमिच्छामि, एसोऽण चिरसब्भावसोम्मसीअलेण अज्जउत्तणिस्सासेण दीहदारुणं मे सन्तावं हरन्तेण वज्जलेवोवणिबद्धोविअ सिद्धन्तनीसहविपद्धत्थो वेअणसीलो अवसो विअ मे हत्थो। (१)

(१) अपसर्त्तुमिच्छामि, एष पुनश्चिरसद्भावसौम्यशीतलेनार्य्यपुत्रस्पर्शेन दारुणमपि सन्तापं हरता वज्रलेपोपनिबद्ध इव खिद्यन्निःसहविपर्य्यस्तोवेदनशीलोऽवशइव मे हस्तः। चिरसद्भावेनाभ्यभिचारिप्रणयेन सौम्यः सुखदः शीतलश्च तेन। खिद्यन् खेदवान् निःसहोदुर्ब्बलः अतएव विपर्य्यस्तः विपर्य्यासं प्राप्तः स्वभावप्रच्युतइत्यर्थः। विशेषणानां कर्म्मधारयः। हरन्तेनेत्यत्र करन्तेनेति पाठेन सम्यक्।

* अन्तःशरीरधातवोरक्तादयः बहिःशरीरधातवस्त्वगादयः।

रामः । सखि ! कुतः प्रलापाः ।

गृहीतोद्वाहः पूर्व्वं परिणयविधौ कङ्कणधर
श्चिरं खेच्छास्वैरं रमितमभिरैर्यः परिचितः ।

सीता । अज्जउत्त ! सोज्जेव दाणिं सि तुमं ? । (१)

रामः । सएवायं तस्यास्तुहिननिकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दल * निभः ॥

इति गृह्णाति ।

सीता । हद्धी हद्धी अज्जउत्तप्फंसमोहिदाए ममादो-क्खु मे संवुत्तो । (२)

रामः । सखि वासन्ति ! आनन्दनिमीलितेन्द्रियः साध्वसेन † परवानस्मि, तत्त्वं तावदेनां धारय ।

वास । कष्टमुन्मादएव ।

सीता । ससम्भ्रममाश्लिष्यापसर्पति ।

रामः । हा धिक् प्रमादः हा धिक् प्रमादः ।

करपल्लवः सतस्याः सहसैव जडाज्जडः परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान्मम खिद्यतः खिद्यन् ॥

---

(१) आर्य्यपुत्र ! सएवेदानीमसि त्वम् ? सएव तद्भाववानेव, किमिति शेषः, मया पुनर्ज्ञातं सभावस्त्वेदानीं विनष्ट इति कथमन्यथा मामप्रत्ययीव त्यक्तवानसीति काङ्क्षा व्यज्यते ।

(२) हा धिक् हा धिक् आर्य्यपुत्रस्पर्शमोहितायाः प्रमादः खलु मे संवृत्तः । प्रमादइति मत्प्रत्यभिज्ञानादिति भावः ।

---

* कन्दलं नवाङ्कुरं पल्लवेति क्वचित्पाठः ।

† साध्वसेन आनन्दजाड्येन ।

Digitized by Google

सीता । हद्धी हद्धी अज्जवि अणवत्थिदत्थिमिदमूढघु-ग्घन्तणअणो ण पज्जवत्थावेदि अत्ताणअं । (१).

तमः । सखेदं निर्व्वर्ण्य ।

सखेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता * कदम्बयष्टिः स्फुटकोरकेव ॥

सीता । स्वगतम् । अहो ! अवसेण एदेण अत्ताणएण लज्जाविदम्हि भअवदीए तमसाए, किंत्ति किल एसा मणि-स्सदि एसो परिच्चाओ एसो अहिसङ्गोत्ति । (२)

रामः । सर्व्वतोऽवलोक्य । कथं नास्त्येव नश्चक्रुणे वैदेहि !

---

(१) हा धिक् हा धिक् अनवस्थितस्तिमितमूढघूर्णमाननयनो न पर्य्यवस्थापयत्यात्मानम् । स्तब्धमनवस्थिते चक्षुषे, स्तब्धश्च स्तिमिते निश्चले, तथा स्तब्धं मूढे विषयग्रहविधुरे, स्तब्धश्च घूर्णमाने विषय ग्रहायोद्यते, नयने यस्य सः ।

(२) अहो अवशेन एतेनात्मना लज्जापितास्मि भगवत्यात्तम-सायाः, किमिति किल एषा मंस्यते एष परित्यागः एषोऽभिषङ्ग इति । लज्जापिता लज्जयातिक्रामिता । आतश्च तेनातिक्रामती त्यनेनापुः । किमिति किम् । अभिषङ्गः सम्यक्सङ्गः । अभिषङ्ग स्वभिभवे सङ्गआक्रोशनेऽपिचेति वैजयन्ती । परित्यागो रामस्य, अभिषङ्गः सीताया इत्यर्थः तादृशपरित्यागानन्तरमीदृगभि-षङ्गोऽनुचितइति भावः ।

---

* मरुता प्रविधूता कम्पिता अम्भसा वृष्टिजलेन सिक्ता चेति क्रमेणान्वयः ।

Digitized by Google

सीता। सच्चं अकरुणम्हि, जा एव्वं तुमं पेक्खन्ती धरामि ज्जेव जीअं (१)

रामः। क्षान्तिं प्रसीद देवि! न मामेवंविधं परित्यक्तुमर्हसि।

सीता। अह्ह अज्जउत्त विवरीदं विअ एदं। (२)

वास। देव प्रसीद प्रसीद, खेनैव लोकोत्तरेण धैर्य्येण संस्तभ्यातिभूमिगतविप्रलम्भ * मात्मानं, कुतोऽत्र प्रियसखी मे सीता।

रामः। व्यक्तं नास्ति, कथमन्यथा वासन्त्यपि तां न पश्येत्, अपि खलु स्वप्नएष स्यात्, नचास्मि प्रसुप्तः, कुतोवा रामस्य निद्रा, सर्व्वथा सएवैष भगवाननेकवारपरिकल्पितनिर्म्माता विप्रलम्भः पुनःपुनरनुबध्नाति। †

सीता। मएज्जेव दारुणाए विप्पलद्धो अज्जउत्तो। (३)

---

(१) सत्यमकरुणास्मि, या एवंविधं त्वां पश्यन्ती धराम्येव जीवम्

(२) अयि आर्य्यपुत्र विपरीतमिवेदं। परित्यागस्य भवतैव कृतत्वादितिभावः।

(३) मयैव दारुणया विप्रलब्ध आर्य्यपुत्रः। मयैवेति विप्रलम्भस्य नायं दोष इत्यर्थः।

---

* अतिभूमिगतविप्रलम्भं परसीमाप्राप्तवियोगदुःखम्।

† भगवानिति सोल्लुण्ठनोक्तिः। अनेकवारं परिकल्पितस्य भ्रमविषयस्य सीतास्पर्शस्य निर्म्माता सम्पादकः, निर्म्मित इति पाठे अनेकवारपरिकल्पितो निर्म्मितोयेनेति बहुव्रीहिः। अनुबध्नाति मोहयति।

Digitized by Google

वास । देव पश्य पश्य ।

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथः
पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः ।
खड्गच्छिन्नजटायुपक्षतिरितः, सीतां ज्वलन्तीं वह
न्नन्तर्व्याकुलविद्युदम्बुददव द्यामभ्युदस्थादरिः ॥ *

सीता । सभयम् । अज्जउत्त तादो वाबादीअदि, अहञ्च अवहरीआमि, परित्ताहि परित्ताहि । (१)

रामः । सवेगमुत्थाय । आः पाप ! तातप्राणसीतापहारिन् क्व यासि ।

वास । अयि देव राक्षसकुलप्रलयधूमकेतो ! अद्यापि ते मन्युविषयः ? । †

सीता । अज्जो उम्मत्तम्हि संवुत्ता । (२)

---

(१) आर्य्यपुत्र ! तातो व्यापाद्यते, अहञ्चापह्रिये, परित्रायस्व परित्रायस्व । तातो जटायुः, व्यापाद्यते विनाश्यते ।

(२) अहो उन्मत्तास्मि संवृत्ता । उन्मादोऽत्र अतीतस्य वर्त्तमानत्वभ्रमः ।

---

* पौलस्त्यस्य रावणस्य । विघटितोभग्नः । कार्ष्णायसः कृष्णायोऽनिर्म्मितः, पश्यैते इत्यत्र तेचैते इति क्वचित्पाठः, कङ्कालशेषाः अस्थिमात्रावशिष्टाः । खराश्चस्य वाहकभूता गर्दभाः । इतोऽत्र रावणस्य खड्गेन छिन्ना जटायोः पक्षतिः पक्षमूलम् अस्तीति शेषः । जटायुशब्द उकारान्तः सान्तश्च । अन्तर्मध्ये व्याकुला चञ्चला विद्युद्यस्य सः । अरीरावणः ।

† मन्युविषयः क्रोधाधारोरावणः किमस्तीति शेषः ।

Digitized by Google

रामः । अन्वर्थएवायमधुना प्रलापोवर्त्तते । *

उपायानां भावादविरतविनोदव्यतिकरै
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।
वियोगोमुग्धाक्ष्याः सखलु रिपुघातावधिरभूत्,
कथं तूष्णीं सद्यो निरवधिरिदानीन्तु विरहः ॥ †

सीता । णिरवधित्ति हा हदस्मि मन्दभाइणी । (१)

इति रोदिति ।

रामः । हा कष्टं ।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्य्यं हरीणां वृथा,
प्रज्ञा जाम्बवतोऽपि, यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं ‡ यत्र न विश्वकर्म्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि भोः ॥ §

---

(१) निरवधीति हा हतास्मि मन्दभागिनी । हतास्मीति मनः प्राप्तिसम्भावनाया निरवधिपदेनोच्छेदादिति भावः ।

---

* अन्वर्थः सार्थकः प्रलापोऽनर्थकं वच इति कोषात् वस्तुत एव निरर्थक इत्यर्थः अत्र अन्यथैवेतिपाठो न सम्यक् ।

† उपायानां भावात् सुग्रीवादिसहायानां सद्भावात् अविरतः सततं प्रवृत्तोविनोदस्यामोदस्य विरहदुःखापनोदनस्य वा व्यतिकरः सम्पर्कोयेषु तैः । रिपुघातावधिरिति रावणवधानन्तरमेव सीताया लाभादितिभावः । तूष्णीं निर्व्यापारेण सता ।

‡ मार्गं सेतुरूपम् ।

§ भोः प्रिये तत्र क्व कस्मिन् प्रदेशे असि इदानीं वर्त्तसे इत्यन्वयः । भोरित्यत्र मे इति पाठो न सम्यक् ।

Digitized by Google

सीता । वञ्चु मणाविदव्विह्मि तं पुव्वविरद्धं । (१)

रामः । सखि वासन्ति ! सुहृदामिदानीं दुःखायैव रामस्य दर्शनं, तदिदं कियच्चिरं त्वां रोदयिष्यति, तदनुजानीहि मां गमनाय ।

सीता । सोदेगं तमसामवलम्ब्य । भअवदि तमसे ! गच्छदिव्वेव अज्जउत्तो । (२)

तम । वत्से समाश्वसिहि समाश्वसिहि, नन्वावामर्थापुत्रतोः कुशलवयोर्वर्षवर्द्धनमङ्गलानि सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता । भअवदि ! पसीद, खणमेत्तंपि दाव दुल्लहं जणं पेक्खामि । (३)

रामः । अस्ति चेदानीमस्यैमेधाय सहधर्मचारिणी मे ।

सीता । साच्चेपं खगतम् । अज्जउत्त का ? (४)

रामः । हिरण्मयी सीतायाः प्रतिकृतिः ।

सीता । सोच्छासं सास्रम् । अज्जउत्तोदाणीं सि तुमं, अच्छे उक्खादमिदं दाणीं मे परिच्चाअलज्जासल्लं अज्जउत्तेण । (५)

---

(१) वञ्चुमानयामि तं पूर्वविरुद्धम् ।

(२) भगवति तमसे ! गच्छत्येवार्यपुत्रः ।

(३) भगवति ! प्रसीद क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षामि ।

(४) आर्यपुत्र का ।

(५) आर्यपुत्रइदानीमसि त्वम्, अहो उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्यपुत्रेण । त्वमिदानीमार्यपुत्रोऽसि वल्लभो भवसि परित्यक्तवतोऽपि मत्प्रतिकृतावेवानुरक्तत्वेनापरित्यागित्वादितिभावः । दाणींसि इत्यत्र दाणींपि इति पाठः सम्यक् । परिच्चाअलज्जासल्लमित्यत्र परिवाअसल्लमिति क्वचित्पाठः । परिवादशल्यमित्यर्थः ।

Digitized by Google

रामः । तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता । धण्णा सा, जा अज्जउत्तेण बहुमण्णदि, जा अ अज्जउत्तं विणोदअन्ती आणाणिबन्धणं जादा जीअ लोअस्स । (१)

तम । सस्मितस्नेहाक्षं परिष्वज्य । अयि वत्से ! एवमात्मा स्तूयते । *

सीता । सलज्जमधोमुखी स्वगतं । परिहसिदम्हि भअव दीए तमसाए । (२)

वास । महानयं व्यतिकरोऽस्माकं प्रमादः † । गमनं प्रति । पुनर्यथा कार्यहानिर्न भवति तथास्ताम् ।

सीता । पडिकूला दाणिं मे वासन्ती संवुत्ता । (३)

तम । वत्से ! एहि गच्छावः ।

---

(१) धन्या सा, या आर्यपुत्रेण बहुमन्यते, याच आर्यपुत्रं विनोदयन्ती आज्ञानिबन्धनं जाता जीवलोकस्य । तत्रापि तावदित्यादि पूर्वोक्तरामवाक्ये तत्रापि नाधिकान्तरे इत्यर्थभ्रमेण निर्विण्णायाः सीतायावचनमिदम् । आज्ञानिबन्धनमिति भूपतिप्रणयास्पदत्वेन सर्वेषामुपकारत्वमत्वादिति भावः ।

(२) परिहसितास्मि भगवत्या तमसया ।

(३) प्रतिकूलेदानीं मे वासन्ती संवृत्ता । प्रतिकूलेति रामस्य गमनानुमतिरूपाप्रियकर्मकारित्वादिति भावः ।

---

* आत्मा स्तूयतइति स्वप्रतिकृतेरेव चक्षुर्विनोदनाधारतया रामेणोक्तत्वादिति भावः ।

† अयमस्माकं व्यतिकरः सम्यक्कः महान् प्रमादः भवतोमनोदौर्बल्यजनकः अस्मद्दर्शनेनैव सीतायाः स्मरणादिति भावः ।

Digitized by Google

सीता । कष्टम् । एवं करेच्छ । (१)

तम । कथमेवा गम्यते, यस्यास्तव ।

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।
मर्म्मच्छेदपरैर्यत्नैराकर्षोन समाप्यते ॥ *

सीता । णमोणमो अकिदपुण्णजणादंसणीआणं अज्जउत्त चरणकमलाणं । (२)

इति मूर्च्छति ।

तम । वत्से ! समाश्वसिहि समाश्वसिहि ।

सीता । समाश्वस्य । किअच्चिरं वा मेहन्तरेण पुण्णिमा चन्दस्स दंसणं । (३)

तम । अहो संविधानकम् † ।

---

(१) एवं कुर्म्मः ।

(२) नमोनमोऽकृतपुण्यजनादर्शनीयानामार्य्यपुत्रचरणकमलानाम् ।

(३) कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम् । मेघान्तरेण मेघावकाशेन ।

---

* मर्म्मच्छेदपरैर्मर्म्मपीडाकरैरत्यधिकैरपीत्यर्थः । आकर्षः आकर्षणं खस्मिन्नानयनमित्यर्थः, न समाप्यत इत्यत्र हेतुगर्भविशेषणमाह तृष्णादीर्घस्येति दीर्घस्य सूत्रादेराकर्षणं हि झटिति समाप्यं न भवति । समाप्यत इत्यत्र निरुध्यत पाठेन मनोरमः ।

† अहो संविधानकम् आश्चर्यं सम्यग्विधिविलसितं विधिवशेन भावानां विभिन्नरूपत्वमाश्चर्यमित्यर्थः, एतदेव दर्शयति एकोरसइति ।

Digitized by Google

एकोरसः करुणएव निमित्तभेदा
द्भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान् ।
आवर्त्तबुद्बुदतरङ्गमयान् विकारा
नम्भोयथा,सलिलमेवतु तत्समग्रम् ॥ *

रामः । अयि विमानराज इतस्ततः ।

इति सर्व्वे उत्तिष्ठन्ति ।

तमसावासन्थौ सीतारामौ प्रति ।

---

* एक इत्यादि करुणः करुणविप्रलम्भरतिरेकैवेत्यर्थः सच निमित्तभेदात् तत्तदुद्दीपनभेदात् भिन्नः भिन्नइव प्रतीयमानः सन् पृथक्पृथगिव भिन्नभिन्नानिव, परस्परं वैपरीत्येन वर्त्तन्तइति विवर्त्ता रत्नत्तद्व्यभिचारिणः तान् आश्रयन्ते स्वपोषकत्वेन प्राप्नुवन्ति, तत्तदुद्दीपनोद्बोधिततत्तद्व्यभिचारिसंसर्गेण एकोऽपि करुणविप्रलम्भोभिन्नभिन्नतया प्रतीयतेइति निर्गलितोऽर्थः । तथाहि सीतायाः मरुज्जेव दारुणाए इत्यादौ विषादः,ताएवावादीअदीत्यादावुग्रादः निरवधित्तीत्यादौ दैन्यं, वज्जमसाविदक्षीत्यादौ मतिः, गच्छदिज्जेवेत्यादावौत्सुक्यं, प्पसीद खमामेत्तमित्यादौ हर्षः, उक्खाणिदमित्यादौ धृतिः,धम्मासेत्यादावीर्ष्या,परिहसिदक्षीत्यादौ लज्जा, पडिऊलेत्यादावसूया, णमोणमइत्यादौ निर्व्वेदः, एवमेतैर्व्यभिचारिभिः पृथक् पृथक् संयुक्ततया करुणविप्रलम्भः पृथक् पृथगिव प्रतीयते वस्तुतस्त्वेकएवेत्यर्थः । दृष्टान्तेनेदं द्रढयति आवर्त्तेत्यादि । आवर्त्ताभ्रमिः बुद्बुदोविम्बं । सलिलमेवेति प्रक्रमभङ्गः सोढव्यः कवीनां निरङ्कुशत्वात् ।

Digitized by Google

अवनिरमरसिन्धुः सार्द्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता ।
यश्च मुनिरनुयातारुन्धतीको वशिष्ठ
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय ॥ *

इति निष्क्रान्ताः सर्व्वे ।

इति कथानाम तृतीयोऽङ्कः ।

---

* आद्यः कुलपतिः सूर्य्यः । छन्दसां वेदानां । भद्रं सौभाग्य जनकमदृष्टं । मङ्गलाय उत्तरकालीनसौभाग्याय । त्वयीति संप्र दानत्वाविवक्षया अधिकरणत्वविवक्षया सप्तमी ।

Digitized by Google

अथ चतुर्थोऽङ्कः ।

ततः प्रविशतस्तापसौ ।

एकः । सौधातके ! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतोवाल्मीकेराश्रमपदस्य । *

तथाहि ।

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादप्यधिकं तपोवनमृगः पर्य्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतोभक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्फीर्य्यते ॥ †

---

* भूयिष्ठमविरलं सन्निधापिताः संनिवेशिता अतिथिजना यत्र तस्य । समधिकोय आरम्भः अतिथिपरिचर्य्यायै पाकादि क्रियोद्योगस्तेन रमणीयता ।

† सद्यःप्रसूता तद्दिनजातप्रसवा या प्रिया मृगी । पुंवन्नप्रिया दाविति पुंवद्भावनिषेधः । तया पीतान्मण्डादधिकमवशिष्टं नीवारौदनमण्डं पाकमुष्णादग्निसंतप्तमितिशेषः पर्य्याप्तं प्रकाम माचामति पिबति । तथा सर्पिष्मतः सघृतस्य भक्तस्यान्नस्य स्फुरता गन्धेन मनागनुसृतः किञ्चिन्मिश्रितः कर्कन्धूफलमिश्रशाकपचना मोदः बदरफलसहितवास्तूकादिशाकपाकगन्धः परिस्फीर्य्यते सर्व्वतः प्रसरति ।

Digitized by Google

सौधा । आअदं अणज्जआअकारणं सविसेसभूदं अज्ज जिणकुचाणं । (१)

प्रथमः । विहस्स । अपूर्व्वः कोऽपि ते वञ्चमानहेतुर्गुरुषु सौधातके ! *

सौधा । भो भाण्डाअण किं णामधेओ एसो महन्तस्स त्थविरसत्थस्स धुरन्धरो अज्ज अदिधी आअदो । (२)

भाण्डायनः । धिक् प्रहसनं † । नन्वयमृष्यशृङ्गाश्रमाद-रुन्धतीपुरस्कृतान् महाराजदशरथस्य द्वारानधिष्ठाय भगवान् वशिष्ठः प्राप्तस्तत्किमेवं प्रलपसि ।

सौधा । ङं वसिट्ठो । (३)

भाण्डा । अथ किम् ।

सौधा । मए उण जाणिदं, वग्घो वा विग्घो वा एसोत्ति (४)

---

(१) आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्चानाम् । अद्य जीर्णकूर्चानां पक्वश्मश्रूणां वृद्धानामित्यर्थः आगतमागमनं, भावे क्तः उद्देश्यपदमिदं । सविशेषभूतं विशेषेण अनध्यायकारणं जातमिति शेषः ।

(२) भो भाण्डायन किं नामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्यातिथिरागतः । स्थविरसार्थस्य वृद्धसमूहस्य धुरन्धरः प्रधानम् ।

(३) ङं वशिष्ठः ।

(४) मया पुनर्ज्ञातं, व्याघ्रो वा वृको वा एष इति ।

---

* अपूर्व्व इति सोल्लुण्ठनोक्तिः । वञ्चमानहेतुः सम्मानसूचकः वाक्प्रयोग इति शेषः । वञ्चमान इत्येव पाठः सम्यक् ।

† धिक् प्रहसनं गुरून् प्रत्युपहसनं धिक् निन्दितमित्यर्थः ।

Digitized by Google

भाण्डा । आः किमुक्तं भवति ?।

सौधा । तेण परावडिदेणज्जेव सा वराइआ कल्लाणिआ मड्मडाइदा । (१)

भाण्डा । समांसोमधुपर्कदत्यावाचं वऊमन्यमानाः मो-त्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः, तं हि धर्म्मसूत्रकाराः समामनन्ति ।

सौधा । भो णिग्गिहीदोसि । (२)

भाण्डा । कथमिव ।

सौधा । जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विस-सिदा, अज्जज्जेव पच्चागदस्स राएसिणो जणअस्स भअवदा वम्मीएणवि दहिमड्हिं ज्जेव णिव्वत्तिदो मधुवक्को, वच्छदरी उण विसज्जिदा । (३)

---

(१) तेन परापतितेनैव सा वराकिका कल्याणिका मड्मडा-यिता । परापतितेनैव समागतेनैव । वराकिका दीना । कल्या-णिका गौः वत्सतरीत्यर्थः । कल्याणी माषपर्णी गौरिति राजनि-र्घण्टः । कल्लोडिआ इति पाठस्तु न मनोरमः । मड्मडायिता सश-ब्दं भक्षिता ।

(२) भो निग्रहीतोऽसि । स्वमतं संस्थापयितुमशक्नुवन् धिक्कृ तोऽसीत्यर्थः ।

(३) येन आगतेषु वशिष्ठमिश्रेषु वत्सतरी विसर्जिता, अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिनापि दधिमधुभिरेव निर्व्वर्त्तितो मधुपर्कः । वत्सतरी पुनर्विसर्জ्जिता । दधिमधुभिरिति तथाच मधुपर्कप्रस्तावे आश्वलायनः दधिमधुनी सर्पिर्मध्वज्यानि इति ।

Digitized by Google

भाण्डा। अनिवृत्तमांसानामेवं कल्प * मृषयोमन्यन्ते, निवृत्तमांसस्तु तत्रभवान् जनकः।

सौधा। किं णिमित्तं। (१)

भाण्डा। स तदेव देव्याः सीताया रक्षाहरणं दैवदुर्विपाकमुपश्रुत्य वैखानसः † संवृत्तः, तथास्य कतिपये संवत्सरा ‡ अत्र दीपतपोवने तपस्यतो यमानस्य।

सौधा। तदो किंत्ति आअदो। (२)

भाण्डा। चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम्।

सौधा। अवि अज्ज सम्बन्धिणीहिं समं संवुत्तं से दंसणं णवत्ति। (३)

भाण्डा। संप्रत्येव भगवता वसिष्ठेन देव्याः कौशल्यायाः सकाशं भगवत्यरुन्धती प्रहिता, यत्तस्यामुपेत्य वैदेहोद्रष्टव्य इति वक्तुम्।

सौधा। जधा एदे त्तविरा परप्परमिलिदा, तधा अ-

---

(१) किं निमित्तम्।

(२) ततः किमित्यागतः।

(३) अप्यद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं नवेति। सम्बन्धिनीभिर्वैवाहिकसम्बन्धवतीभिः कौशल्यादिभिः। दर्शनं दर्शनपूर्वकसंलापः।

---

* एवं कल्पं समांसमधुपर्कविधिम्।

† वैखानसोवानप्रस्थः।

‡ कतिपये द्वादश संवत्सराः अतीताइति शेषः।

Digitized by Google

ज्जीवि वटुकेहिं समं मिलिअ अणज्झायमहूसवं खेलन्ता सम्भावेम । (१)

इति परिक्रामतः ।

भाण्डा । तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतसवह्निष्ठावुपास्य संप्रत्याश्रमवहिर्दृक्षमूलमधितिष्ठति, य एषः ।

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसुप्तदहनोज्वलन्निव वनस्पतिः । *

इति निष्क्रान्तौ । विष्कम्भकः ।

ततः प्रविशति जनकः ।

जन । अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नवइव चिरेणापि हि न मे
निकृन्तन्मर्माणि क्रकचइव मन्युर्विरमति ॥ †

कष्टमेवं नाम जरसा दुःखेन च दुरासदेन भूयः पराक-

(१) यथा एते स्थविराः परस्परमिलिताः, तथा वयमपि वटुकैः समं मिलित्वा अनध्यायमहोत्सवं खेलन्तः सम्भावयामः । सम्भावयामो मानयामः ।

* नित्यानुषक्तेन सदासन्निहितेन । ज्वलन् शोकमनुभवन् वनस्पतिः अग्नीदृक्षइव ।

† अपत्ये कन्यायां । दुरितं वने परित्यागरूपमनिष्टं । विषक्तोजनितः । पटुस्तीक्ष्णः । धारावाही अविच्छेदमनुभूयमानः । चिरेणापि अतिपूर्वमुत्पन्नोऽपि नवइव नूतनत्वेन प्रतीयमानः । मन्युः शोकः ।

Digitized by Google

शान्तपनप्रभृतिभिक्षपोभिरात्तरसधातुरनुपयुज्यमानो * नाद्यापि मे दग्धदेहः पतति, अन्धतामिस्रा ह्यसूर्य्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते † य आत्मघातिन इत्येवमृषयो मन्यन्ते, अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनास्पष्ट निर्भासः प्रत्यग्रइव ‡ दारुणोन मे दुःखसंवेगः प्रम्लायति। अयि मातर्दैवयजनसम्भवे देवि सीते! ईदृग्रसे निर्म्माणभागः परिणतः, येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते § हाहा पुचि!

अनिघतरुदितस्मितं विराजत्
कतिपयकोमलदन्तकुड्मलाग्रम्।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जुजल्पितं ते॥

---

* आत्तोगृहीतः शोषित इत्यर्थः रसरूपधातुर्यत्र सः अनुपयुज्यमानः प्रक्षयत्यापाराच्चमः।

† ननु दुःखाधारं देहं स्वयं कथं न त्यजसीत्याशङ्क्याह अन्धतामिस्राइत्यादि। तेभ्यस्तानुद्दिश्य। प्रतिविधीयन्ते तत्यागप्रतीकाराय निर्दिश्यन्ते।

‡ प्रतिक्षणं परिभावनया चिन्तया स्पष्टः प्रस्फुटोनिर्भासः स्फुरणं यस्य सः अतएव प्रत्यग्रइव नूतनइव।

§ निर्म्मीयते यदिति निर्म्माणं शरीरं तस्य भागोभाग्यं शरीरारम्भकमदृष्टमित्यर्थः ईदृग्रसे परिणतः परिणामेऽयशःप्रतिपादनेनातिदुःखदोजातः। लज्जया पतिपरित्यागेन दुश्चरितां शङ्क्यमानेभ्यो लोकेभ्यस्तया, स्वच्छन्दमाक्रन्दितुं दीर्घस्वरं रोदितुम्। शक्यतइतिभावप्रयोगः।

Digitized by Google

भगवति वसुन्धरे ! स्वयमतिदुष्करासि ।
त्वं वज्रिर्मुनयो वयमिष्टगृहिणी गङ्गाच यस्याविदु
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती, प्रष्टुं गताया: पुर *
स्तस्यास्तं दुहितुस्तथा विसृजनं किं दारुणेऽस्यथाः ॥ †

नेपथ्ये । दूतदूतो भगवतीमहादेव्यौ ।

जनकः । दृष्ट्वा अये गृष्टिनो ‡ पदिश्यमानमार्गा भगवत्यरुन्धती । उत्थाय । कां पुनर्भगवतीत्याह । निरूप्य । आ कथं महाराजदशरथस्य धर्मपत्नी मित्रसखी मे कौशल्या, क एवं प्रत्येति सैवेयमिति ।

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेववा किमुपमानपदेन, सैषा ।
कष्टं वतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूत,महो विपाकः ॥ §

अयमपरप्रायो ¶ दशाविपर्य्यासः ।

---

* सुष्टिं गताया: पुरः इत्यत्र तद्वत्तुया दैवतमिति क्वचित्पाठः तत्र तद्वत् वज्रादयइव या सीता दैवतं देवतेत्यर्थः ।

† विसृजनं विनाशनमतिदुःखदानमित्यर्थः । असूत्यथाः सोढवती । परित्यागसमये किमिति रामं न न्यवारय इत्यर्थः ।

‡ गृष्टिना गृष्टिनामकेन दशरथस्य कञ्चुकिना ।

§ उपमानपदेन उपमावाचकयथाशब्दप्रयोगेन, कष्टं वते त्यतिखेदे । दुःखात्मकं दुःखभोगवज्रसमत्वं किमपि भूतं पिशाचशरीरवती जातेत्यन्वयः । विपाकः प्रारब्धपरिणामः ।

¶ अपरप्रायोऽन्यइव ।

Digitized by Google

यएव मे जनः पूर्व्वमासीन्मूर्त्तोमहोत्सवः।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥

ततः प्रविश्यात्यरन्धती कौशल्या कञ्चुकी च।

अरु। ननु ब्रवीमि, द्रष्टव्यः स्वयमुपेत्य वैदेह इत्येष वः कुलगुरोरादेशः, अतएवाहं प्रेषिता, ततः कोऽयं पदे पदे महानध्यवसायः *।

कञ्चु। देवि! संस्तभ्यात्मानम्, अनुरुध्यस्व भगवतो वशिष्ठस्यादेशमिति विज्ञापयामि।

कौश। ईदिसे काले मिथिलाधिवो दट्ठव्वोत्ति समं ज्जेव सव्वाइं दुक्खाइं समुब्भवन्ति, ण सक्कणोमि उव्वत्तमाण-मूलबन्धणं हिअअं अवत्थाविदुं (१)

अरु। अत्र कः सन्देहः।

सन्तानवाहीन्यपि † मानुषाणां दुःखानि सद्बन्धुवियोगजानि।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संस्रवन्ते ‡॥

---

(१) ईदृशे काले मिथिलाधिपोद्रष्टव्य इति समसमेव सर्व्वाणि दुःखानि समुद्भवन्ति। न शक्नोमि उद्वर्त्तमानमूलबन्धनं हृदय-मवस्थापयितुम्। उद्वर्त्तमानमूलबन्धनमधैर्य्यविसंष्ठुलम्।

---

* महानध्यवसाय इति समस्तमेकपदं, स्वयं गमने अत्यन्तानि-श्चय इत्यर्थः।

† सन्तानवाहीन्यपि धारावाहिकतया प्रवृत्तान्यपि सततम-नुभूयमानान्यपीत्यर्थः।

‡ स्रोतःसहस्रैरसंख्यैर्मुखैरिव संस्रवन्ते समन्तात्सरन्ति बहुलीभवन्तीत्यर्थः।

Digitized by Google

कौश० । कधं वच्छाए वहूए एवं गदे तस्स राएसिणो मुहं दंसअम्ह । (१)

अरु० । एष वः श्लाघ्यसम्बन्धी * जनकानां कुलोदयः ।
याज्ञवल्क्योमुनिर्यस्मै ब्रह्मपारायणं † जगौ ॥

कौश० । एसो मो महाराअस्स हिअआणन्दो वच्छाए वहूए पिदा राएसी, हद्दी हद्दी सम्भाविदम्हि अनुट्ठिदम्हूसवे दिअहे । हा देव्व सव्वं ज्जेव तं णत्थि । (२)

जनकः । उपसृत्य । भगवत्यरुन्धति ! वैदेहः सीरध्वजोऽभिवादयते ।

यथा पूतमन्योनिधिरपि पवित्रस्य महसः
पतिस्ते पूर्व्वेषामपि खलु गुरूणां गुरुतमः ।

---

(१) कथं वत्साया वध्वा एवं गते तस्य राजर्षेर्मुखं दर्शयामः एवं गते दैवदुर्विपाके भूते । राजर्षेरिति प्रयोज्यकर्म्मणि सम्बन्धविवक्षायां षष्ठी । मुखं खमुखम् ।

(२) एष स महाराजस्य हृदयानन्दोवत्साया वध्वाः पिता राजर्षिः । हा धिक् हा धिक् सम्भावितास्मि अनुष्ठितमहोत्सवे दिवसे, हा दैव ! सर्व्वमेव तन्नास्ति । महाराजस्य दशरथस्य । सम्भावितास्मि अनेनागत्य सम्मानितास्मि । सर्व्वमेव महाराजो वधूमहोत्सवञ्च ।

---

* श्लाघ्यसम्बन्धो प्रशंसनीयवैवाहिकसम्बन्धवान् ।

† ब्रह्मणः पारः स्वरूपाधिगमः तस्यायनं प्राप्तिर्यतस्तत् वेदान्तभागमित्यर्थः जगौ अध्यापयामास ।

Digitized by Google

त्रिलोकीमङ्कस्थामवनितलक्लोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव * वन्दे भगवतीम् ॥

अह । परं ज्योति † स्ते प्रकाशताम्, अयं स त्वां पुनातु देवः परोरजा ‡ यएष तपति ।

जन । आर्य्ये वृष्टे ! अपि कुशलमस्याः प्रजापालस्य मातुः ।

कञ्चु । निर्व्विशेषमतिनिष्ठुरमुपालब्धाः स्मः, § राजर्षे ! अनेनैव मन्युना अचिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां नार्हसि त्वं दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि दैवदुर्न्नियोगः कोऽपि, यत् किल समन्तात्प्रवृत्तवीभत्सकिंवदन्तीकाः ¶ पौरजानपदा नाम्निपरिग्रहद्विमनस्यल्पकाः ** प्रतिपद्यन्ते इत्यतोदारुणमनुष्ठितम् ।

---

* देवीमित्यस्य पूर्व्वं तामिति योज्यं पूर्व्ववाक्ये यये ति श्रवणात् उषसमिव प्रभातसन्ध्यामिव, सा हि सर्व्वैर्वन्द्यते ।

† परं ज्योतिर्ब्रह्म ।

‡ देवः सूर्य्यः परोरजा रजसः परः प्रकाशकत्वात् विशुद्धसत्वमूर्त्तिरित्यर्थः । निपातनसिद्धोऽयं प्रयोगः ।

§ निर्व्विशेषं सर्व्वप्रकारेण, अत्र निरवशेषमिति पाठः सम्यक् संपूर्णमित्यर्थः । अतिनिष्ठुरमिति प्रजापालस्य मातुरित्युक्त्या क्रोधप्रकाशनादितिभावः, स्नेहपूर्व्वककुशलानुप्रश्नेहि रामभद्रस्य मातुरिति, प्रियसख्या इतिवाभिदध्यादिति वोध्यम् । उपालब्धाक्षिरस्कृताः ।

¶ समन्तात् प्रवृत्ता वीभत्सा गर्हिता सीतापवादविषयिका किंवदन्ती येभ्यस्ते ।

** अल्पकाः क्षुद्राः ।

Digitized by Google

जन। आः कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने, कष्टमेवंवादिना जनेन रामपरिभूता अपि वयं पुनः परिभूयामहे।

अरु। एवमेतत्, अग्निरिति वत्सां प्रति परिलघून्यक्षराणि, सीतेत्येव * पर्य्याप्तम्। हा वत्से!

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं दृढयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतो
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः † ॥

कौश। अम्मो उम्मीलन्ति वेअणाओ। (१)

इति मूर्च्छति।

जन। हा कष्टं किमेतत्।

अरु। राजर्षे! किमन्यत्।

स राजा ‡ तत्सौख्यं स च शिशुजन, § स्नेच दिवसाः,
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।

---

(१) अम्म उन्मीलन्ति वेदनाः। अम्मेति दुःसहे। विस्मये दुःसहेऽप्यम्मोनित्यं स्त्रीभिः प्रयुज्यत इति भरतः।

---

* सीतेत्येवेति विशुद्धिमत्स्त्रीविशेषे सीताशब्दस्य रूढत्वादितिभावः।

† स्त्रैणं स्त्रीत्वम्। लिङ्गं पुंस्त्वादिकम्।

‡ सराजा दशरथः स्वाधीनः स्वामीतिशेषः।

§ शिशुजनः वालिका वधूः सीता।

Digitized by Google

विपाके घोरेऽस्मिन्नथ * खलु विमूढा तव सखी,
पुरश्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥
जन । कष्टं कष्टं, सर्व्वथा नृशंसोऽस्मि, यश्चिरस्य दृष्टान्
प्रियसुहृदः प्रियदारान् न स्निग्धं पश्यामि ।
स सम्बन्धी ग्राह्यः, प्रियसुहृदसौ, तच्च हृदयं,
सचानन्दः, साक्षादपिच निखिलं जीवितपदम् ।
शरीरं, जीवोवा, यदधिकमितो वा प्रियतरं
महाराजः श्रीमान् किमिव मम नासीद्दशरथः † ॥
कष्टमियमेव सा कौशल्या ।
यदस्याः पत्युर्ब्बा रहसि परमं दूषितमभू
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू
दलम्बा तत् स्मृत्वा दहति यदवस्कन्द्य हृदयम् ‡ ॥
अहं । हा कष्टमतिचिरनिरुद्धनिश्वासनिष्ठुरं § हृदयमस्याः ।

---

* अथ स्मरणानन्तरम् ।

† तच्च दशरथ इत्यर्थः हृदयं हृदयविश्रामस्थानं, तच्चेति विधेयाधीनत्वात् नपुंसकं । आनन्दः आनन्दजनकः, जीवितपदं जीवनस्य स्वास्थ्यकरस्थानं । जीवितफलमिति पाठे दशरथएव मम जीवनपरिग्रहस्य फलरूपतया परिणत इत्यर्थः । शरीरं जीवोवेति प्रेक्षा शरीरयोर्जीवनयोस्ताभिन्नत्वादितिभावः । इतस्ताभ्यां यदधिकं प्रियतरं वस्तु यदि स्यादिति शेषः तदा तदपि दशरथएवेत्यर्थः ।

‡ दूषितं दोषः । उपालम्भविषयः दोषविज्ञापनस्थानं । अवस्कन्द्य आक्रम्य ।

§ अतिचिरनिरुद्धेन निश्वासेन निष्ठुरं व्याकुलं । निष्ठुरमित्यत्र निश्वसमिति क्वचित्पाठः ।

Digitized by Google

जन । हा प्रियसखि! इति कमण्डलूदकेन सिञ्चति ।

कञ्चु । सुहृदिव प्रकटय्य सुखप्रदां
प्रथममेकरसा * मनुकूलताम् ।
पुनरकाण्डविवर्त्तनदारुणः प्रवि-
श्चिनष्टि विधि † र्मनसोरुजम् ॥

कौश । संज्ञां लब्धा । हा वच्छे जाणदु कहिंसि, सुमरामि दे विआहलच्छीपरिग्गहेक्कमण्डणं प्पप्फुरन्तसुद्धहसिदमुद्धमुहपुण्डरीअं, आप्फुरन्तकोमुदचन्दचन्दिआसुन्दरेहिं अङ्गेहिं उल्लासेहि, जादे पुणोवि उज्जोएहि उच्छङ्गं, सव्वदा महाराओ भणादि, एसा रघुकुलमहत्तराणं वहू, अम्हाणं उण जणअसम्बन्धेण दुहिदिआ ज्जेव । (१)

---

(१) हा वत्से जानकि ! कुत्रासि, स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमण्डनं प्रस्फुरच्छुद्धहसितमुग्धमुखपुण्डरीकम्, आस्फुरत् कौमुदचन्द्रचन्द्रिकासुन्दरैरङ्गैरुल्लासय, जाते पुनरप्युद्योतयोत्सङ्गं, सर्व्वदा महाराजो भणति, एषा रघुकुलमहत्तराणां वधूः, अस्माकं पुनर्जनकसम्बन्धेन दुहितैव । विवाहलक्ष्मीर्विवाहसंस्कार जनितशोभा तस्याः परिग्रहएव एकमद्वितीयं मण्डनं यस्य तत् । आसम्यक् स्फुरन् यः कौमुदस्य कार्त्तिकमासस्य चन्द्रस्य या चन्द्रिका तद्वत्सुन्दरैः कोमलैः । उद्योतय शोभय । भणति ब्रूते । जनकसम्बन्धेन मित्रस्य जनकस्य सम्पर्केण मित्रदुहितात्वं दुहितैवेत्यर्थः ।

---

* एकरसां स्थिराम् ।

† प्रविश्चिनष्टि अतितरां वर्द्धयति । विधिर्दैवम् ।

Digitized by Google

कञ्चु । यथाह देवी ।

पञ्चप्रसूतेरपि राज्ञ आसीत् प्रियोविशेषेण सुवाऽग्रजन्मा * ।
वधूचतुष्केऽपि यथैव ज्ञान्ता प्रिया तनूजास्य तथैव सीता ॥

जन । हा प्रियसख महाराज दशरथ ! एवमसि सर्व्वप्रकारहृदयङ्गमः कथं विस्मर्य्यसे ।

कन्यायाः किल पूजयन्ति पितरोजामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि ।
त्वं कालेन तथाविधोऽप्यपहृतः सम्बन्धबीजन्तु तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् † ॥

कौञ्च । जादे जाणदु किं करेमि दिढ़वज्जलेवघड़िअ-वन्धणिच्चलं ज्जेव हदजीविदं मं मन्दभाइणीं ण परिच्चअदि । (१)

अरु । आश्वसिहि राजपुत्रि ! वाष्पविश्रामोऽप्यन्तराले कर्त्तव्यएव, अन्यच्च किं न स्मरसि, यदवोचदृष्यशृङ्गआश्रमे युष्माकं कुलगुरु,स्तदुपजातमेव, किन्तु कल्याणोदर्कं ‡ भविष्यति ।

(१) जाते जानकि ! किं करोमि दृढवज्रलेपघटितबन्धनिश्चलमेव हृतजीवितं मां मन्दभागिनीं न परित्यजति । किं करोमीती जीवनापगमएव त्वद्विरहदुःखप्रतीकारोपायः किन्तु स मम न घटते इत्यर्थ ।

* पञ्चप्रसूतेः प्राप्तां कन्यां रामादींश्चतुरः पुत्रांश्च जनितवतः । सुवाऽग्रजन्मा रामः ।

† सम्बन्धबीजं वैवाहिकसम्बन्धनिदानं जीवितं धिगित्यन्वयः ।

‡ कल्याणोदर्कं शुभोत्तरफलम् ।

Digitized by Google

कौश० । भगवति ! अतिक्रान्तो मनोरथो । (१)

अरु० । तत् किं मन्यसे राजपुत्रि ! सुखोद्यं तदिति, नहीदं सुखक्रियेऽन्यथा मन्तव्यं, भवितव्यमेव तेन ।

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयोऽभूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषण्णा
नैते वाचं विसृतां व्याहरन्ति ॥ *

नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।

जन० । अद्य खलु ग्रिष्टानध्याय † दत्युद्धुतं खेलतां वटूनां कलकलः ।

कौश० । सुलहसोक्खं दाव बालत्तणं भोदि । (२)

निरूप्य । अम्हे ! एदाणं मज्झे को एसो रामभद्दलच्छीसरिसेहिं सावट्ठम्भमुद्धखलिदेहिं अङ्गेहिं अम्हाणं वि लोअणाइं सीअलावेदि । (३)

(१) भगवति ! अतिक्रान्तो मनोरथः । अतिक्रान्तोऽतीतः मनोरागमित्यतीत्यर्थः ।

(२) सुलभसौख्यं तावद्बालत्वं भवति ।

(३) अहो एतेषां मध्ये कश्च रामभद्रलक्ष्मीसदृशैः सावष्टम्भमुग्धस्खलितैरङ्गैरस्माकमपि लोचनानि प्रीतयति । सावष्टम्भानि सबलानि मुग्धानि मनोज्ञानि स्खलितानि कोमलानिच तैः ।

* आविर्भूतज्योतिषां सम्भातब्रह्मसाक्षात्काराणाम् । व्याहारा वचनानि । विसृतां मृषार्थां । विसृतां व्याहरन्तीत्यत्र विसृतार्थां वदन्तीति क्वचित्पाठः ।

† ग्रिष्टानध्यायः ग्रिष्टजनागमनादनध्यायः । तथाच मनुः अनध्यायेऽध्यमाने समवाये जनस्य चेति ।

Digitized by Google

अह। अपवार्य सहर्षोत्कण्ठं सगतम। इदं नाम तद्भागीरथीनिवेदितरहस्यं कर्णामृतं,* नत्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति।

जन। कुवलयदलश्यामस्निग्धः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियैव समाजयन्।†
पुनरिव शिशुर्भूत्वा वत्सः सने रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम्॥‡

कञ्चु। नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये।

जन। एवमेव, तथाहि।

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मश्लोकपवित्रलाञ्छनमुरोधत्ते त्वचं रौरवीम्।

---

* भागीरथ्या निवेदितं वाल्मीकौ समर्पितं रहस्यं सीतादारकद्वयरूपं गोप्यं वस्तु। कर्णामृतं कर्णसुखजनकसीतातनयेतिशब्दप्रतिपाद्यं। यद्वा भागीरथ्या निवेदितं मां प्रत्युक्तं रहस्यं कुशलवजन्मरूपगूढवृत्तान्तोयत्र तत् कर्णामृतं कर्णसुखदभागीरथीवचनविषयः।

† समाजयन् पूजयन् शोभयन्नित्यर्थः

‡ अमृताञ्जनम् अमृतमयाञ्जनसंसर्गजनितसुखम्।

§ चूडाचुम्बिताश्चूडापर्यन्तमुच्छ्रिताः कङ्कपत्रा बाणायत्र तादृशं तूणीद्वयं पृष्ठतः पृष्ठस्य अभितः उभयतः पार्श्वद्वये इत्यर्थः, तथा भस्मश्लोकानि भस्मविन्दव एव पवित्रं लाञ्छनं यस्य तत् उरोवृत्तः। श्लोकस्थाने श्लोमेति क्वचित्पाठः। तथा रुरुमृगविशेषः तत्सम्बन्धिनीं त्वचं। तथा मौर्व्या मूर्वातन्तुनिर्मितया मेखलया नियन्त्रितं सम्बद्धं माञ्जिष्ठिकं मञ्जिष्ठया रञ्जितं अधोवासः परिधानवस्त्रञ्च,

Digitized by Google

मौर्व्या मेखलया नियन्त्रितमधोवासस्य माञ्जिष्ठिकं
पाणौ कार्म्मुकमञ्जसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ ६

भगवत्यरुन्धति! विमुग्धेयमे कुतस्योऽयमिति।

अरु। अद्यैव वयमप्यागताः।

जन। आर्य्ये गृष्टे! अतीव मे कौतुकं वर्त्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ, इमञ्च बालकं ब्रूहि, केऽप्येते प्रवयसस्त्वां दिदृक्षव इति।

कञ्चु। यदाज्ञापयसीति निष्क्रान्तः।

कौश। किं भणध, एवं भणितो आगमिस्सदित्ति (१)

---

(१) किं भणथ, एवं भणित आगमिष्यतीति। भणथ इत्यत्र मन्यध्व इति पाठः सम्यक् मन्यध्वे इति सं।

धत्ते इत्यस्य सर्व्वत्रान्वयः। किञ्चास्य पाणौ कार्म्मुकं धनुः। अञ्जसूत्रस्य जपमालाया वलयं वेष्टनं, अञ्जसूत्रस्य वलयं यत्रेति कार्म्मुकविशेषणं वा। अपर इति चार्थे, पैप्पल आश्वत्थोदण्डस्य अस्त्रीति शेषः। दण्डं तथा पैप्पलमिति पाठे तु कार्म्मुकादिकं सर्व्वमेव कर्म्मपदं धत्ते इत्यनेनान्वेति। अत्र तूपकार्म्मुकयोर्धारणं क्षत्रियमात्रचिह्नं। भस्मरक्तवस्त्राञ्जसूत्रधारणञ्च ब्रह्मचारिमात्रचिह्नं। रौरवत्वगादिकधारणन्तु क्षत्रियब्रह्मचारिचिह्नं। यथाह मनुः। कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिण इति। क्षत्रियस्यतु मौर्व्वी ज्या इतिच। पैप्पलदण्डोऽपि क्षत्रियब्रह्मचारिणएव यथाह गौतमः वैल्वपालाशौ ब्राह्मणस्य दण्डावाश्वत्थपैलवौ शेषे इति शेषे क्षत्रिये, मनुनातु क्षत्रियब्रह्मचारिणां वटखदिरदण्डयोर्विधानादिकल्पोवोध्यः शाखिभेदविषयो वा यथा क्षत्रियेवाटखादिराविति।

Digitized by Google

अर० । भिद्येत किं सहृत्तमीदृशस्य निर्माणस्य ।

कौश० । निरूप्य । कथं सविणअं णिसामिदग्गिट्ठिवअणो विसज्जिदहरिदारओ दहोऽहिमुहं पसरिदोज्जेव सो-वच्छो । (१)

जन० । चिरं निर्वर्ण्य । भोः किमप्येतत् ।

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्याच्ञो न पुनरविदग्धैरतिशयः ।
मनोमे सम्मोहः स्थिरमपि हरत्येव बलवा
नयोधातुं यद्वत् परिलघुरयस्कान्तशकलः ॥ *

प्रविश्य । लवः । स्वगतम् । अज्ञातनामक्रमाभिजनान् पू-ज्यानपि नः स्वतः कथमभिवादयिष्ये † । विचिन्त्य । अयं पुन रविरुद्धः प्रकारइति वृद्धेभ्यः श्रूयते । सविनयमुपसृत्य । एष वो लवस्य प्रणामपर्य्यायः ।

अरुन्धतीजनकौ । कल्याणिन्नायुष्मान् भूयाः ।

कौश० । तात मे चिरं जीव । (२)

---

(१) कथं सविनयं निशामितगृहिवचनो विसर्जितहरिदारक इतोऽभिमुखं प्रसृतएव सवत्सः ।

(२) तात मे चिरञ्जीव ।

---

* विनयेन शिशुतयाच यन्मौग्ध्यं मनोज्ञत्वं तेन मसृणः श्लो-भमानः महिम्नामतिशय एतस्मिन् दृश्यते इत्यन्वयः । सम्मोहोहर्ष आद्यं, स्थिरमपि तत्त्वनिश्चयमपि । हरत्याहरतीति ।

† अज्ञातानि नामानि क्रमोवन्दनयोर्व्यापर्य्यम् अभिजनः कु-लञ्च येषां तान् । स्वतः स्वयं स्वबुद्धितो वा ।

Digitized by Google

अरु । एहि वत्स । इति लवमुत्सङ्गे कृत्वा स्वगतं । दिष्ट्या न केवलमुत्सङ्गस्थिरामस्पर्शो मे संपूर्णः ।

कौश । जाद इदोवि दाव एहि । उत्सङ्गे कृत्वा । अय्य हे ण केवलं दरविकसन्तणीलुप्पलसामलुच्चदेण देहबन्धेण कवलिदारविन्दकेसरकसायकण्ठकलहंसणिग्घोसघग्घरणिणाददीहरदीहरेण सरेण अ रामभद्दमणुहरदि, णं कठिणकमलगब्भपक्खलो सरीरप्फंसोवि तादिसोज्जेव वच्छस्स, जाद पेक्खामि दाव दे मुहं । चिवुकमुन्नमय्य निरूपय च सवाष्पाकूतं । राएसि ! किं ण पेक्खसि, णिउणं णिरूविज्जमाणं से मुहं वच्छाए वच्छए मुहचन्देण संवददिज्जेव । (१)

अन । पश्यामि सखि पश्यामि ।

---

(१) जात इतोऽपि तावदेहि । अहो न केवलं दरविकसन्नीलोत्पलश्यामलेनतेन देहबन्धेन कवलितारविन्दकेसरकषाय कण्ठकलहंसनिर्घोषघर्घरनिनाददीर्घदीर्घेण स्वरेणच रामभद्र मनुहरति, ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृशएव वत्सस्य । जात ! पश्यामि तावत्ते मुखं । राजर्षे ! किं न पश्यसि, निपुणं निरूप्यमाणमस्य मुखं वत्साया वध्वा मुखचन्द्रेण संवदत्येव । कवलितेन भक्षितेन अरविन्दकेसरेण कषायोरक्तः सुश्राव्यशब्दो वा कण्ठोयस्य तादृशोयः कलहंसस्तस्य, निर्घोषोमेघध्वनि स्तद्वद्घर्घरो योनिनादस्तद्वद्दीर्घदीर्घेणातिदीर्घेण । अनुहरति अनुकरोति । कठिनस्य परिणतस्य कठिनोवा कमलस्य गर्भोमध्यं तस्येव पक्ष्मलः मृदुलः । ईदृशएव स्पर्शो वीरायामिति भावः । संवदति सदृशीभवति ।

Digitized by Google

कौश । अम्मो उम्मत्तीभूदं विअ मे हिअअं किम्पि एदस्स मुहं विप्पलहदि । (१)

जन । निरूप्य ।

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संपूर्णं प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः सएव सहजः पुण्यानुभावोऽप्यसौ,
हाहा दैव, किमुत्पथैर्मम मनः पारिप्लवं धावति ॥ *

कौश । अत्थि दे मादा, सुमरसि वा तादं । (२)

लवः । नहि नहि ।

कौश । तदो कस्स तुमं । (३)

लवः । भगवतोवाल्मीकेः ।

कौश । अह जाद कधिदव्वं कधेहि । (४)

लवः । एतावदेव जानामि ।

---

(१) अम्बो उन्मत्तीभूतमिव मे हृदयं, किमप्येतस्य मुखं विप्रलभते। किमपि सीतामुखसादृश्यविग्निष्टं । विप्रलभते प्रतार्यति एतन्मुखेन प्रतार्यमाणं सत् मम हृदयमुन्मत्तं भवतीत्यर्थः ।

(२) अस्ति ते माता, स्मरसि वा तातम् ।

(३) ततः कस्य त्वम् ।

(४) अयि जात कथयितव्यं कथय ।

---

* सैवाकृतिर्मूर्त्तिरस्मिन् शिशौ प्रतिबिम्बिता छायारूपेण प्रतिफलितेव अभिव्यज्यते लक्ष्यते । एवं द्युतिप्रभृतिष्वन्वयोबोध्यः । पुण्यानुभावः पवित्रप्रभावः । उत्पथैः कुमार्गैः सीतापुत्रोऽयमिति कुतर्कवर्त्मभिरित्यर्थः । पारिप्लवं चञ्चलं सत् ।

Digitized by Google

नेपथ्ये । भोः भोः सैनिकाः, एष खलु कुमारश्चन्द्रकेतु राज्ञापयति, न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति ।

अरुन्धतीजनकौ । अये मेध्यास्वरचाप्रसङ्गादुपागतोवत्स चन्द्रकेतुरद्य द्रष्टव्यदृत्यहो सुदिवसः ।

कौश । वच्छलक्खणस्स पुत्तको आणवेदित्ति अमिअविन्दुसुन्दराइं अक्खराइं सुणीअन्ति । (१)

लवः । आर्य्य ! कएष चन्द्रकेतुर्नाम ।

जन । जानासि रामलक्ष्मणौ दाशरथी ।

लवः । एतावेव रामायणकथापुरुषौ ? । *

जन । अथ किम् ।

लवः । तौ कथं न जानामि ।

जन । तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः ।

लवः । उर्म्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।

अरु । विहस्य । आविष्कृतं कथाप्रावीण्यं वत्सेन ।

जन । विचिन्त्य । यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत् पृच्छाम, स्वेषां दाशरथ्यात्मजानां किं नामधेयापत्यानि कषु केषु दारेषु प्रसूतानि ।

लवः । नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्व्वः ।

---

(१) वत्स लक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतविन्दुसुन्दराण्यक्षराणि श्रूयन्ते ।

---

* रामायणकथायाः पुरुषौ प्रधानपुरुषौ नायकतत्सहचरावित्यर्थः ।

Digitized by Google

जन । किं न प्रणीतएव कविना ।

लवः । प्रणीतोनतु प्रकाशितः । तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः, तच्च स्वहस्तलिखितं मुनिर्भगवान् व्यासजङ्घरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य । *

जन । किमर्थम् ।

लवः । स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति ।

जन । तत्सर्व्वमस्माकमिदमाकूतकरम् । †

लवः । महती पुनस्तस्मिन् भगवतो वाल्मीकेराख्या, केषाञ्चिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम् । तेषामानुयात्रिक ‡ श्चापपाणिरप्रमादार्थं § मस्माङ्त्राता प्रेषितः ।

कौश । जाद भादावि दे अत्थि । (१)

लवः । अस्त्यार्य्यः कुशोनाम ।

---

(१) जात भ्रातापि ते अस्ति ।

---

* सन्दर्भान्तरेण अन्यप्रबन्धेन । रसवान् करुणाद्भुतशृङ्गारव्यञ्जकः । अभिनेयार्थः नटचेष्टया प्रकाशनीयवस्तुः । तौर्य्यत्रिकसूत्रकारस्य नाट्यसूत्रकारस्य ।

† आकूतकरमौत्सुक्यवर्द्धकं । किमर्थमेवं कृतमिति ज्ञानाय वयमत्युत्सुका जाता इत्यर्थः ।

‡ आनुयात्रिकोऽनुचरः ।

§ अप्रमादार्थं सावधानत्वाय कथञ्चित्प्रकाशयन्नायेति भावः ।

Digitized by Google

कौश । ज्येष्ठेत्ति भणिदं भोदि । (१)

लवः । एवमेतत, प्रसवक्रमेण सर्वकल ज्यायान् इति ।

जन । किं यमजावायुष्मन्तौ ।

लवः । अथ किम ।

जन । कथय कथाप्रबन्धस्य कीदृशः पर्य्यन्तः ।

लवः । अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्व्वासितां देवयज्ञमसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति ।

कौश । हा वच्छे मुद्धचन्दमुहि ! कोदाणिं दे कुसुमभूदस्स अरीरस्स देव्वदुव्विलासपरिणामो एकल्लिआए णिव्वत्तिदो । (२)

जन । हा वत्से !

नूनं त्वया परिभवञ्च नवञ्च घोरं *
ताञ्च व्यथां प्रसवकालजनामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
संत्यक्तया शरणमित्यसकृत स्मृतोऽस्मि † ॥

---

(१) ज्येष्ठ इति भणितं भवति । आर्य्यशब्दप्रयोगादिति शेषः ।

(२) हा वत्से मुग्धचन्द्रमुखि ! का इदानीन्ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणामएकाकिन्या निर्वर्तितः । काः कीदृशः । एकाकिनीस्थाने एकल्लिआ इति देशी ।

---

* परिभवं परित्यागरूपमवमानं, नवं कदाप्यननुभूतं, घोरं भयम् ।

† शरणमिति रक्षको भवत्विति कृत्वा अस्मरन्नसकृत् स्मृत इत्यन्वयः ।

Digitized by Google

लवः। अहन्यतां प्रति। आर्ये! कावेतौ।

अरु। दृयं कौशल्या, अयं जनकः।

लवः। सवक्रमानखेदकौतुकं पश्यति।

जन। अहो दुर्मर्य्यादता दुरात्मनां घोराणाम्, अहो रामस्य राज्ञः क्षिप्रकारिता।

एतद्दैन्यघोरवज्रपतनं प्रत्यन्मनोत्पश्यतः
क्रोधस्य ज्वलितुं धगित्यवसरस्तापेन शापेन वा॥ *

कौश। भअवदि! परित्ताहि परित्ताहि, पसादेहि कुविदं राएसिं। (१)

अरु। एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।
राजन्नपत्यं रामस्ते पाह्यास्य कृपणाः प्रजाः। †

(१) भगवति! परित्रायस्व परित्रायस्व, प्रसादय कुपितं राजर्षिम्।

* एतत् सीतानिष्कं वैन्यसमत्यादितरूपं घोरं दुःसहं वज्रपतनमुत्पश्यतश्चिन्तयतोमम क्रोधस्य चापेन धनुर्धारणेन शापेन अभिशापप्रदानेन वा धगिति श्रुत्वा ज्वलितुमवसरः समयोऽयमित्यन्वयः।

† हि यतः परिभूतानामवमानितानां मनस्विनां मानिनामेतत् शापशापान्यतरकरणकं प्रायश्चित्तं परिभवकं दण्डकरणम् न्याय्यमिति शेषः, प्रकृतेतु प्रजारञ्जनार्थमेव तादृशमनुष्ठितवतो रामस्य न परिभवकर्तृत्वमितिभावः। दण्डवत् प्रायश्चित्तानि भवन्तीतिस्मृतेर्दण्डप्रायश्चित्तयोस्तुल्यार्थता। यद्वा परिभूतानां मनस्विनां चित्तं मनः प्राय एतत् एवं परिभवकर्तृषु क्रोधाधायकं भवतीत्यर्थः, प्रकृतेतु नैतद्युक्तमित्याह राजन्नित्यादि पुत्रा दीनाश्च

Digitized by Google

जन । शान्तम्बा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरोजनः ॥ *

प्रविश्य सम्भ्रान्ता वटवः । कुमार ! अश्वोऽश्व इति पशु-समाम्नायिकः † कोऽपि भूतविशेषोजनपदेषु श्रूयते, सोऽय-मस्माभिरधुना स्वयं प्रत्यक्षीकृतः ।

लवः । अश्वोऽश्वदूति तत्र पशुसमाम्नाये सांग्रामिकेच ‡ पठ्यते, तद्ब्रूत कीदृशः ।

वटवः । श्रूयताम् ।

पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्किरति शकृत्पिण्डकानाश्रमान्तान् §
किं वा ख्याते,व्रजति स पुनर्दूर,मेह्येहि यामः ॥

इत्युपसृत्याजिने हस्तयोराकर्षन्ति ।

कृतापराधा अपि अनुग्राह्या एवेतिभावः । परिभूतानां परिभूत वतां, कर्म्माविवक्षया अकर्म्मकत्वात् कर्त्तरि क्तः । प्रायश्चित्तं मन-स्विपरिभवजनितपापक्षयसाधनं कर्म्मेति वा ।

* वेति पक्षान्तरे तदुभयं चापशब्दकरणकप्रायश्चित्तं रघु-नन्दने शान्तं माखित्यर्थः यतस्तत् पुत्रभाण्डं, भाण्डं मूलधनं, पुत्रः भाण्डमिवेति पुरुषव्याघ्रवत् कर्म्मधारयः । तदिति विधेयविशेष-णत्वात् क्लीवत्वं । तथा पौरोजनश्च भूयिष्ठा अधिका द्विजा ब्राह्म-णा बाला वृद्धा विकला आतुराः स्त्रैणानि स्त्रीछन्दानि च यत्र तादृशः अनुकम्पनीय इति शेषः ।

† पशुसमाम्नायिकः पशुशास्त्रपठितः ।

‡ सांग्रामिके युद्धशास्त्रे ।

§ आश्रमान्तान् अपक्वामाकारान् शकृत्पिण्डकान् मलखण्डान् ।

Digitized by Google

लवः । सकौतुकोपरोधविनयम् । आर्य्याः ! पश्यत पश्यत, एभिर्नीतोऽस्मीति, त्वरितं परिक्रामति ।

अरुन्धतीजनकौ । पूरयतु कुतूहलं वत्सः ।

कौश । भअवदि ! जाणामि, एदं अणालोअन्ती ण जीआमि विअ, अदो अणदो भविअ पेक्खच्छ दाव गच्छमाणं दीहाउं । (१)

अरु । अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ।

प्रविश्य कञ्चुकी । भगवान् वाल्मीकिराह ज्ञातव्यमेतद्वत्सरे भवद्भिरिति ।

जन । अतिगम्भीर * मेतत्, किमपि भविष्यति । भगवत्यरुन्धति ! सखि कौशल्ये ! आर्य्ये वृष्टे ! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्याम इति । निष्क्रान्तो वृद्धवर्गः ।

वटवः । पश्यतु हि कुमारस्तदाश्वर्य्यम् ।

लवः । दृष्टमवगतञ्च । नूनमाश्वमेधिकोऽयमश्व इति ।

वटवः । कथं ज्ञायते ।

लवः । ननु मूर्खाः ! पठितमेव युष्माभिस्तत्काण्डे, † किं न पश्यथ, प्रत्येकं शतसंख्याः ‡ कवचिनो दण्डिनो निषङ्गिणश्च

---

(१) भगवति ! जानामि, एतमनालोकयन्ती न जीवामीव, अतोऽन्यतोभूत्वा पश्यामस्तावद्गच्छन्तं दीर्घायुषम् ।

---

* अतिगम्भीरं गुरुतरम् ।

† तत्काण्डे यज्ञप्रकरणे ।

‡ शतसंख्या इति शतं न्यूनसंख्याव्यावृत्त्यर्थं, वीरभूयिष्ठप्रदेशे शतादिका अप्यश्वरक्षकाः कवचिप्रभृतयो नियुज्यन्ते इति ।

Digitized by Google

रक्षितार, सत्प्रायमेवेदमपि दृश्यते, यदीह न प्रत्ययस्तद्गत्वा पृच्छत ।

वटवः । भोभोः किंप्रयोजनोऽयमश्वः परिवृतः पर्य्यटति ।

लवः । सत्यमात्मगतम् । अये! अश्वमेध इति विश्वविजयिनां क्षत्रियाणामूर्ज्जस्वलः सर्व्वक्षत्रियपरिभावी महोत्कर्षनिकषः । *

नेपथ्ये । अयमश्वः पताकेयमथवा वीरघोषणा । †
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥

लवः । सत्यमिव । अहो सन्दीपनान्यक्षराणि । ‡

वटवः । किमुच्यते, प्राज्ञः खलु कुमारः । §

लवः । भोभोः तत्किमक्षत्रिया पृथ्वी ? यदेवमुद्धतमुद्घोष्यते ।

नेपथ्ये । अरे ! महाराजं प्रति कुतः क्षत्रियाः ।

लवः । धिग्जाल्मान् ।

---

* उत्कर्षस्य निकषः परीक्षास्थानम् ।

† अथवेति नायमश्वः नेयं पताका च, किन्तु मूर्त्तिमती वीरघोषणा सर्व्वपरिभावि वीरत्वख्यापनम् ।

‡ सन्दीपनानि श्रोतृवीराणां क्रोधसंधुक्षणानि ।

§ किमुच्यते इति किंप्रयोजनोऽयमश्वइतिप्रश्नस्योत्तरतया अयमश्वइत्यादि यदेभिरुच्यते तस्य तात्पर्य्यं परिकषधितुमग्रतोवय मित्यर्थः । प्राज्ञ इति कुमारोलवः खलु प्राज्ञः, मन्ये एवएवास्य सात्पर्य्यमवगतवानिति भावः ।

Digitized by Google

यदि ते सन्ति सन्त्येव, केयमन्या विभीषिका ।
किमुक्तैः, शरसम्बाधां पताकां वोहराम्यहम् ॥ *

भोभोवटवः! परिवृत्य लोष्टैरभिन्नलोचयतैनमश्वम्, एष रोहितानां मध्येवराकश्चरतु । †

प्रविश्य सक्रोधदर्पः पुरुषः । धिक् चापलं, किमुक्तवानसि, तीक्ष्णनीरसात्मायुधीयश्रेण्यः ‡ क्षत्रियैरपि न क्षन्तुं वाचमनुसहन्ते, राजपुत्रस्यन्दकेतुराजदृष्टशरासनः, सोऽयपूर्व्वारण्यदर्शनकौतूहलाक्षिप्तहृदयो न परापतत्यद्यापि, तत्त्वरितमपसर्पतानेन तरुगहनेन ।

वटवः । कुमार! श्रुतमनेनाश्वेन, तर्ज्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेण्यः, दूरे चाश्रमपदमित, त्वदेहि हरिणप्लुतैः § पलायामहे ।

---

* सन्तीति अतिवीराइति शेषः । अन्या अपरा अप्राकृतिकीत्यर्थः इयं विभीषिका भयप्रदर्शना का, अत्र न वयं विभीम इति भावः । किमुक्तैरिति अनाप्तवेत्यूह्यम् अथवा उक्तैर्वचनैः किं, वचनैरसूयाप्रकाशो न वीराणां युज्यतइति भावः । तर्हि किं, करिष्यथेत्याह शरसम्बाधामिति शरैर्मदीयवाणैः सम्यग्बाधा रन्ध्रव्याघातो यस्यास्तादृशीं कृत्वा वोयुष्माकं पताकां हरामि, शरसम्बाधां शरवेष्टितामपीति वा ।

† रोहितानां हरिणानाम् । वराको जघन्यः ।

‡ तीक्ष्णाः क्रोधाध्माता नीरसाः केष्वपि प्रणयमननुबन्धानाच्च आयुधीयश्रेण्यः आयुधेन व्यवहरन्तीत्यायुधीयास्तेषां श्रेण्यः अस्माकं शस्त्रिवर्गाः ।

§ हरिणप्लुतैश्चकितहरिणवत् सत्वरम्बाधावनैः ।

Digitized by Google

लवः । किं नाम * विस्फुरन्ति ग्रस्त्राणि । धनुरारोपयन् ।

ज्याजिह्मया वलयितोत्कटकोटिदंष्ट्र
मुद्गारि घोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र
जृम्भाविडम्बिविकटोदरमस्तु चापम् ॥ †

इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।

॥ इति कौशल्याजनकयोगोनाम चतुर्थोऽङ्कः ॥

---

* किं नामेति स्पर्द्धायाम् ।

† ज्या मौर्व्वी जिह्मेवेति तया वलयिते सम्बद्धे उत्कटे कोटी अग्रभागादंष्ट्रे दृढदन्ताविव यत्र तत् । तथा घोरः घनुभयदो घनस्येव घर्घरोयोद्घोषस्तमुद्गारि उद्गारयिष्यत्, गमादित्वाद्गुविष्यति णिन्, भविष्यद्गिनोर्णिनितिकर्म्मणि षष्ठ्यभावः । ग्रासप्रसक्तं जगद्ग्रासायोद्यतं तथा हसत् अट्टहासं कुर्व्वत् यदन्तकस्य वक्त्रं तदेव यन्त्रं तस्य या स्तम्भा व्यादानं तद्विडम्बि तत्सदृशं विकट मुदरमन्तराले यस्य तादृशमस्तु युद्धाय सज्जं भवत्वित्यर्थः ।

Digitized by Google

अथ पञ्चमोऽङ्कः ।

नेपथ्ये । भोभोः सैनिकाः ! जातं जातमवलम्बनमस्माकं ।

नम्बेष त्वरितसुमन्त्रनुद्यमान-
व्यावल्गत्प्रजवनवाजिना रथेन ।
उद्घातप्रचलितकोविदारकेतुः
श्रुत्वा नः प्रधनमुपैति चन्द्रकेतुः ॥ *

ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साम्रुतहर्षसम्भ्रमश्चन्द्रकेतुः ।

चन्द्र । आर्य्य सुमन्त्र ! पश्य ।

मुनिजनशिशूरेकः सर्व्वतः सैन्यकाये
नवइव रघुवंशस्याप्रसिद्धः प्ररोहः ।
दलितकरिकपोलग्रन्थि टङ्कारघोरं
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ †

---

* उद्घातेन निम्नोन्नतरथ्यायां रथस्य प्रतिघातेन प्रचलितः कोविदारो युगपत्रकवृक्षः तन्निर्मितः केतूरथवंशोयस्य सः । प्रधनं युद्धं । श्रुत्वा नः प्रधनमुपैति चन्द्रकेतुरित्यत्र संप्राप्तः सपदि कुमारचन्द्रकेतुरिति क्वचित्पाठः ।

† सर्व्वतश्चतुर्दिक्षु सैन्यानां काये देहेषु जात्याश्रयत्वादेकवचनं, दलितः करिणां कपोलग्रन्थिर्येन तत् तथा टङ्कारेण वेगजनितटमितिशब्देन घोरं भयदं तथा ज्वलितश्च शरसहस्रं यस्य सः । सैन्यकाये इति समस्तघटकज्वलितेतिक्रियाया अधिकरणं । रघोर्वंशोऽन्वय एव वंशोवेणुस्तस्य अप्रसिद्धः अपरिचितः प्ररोहः करीरइव ।

Digitized by Google

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री
रविरतगुणगुञ्जत्कोटिघ्न कार्मुकेण ।
समरशिरसि चञ्चत्पञ्चचूड * सृमूना
मुपरि शरतुषारं † कोऽयं वीरघातः ॥

आश्चर्यमाश्चर्यम् ।

सुमन्त्र । आयुष्मन् !

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तवैव तुल्यरूपम् ।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं ‡ स्मरामि ॥

चन्द्र । इमन्येकमुद्दिश्य भूयसामारम्भइति हृदयमपच-पते ।

अयं हि शिशुरेककः समररेणुभूरिस्फुरत्
करालकरकन्दलीकलितशस्त्रजालैर्बलैः ।
क्वणत्कनककिङ्किणीरणितरञ्जितस्यन्दनै
रमन्दमदद्दुर्दिनद्विरदवारिदैरावृतः ॥ §

---

* चञ्चन्ती चञ्चला पञ्चा विस्तृता चूडा यस्य सः । पञ्चेति पचिविस्तारे इत्यस्य रूपं । चञ्चच्चूड इति पाठस्तु न मनोरमः ।

† शरतुषारमिति शराणामाघातत्रासजनकत्वेनाहिंसत्वात्तुषारसाम्यम् ।

‡ कुशिकसुतो विश्वामित्रस्तस्य मखद्विषां यज्ञविघातकानां राक्षसानां प्रमाथे नाशे धृतायुधं रघुनन्दनं रामम् ।

§ अयमेककः शिशुर्बलैर्मदीयसैन्यसमूहैरावृतइत्यन्वयः । किम्भूतैः समररेणुषु समररेणुभिर्भूरि स्फुरन्ति तथा करालाभिर्भयदाभिः करकन्दलीभिः करपल्लवैः कलितानि गृहीतानि च

सुम । वत्स ! एभिः समस्तैरपि किमस्य, किं पुनरेभिः ।

चन्द्र । आर्य ! लभ्यतामनेन हि महानाश्रितजनप्रमाणोऽस्माकमारम्भः । तथाहि ।

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराघातमुज्जृम्भयन् ।
वेल्लद्भैरवभूरिरुण्डनिकरैर्वीरोविधत्ते भुव
स्तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥ *

सुम । खगतं । कथमीदृशेन सह वत्सचन्द्रकेतोर्द्वन्द्वसंप्रहारमनुजानीयाम् । विचिन्त्य । अथवा दृष्टाकुतूहलवृद्धाः खलु वयं, प्रत्युपस्थिते च का मतिः ।

भ्रष्टज्ञानानि येषां तैः । कलितेत्यत्र जटिलेवि क्वचित्पाठः । तथा क्षरन्तीभिः कनककिङ्किणीभिर्भासमाधिताः स्यन्दनाः येषां तैः । तथा अमन्दानामधिकानां मदानां दानजलानां दुर्दिनं वर्षं यतस्तादृशा द्विरदा हस्तिनोवारिदाइव वे येषां तैः ।

* वीरो लवः भुवोरङ्गभूमीः वेल्लन्तश्चलन्तो भैरवाभयङ्करा भूरयोऽनेका ये रुण्डाः कवन्धास्तेषां निकरैः समूहैः कृत्वा तृप्यन् अतिभोजनेन तृप्तिं गच्छन् यः कालोयमस्तस्य करालं भीमं यद्वक्त्रं तस्य विघसैर्भोजनावशिष्टैर्व्याकीर्य्यमाणाइव विधत्ते इत्यन्वयः, कवन्धाः कालवक्त्रविघसाइवेत्युत्प्रेक्षा । वीरः किम्भूतः आगुञ्जन्तोगर्ज्जन्तोये गिरिकुञ्जकुञ्जरा गिरिकुञ्जस्थहस्तिनस्तेषां घटा समूहस्तस्या विस्तीर्णः समुत्पन्नः कर्णज्वरः कर्णसन्तापो यत्तं । आगुञ्जदित्यत्र आगर्जदित्येव क्वचित्पाठः । तथा अमन्दा अत्यधिका दुन्दुभीनां मदीयसैन्यवाद्यविशेषाणां रवैराघातं प्रवर्षीकृतं ज्याघोषमुज्जृम्भयन् उच्चैः प्रकाशयन् ।

Digitized by Google

चन्द्र । सविस्मयलज्जासम्भ्रमं । धिक् प्रतिनिवृत्तानि सर्व्वतः सैन्यानि मम ।

सुम । रथवेगमभिनीय । आयुष्मन् सएष वाग्विषयीकृतस्ते प्रवीरः ।

चन्द्र । विस्मृतिमभिनीय । आर्य्य ! किं तन्नामधेयमाख्यातमाकायकैः ? * ।

सुम । वत्स ! लव इति ।

चन्द्र । भोभो लव महावाहो ! किमेभिस्तव सैनिकैः ।

एषोऽहमेहि मामेव, तेजस्तेजसि शाम्यतु ॥ †

सुम । कुमार ! पश्य पश्य ।

व्यपवर्त्तत एष वालवीरः पृतनानिर्मथनात् त्वयोपनूतः ।

स्तनयित्नुरवादिभावलीनामवमर्द्दादिव दृप्तसिंहशावः ॥

ततः प्रविशति त्वरितोद्धतपराक्रमोलवः ।

लवः । साधु राजपुत्र ! साधु, सत्य ‡ मैक्ष्वाकः खल्वसि, तदयं परागतएवास्मि ।

नेपथ्ये महान् कलकलः ।

लवः । सावेगं परावृत्य । कथमिदानीं भग्नाश्रपि प्रतिनिवृत्य युद्धाभिसारिणः पर्य्यवष्टभ्य § निघ्नन्ति मां चमूपतयः । धिग्जाल्मान् ।

---

* त्वाकायकैर्मामाकातुं गतैः ।

† तेजस्त्वदीयं, तेजसि मदीये, शाम्यतु पराभवं गच्छतु, एषा वीरोक्तिः ।

‡ सत्यमिति अतिबलवतोऽपि मे स्पर्द्धयाज्ञानादिति भावः ।

§ पर्य्यवष्टभ्य निकटीभूय सामर्थ्यमूरीकृत्य वा ।

Digitized by Google

अयं शैलाघातक्षुभितवडवावक्त्रऋतभुक्
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ *

इति परिक्रामति।

चन्द्र। भोभोः कुमार!।

अत्यद्भुतादपि गुणातिशयात् प्रियोऽसि,
तस्मात् सखा त्वमसि, यन्मम तत्त्वमेव।
तत्किं निजे परिजने कदनं † करोषि
नन्वेष दर्पनिकष ‡ स्तव चन्द्रकेतुः ॥

लवः। सहर्षसम्भ्रमं परावृत्य। अहो महानुभावस्य प्रसन्न

---

* अयं समन्तादुत्सर्पन्नुत्तिष्ठन् घनो महान् तुमुलः सङ्कुलः सेनानां कलकलः युद्धोत्साहकृतकोलाहलः, सेनेत्यत्र हेलेति पाठे हेलया निर्भयेन कृतः कलकलः सैन्यानां कोलाहल इत्यर्थः। स प्रलयपवनेनास्फालितः पयोराशेः समुद्रस्यौघः पूरइव शैलानां प्रलयवातेनोन्मूलितमूलं पततां वेलापर्व्वतानामाघातेन तत्कृत जलास्फालनेन क्षुभितोयो वडवावक्त्रऋतभुक् वाडवाग्निरुद्दत्यच-ण्डोयो मे क्रोधस्तस्यार्चिर्निचयः प्रभातिशयः उद्रेकाधिक्यमित्यर्थः। तस्य कवलत्वं ग्रसनीयत्वं व्रजत्वित्यन्वयः। मदीयः क्रोधोयुष्माकं कलकलं क्षणान्नाशयिष्यतीत्यर्थः।

† कदनं पीडाम्।

‡ दर्पनिकषः दर्पस्य परीक्षास्थानम्।

Digitized by Google

कर्कशा वीरवचनप्रसूतिर्विकर्त्तनकुलकुमारस्य * । तत्किमेभिरेनमेव तावत् सम्भावयामि ।

पुनर्नेपथ्ये कलकलः ।

लवः । कष्टमेधनिर्व्वेदं । आः कदर्थितोऽहमेभिर्वारं वारं वीरसंवादविघ्नकारिभिः । †

तदभिमुखं परिक्रामति ।

चन्द्र । आर्य्य ! दृश्यतामेतद्दृष्टव्यम् ।

दर्पेण कौतुकवता ‡ मयि वञ्चुलक्ष्यः
पश्चादलैरनुहतोऽयमुदीर्णधन्वा ।
द्वेधासमुद्धुतमरुत्तरलस्य § धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥

सुम । कुमार एवैनं द्रष्टुमपि ¶ जानाति, वयन्तु केवलं परवन्तो विस्मयेन ।

चन्द्र । भोभो राजानः !

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदातावर्चैकस्मिन् कवचनिचितैर्मेध्यचर्म्मोत्तरीये ।

---

* प्रसन्ना मधुराकुलप्रसूतत्वान्मधुरा, कर्कशा वीरत्वात् कठोरा च । विकर्त्तनकुलकुमारस्य सूर्य्यवंशप्रसूतराजपुत्रस्य ।

† वारंवारं विघ्नकारिभिर्घोषैरिति क्वचित्पाठः । क्वचिच्च वारंवारमिति नास्ति ।

‡ कौतुकवता अस्मदानन्दकरेण ।

§ द्वेधा द्विविधया गत्या समुद्धतेन उत्प्लुतेन महता तरलस्य चञ्चलीकृतस्य ।

¶ द्रष्टुमपीत्यपिना सम्भावयितुञ्च ।

Digitized by Google

कालज्येष्ठैरचरमवयःकाम्यकाये भवद्भि-
र्योऽयं वह्नौ युधि परिकरस्तेन बोधिग,धिगेनान् ॥ *

लवः । कुशोभं । कथमनुकम्पते † नाथः । विचिन्त्य । भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि । इति ध्यानं नाटयति ।

सुम । तत्किमकस्मादस्माकं बले सैन्यघोषाः प्रशाम्यन्ति ?

लवः । पश्याग्नेयमधुना ‡ सप्रगल्भम् ।

सुम । ससम्भ्रमं । वत्स ! मन्ये कुमारेणानेन जृम्भकास्त्रमामन्त्रितम् ।

चन्द्र । अत्र कः सन्देहः ।

व्यतिकरदृढं भीमस्तामसेविद्युतश्च
प्रणिहितमपि चक्षुर्यस्तमुक्तं हिनस्ति ।
अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ §

---

* संख्यातीतैरसंख्यैः । पदातौ पादचारिणि । मेध्यं पवित्रं रौरवमित्यर्थः । चर्मैव उत्तरीयं यस्य तस्मिन् । कालज्येष्ठैर्वयोधिकैः । अचरमेण नवेन वयसा काम्योमनज्ञः कायोयस्य तस्मिन् । परिकर उद्यमः । अस्मानित्यनन्तरं चकारोवोध्यः, वस्तुतस्तु वश्यत्र भो इतिपाठः सम्यक् ।

† अनुकम्पते नामेति सैन्यनिवारणेन चन्द्रकेतोः स्वानुकूल्यकारित्वमभिप्रेत्योक्तम् ।

‡ एनं राजपुत्रम् । अधुनेति जृम्भकास्त्रेणोद्वेजकसैन्यानां स्तम्भितत्वादिति भावः ।

§ इह सैन्यसमूहे । इवेति पाठस्तु न मनोज्ञः । तामसस्तमः

आश्चर्यमाश्चर्यम् ।

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभोजृम्भकै
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पाश्लेषकठोरभैरवमरुद्व्यस्तैरवाकीर्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ *

सम्बन्धी वैद्युतोविद्युत्सम्बन्धी च व्यतिकरः समूहः, प्रक्षिप्तमपि विषयग्रहणायोन्मीलितमपि सैन्यानां चक्षुर्यत्तमुक्तं आदौ-यत्तं पश्चान्मुक्तञ्च कृत्वा हिनस्ति पीडयति तामसवैद्युतव्यतिकरयोः क्षणिकत्वात् क्षणमुत्पद्यमानेन तामसव्यतिकरेण चक्षुर्गोयत्तमुक्तत्वं क्षणञ्च वैद्युतव्यतिकरेण हिंसनमित्यर्थः, अथ चक्षुःपीडनानन्तरं । लिखितमिव चित्रार्पितमिव । जृम्भकाख्यं हि प्रयुज्यमानं प्रथमं तमांस्याविर्भावयति ततस्तेजांसि अनन्तरञ्च विपक्षान् निद्रापरवशान् करोतीति स्वभावः ।

* कल्पं महाप्रलयमाश्लिषन्ति प्रवर्त्तयन्तीति कल्पाश्लेषास्तथा कठोराः खरस्पर्शाः अतएव भैरवा भयङ्करा मरुतोवातास्तैर्व्यस्तैर्विक्षिप्तैः मीलन्तः संघटमानामेघा यत्र तेच मीलद्भिर्मेघैः श्यामलास्तेयर्थः तथा तडिद्भिः कडाराणि पिङ्गलानि कुहराणि गह्वराणि येषां तेचेति विशेषणयोः कर्म्मधारयः । तादृशैर्विन्ध्याद्रेः कूटैः शृङ्गैरिव पातालोदरकुञ्जेषु पुञ्जितान्युपचितानि यानि तमांसि तद्वच्छ्यामैः तथा उत्तप्तं सत् स्फुरत् यदारकूटं पिङ्गलं तद्वत्पिङ्गलं यत् ज्योतिस्तेन ज्वलन्ती दीप्तिः प्रकाशोयेषां तैर्जृम्भकैरस्त्रैर्नभ आकाशमवाकीर्य्यते व्याप्यतइत्यन्वयः । जृम्भकाणां श्यामत्वं ज्वलद्रूपत्वञ्च क्षणभेदान्न विरुद्धम् । अवाकीर्य्यत इत्यत्र परिस्तीर्य्यत इति क्वचित्पाठः । मीलन्मेघेत्यत्र नीलाम्भोदेति पाठेतु कडारशब्दस्य श्यामलार्थत्वं बोध्यम् ।

Digitized by Google

सुम । कुतः पुनरस्य जृम्भकाणामागमः स्यात् ? ।

चन्द्र । भगवतः प्राचेतसादिति मन्यामहे ।

सुम । नास्य व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु । यतः

क्षणाश्वतनयाह्येते क्षणाश्वात् कौशिकं गताः ।
अथ तत्संप्रदायेन * रामभद्रे स्थिता इति ॥

चन्द्र । अपरेऽपि परमोपचीयमानसत्त्वप्रकाशाः स्वयं हि मन्त्रदृशः पश्यन्ति । †

सुम । वत्स ! सावधानोभव, परागतः प्रवीरः ।

कुमारावन्योऽन्यं प्रति । अहो प्रियदर्शनः कुमारः ।

सस्नेहानुरागं निर्वर्ण्य ।

यदृच्छासंवादः किमु, किमु गुणानामतिशयः
पुराणोवा जन्मान्तरनिविड़बन्धः परिचयः ।
निजोवा सम्बन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ ‡

---

* संप्रदायेन शिष्यपारम्पर्येण ।

† परमोपचीयमानसत्त्वप्रकाशाः प्रवृद्धसत्त्वगुणयुताः पश्यन्ति सत्त्वोद्रेकेण द्रष्टुं शक्नुवन्ति ।

‡ यदृच्छासंवादः आकस्मिकसंगतिः किमु दृष्टे एतस्मिन् वीरे मम हृदयम् अवधानमेकाग्रतां रचयति प्रापयति स्नेहप्रवणं करोतीत्यर्थः । एवमन्योऽपि । हृदयमिति प्रयोज्यं कर्म । रचयतीति णिजन्तात्सिजि रूपं । यदृच्छेति हठादुत्पन्नः खलु सम्बन्धो हि मानसमावर्जयति । गुणानां शौर्यसौजन्यादीनाम् । पुराणः प्राचीनः, जन्मान्तरे निविडो दृढोबन्धः सम्बन्धो यत्र तादृशः परिचयो वा । विधिवशाद्दैवविपाकादविदितः । कोऽपि भ्रातृत्वादिर्निजः स्वीयः सम्बन्धोवा ।

Digitized by Google

सुम। भूयसा जीविधर्म्मएषः, यद्रसमयी कस्यचित् क्वचित् प्रीतिः * यत्र लौकिकानामुपचारस्तारामैत्रकं वा चक्रवाक इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति। †

अहेतुः पक्षपातोयस्तस्य नास्ति प्रतिक्रिया।
सहि स्नेहात्मकस्तन्तुरन्तर्म्मीणि सीव्यति॥ ‡

कुमारावन्योऽन्यं प्रति।

---

* भूयसा प्रायेण, जीविधर्म्मः लोकस्वभावः। रसमयी आनन्दसान्द्रा।

† प्रीतिपदार्थः कीदृश इत्याह यत्रेति यत्र यस्मिन् सति लौकिकानां लोकचन्दानामुपचारः सेवा निरभिसन्धिशुश्रूषाप्रवृत्तिरित्यर्थः। उपचारस्तु सेवायामिति हेमचन्द्रः। तथा चक्रवाक इति चक्रवाकरूपं तारामैत्रकंवा भवति। तारामैत्रकमिति मित्रस्य भावो मैत्रकं तारयोः कनीनिकयोर्मैत्रकं मित्रत्वं। तारकाह्वाः कनीनिकेत्यमरः। तत् अप्रतिसंख्येयं निर्न्नक्तुमशक्यम् अनिबन्धनं निर्हेतुकं प्रेमाणमामनन्ति पण्डिताः कथयन्ति।

‡ अनिबन्धनमित्यनेन उपकारादिकारणजन्यः सहेतुकोऽपि प्रेमास्ति तस्य कारणापगमे विनश्वरत्वादपकृष्टत्वं सूचयन् निर्हेतुकं तं प्रशंसति अहेतुरिति पक्षपात आसक्तिः प्रणय इत्यर्थः तस्य प्रतिक्रिया कथमपि निवारणं नास्ति स चिरमेवतिष्ठतीत्यर्थः। नन्वकथञ्चित्कानसविरामादिना तस्यागमसम्भवात् कथं प्रतिक्रिया नास्तीत्युक्तमित्याशङ्क्याह सहीति स्नेहात्मकः स्नेहरूपः सहि स च प्रेमा तन्तुः रज्जुरूपः सन् अन्तर्म्मणि अन्तःकरणरूपजीवग्रन्थानपि सीव्यति सम्बध्नाति एकतां नयतीत्यर्थः अन्तःकरणानामैक्यान्निर्हेतुप्रेमा कदापि न विश्लिष्यतीत्यर्थः।

Digitized by Google

एतस्मिन् मसृणितराजपट्टकान्ते *
मोक्तव्याः कथमिव सायकाः शरीरे ।
यत्प्राप्तौ मम परिरम्भणाभिलाषा
दुन्मीलत्पुलककदम्ब † मङ्गमास्ते ॥
किञ्चाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापिहि तेन किं न विषयो जायेत यस्येदृशः ।
किं वक्ष्यत्यथमेवमद्य विमुखं मामुद्यतेऽप्यायुधे
वीराणां समयोहि दारुणरसः स्नेहक्रमं बाधते ॥ ‡
सुम । स्वं निर्व्वर्ण्य सासमात्मगतम् । हृदय ! किमन्यथा परिकल्पसे । §
मनोरथस्य यद्बीजं ¶ तद्दैवेनादितोहृतम् ।
लताया पूर्व्वलूनाया प्रसूनस्यागमः कुतः ॥ **

---

* मसृणितः प्राग्संस्कृतोराजपट्टोमणिविशेषस्तद्वत्कान्ते सुन्दरे । राजपट्टोविराटज इति त्रिकाण्डशेषः ।

† उन्मीलत् पुलकानां रोमाञ्चानां कदम्बं समूहोयत्र तत् । यद्वा उन्मीलद्भिः पुलकैः कदम्बं कदम्बकुसुममिव ।

‡ आक्रान्तं प्राप्तं प्रकाशितमित्यर्थः कठोरं दुःसहं तेजो-येन ईदृशेऽस्मिन् वीरे गतिः प्रतीकारोपायः । विषयोऽधीनः । स्नेहपरवशस्येत्युद्घाट्टनेवर्त्तस्वेत्याह किं वक्ष्यतीति आयुधे शस्त्रप्रयोगे उद्यते उपक्रान्तेऽपि । एवं स्नेहजडतया विमुखं रणान्निवृत्तम् । समय आचारः ।

§ किमन्यथा परिकल्पसे रामस्य पुत्रोऽयमिति तर्कयसि ।

¶ मनोरथस्य चिराभिलाषविषयस्य रामतनयस्य यद्बीजं सीतारूपकारणम् ।

** प्रसूनस्यागम इत्यत्र फलस्यागमनमिति पाठः सम्यक् ।

Digitized by Google

चन्द्र । अवतरामस्तावदार्य्य सुमन्त्र ! स्यन्दनात् ।

सुम । तत्कस्य हेतोः ।

चन्द्र । यतस्तावदयं वीरपुरुषः पूजितो * भवति, अपिच खल्वार्य्य ! चात्रधर्म्मः परिपालितोभवति, न रथिनः पादचार † मायोधयन्तीति शास्त्रविदः परिभाषन्ते ।

सुम । स्वगतं । कष्टं ‡ वतानुप्रपन्नोऽस्मि ।

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ।
कथम्वाप्यनुजानातु साहसैकरसां क्रियाम् ॥ §

चन्द्र । यदा तातमिश्राश्रपि पितुः प्रियसखं धर्म्मार्थं संग्रयेष्वार्य्यमेव पृच्छन्ति, तत्किमार्य्यौविमृशति ।

सुम । आयुष्मन्नेवं यथाधर्म्ममभिमन्यसे ।

एष सांग्रामिकोन्याय ¶ एष धर्म्मः सनातनः ।
दृप्तं हि रघुसिंहानां वीरचारित्रपङ्क्तिः ॥

चन्द्र । प्रतिरूपं वचनमार्य्यस्य ।

---

* पूजित इति वाहनस्थप्रतिपक्षेण सह युद्धस्य पादचारिण स्तिरस्कारजनकत्वादिति भावः ।

† कोऽयं चात्रधर्म्म इत्याह न रथिन इति । पादचारं पादाभ्यां चारेागमनं यस्य तम् ।

‡ कष्टं संशयम् ।

§ कष्टमेव दर्शयति कथमित्यादि । साहसमविचिन्त्य प्रवृत्तिस्तदेकत्वात् रसोऽनुरागो यत्र तादृशीं क्रियां पादचारितया युद्धकरणम् ।

¶ सांग्रामिकः संग्रामविषयेन्यायः शिष्टव्यवहारः ।

Digitized by Google

इतिहासं पुराणञ्च धर्म्मप्रवचनानिच ।*
भवन्तएव जानन्ति रघूणाञ्च कुलस्थितिम् ॥

सुम । सस्नेहाश्रं परिष्वज्य ।

जातस्य ते पितुरपीन्द्रजितोनिहन्तु
र्वत्सस्य वत्स ! कति नाम † दिनान्यमूनि ।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ‡ ॥

चन्द्र । सकरुणम् ।

अप्रतिष्ठे रघुज्येष्ठे § का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयोनः पितरोऽपरे ¶ ॥

सुम । अहह ! हृदयमर्म्मदारणा ** न्येतानि चन्द्रकेतोर्व चनानि ।

लवः । हन्त ! मिश्रीक्रतोरसक्रमोवर्त्तते !

यथेन्दावानन्दं व्रजति समुपैढे कुमुदिनी
तथैवास्मिन् दृष्टिर्मम, कलहकामः पुनरयम् ।

---

* इतिहासं पुरावृत्तप्रधानप्रबन्धम् । पुराणं सृष्टिसंहारादि प्रधानप्रबन्धम् । धर्म्मप्रवचनानि मन्वादिप्रणीतधर्म्मप्रधाननिबन्धान् ।

† कति नामेति अल्पान्येवेत्यर्थः ।

‡ प्रतिष्ठां वंशसन्तानजनितां ख्यातिम् ।

§ रघुज्येष्ठे रामे अप्रतिष्ठे प्रतिष्ठासम्पादकपुत्ररहिते सति ।

¶ अपरे त्रयः पितरो भरतादयः ।

** हृदयमर्म्मदारणानि हृदयरूपमर्म्मस्थानपीडकानि, दारणानित्यत्र भिदुराणीति क्वचित्पाठः ।

Digitized by Google

झणत्कारक्रूरक्षणितगुणगुञ्जद्धनु
र्धृतप्रेमा वाऊर्विकचविकरालोल्बणरसः * ॥

चन्द्र। अवतरणं रूपयन्। आर्य सावित्रचन्द्रकेतुरभिवादयते।

सुम। अजितं पुण्यमोजस्वि ककुत्स्थस्येव ते महः।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् † ॥

अपिच। देवस्त्वां सविता धिनोतु समरे गोचस्य यस्ते पिता
त्वां मैत्रावरुणोऽपि नन्दतु, गुरुर्यस्ते गुरूणामपि।
ऐन्द्रं वैष्णवमाग्निमार्हतमथो सौपर्णमोजोऽक्षतं
देयादेवच रामलक्ष्मणधनुर्ज्याघोषमन्त्रोजयम् ‡ ॥

---

* समुपोढे उदिते। तथैवानन्दं व्रजति वात्सल्यवती भवतीत्यर्थः। झणत्कारेण क्रूरं क्षणितं यस्य तादृशो योगुणो मौर्व्वी तेन गुञ्जत् सशब्दं यद्धनुस्तत्र धृतं स्थापितं प्रेम येन तादृशो वा ऊर्विकचः सुव्यक्तोविकरालउद्भटउल्बणरसो वीररसो यस्य तादृशो भवति।

† अजितं परैरपराभूतं। पुण्यं पवित्रं सज्जनापीडकमित्यर्थः ओजस्वि अत्यूर्ज्जितं। महोबलमस्विति शेषः। शाश्वतो नित्यो-वराहोदेवः श्रेयसे मङ्गलाय परिकल्पतां सम्पद्यतां श्रेयोविदधात्वित्यर्थः। वराहदेवस्य प्रथमदैत्यहिरण्याक्षजेतृत्वेनादिवीरत्वात् ततश्च श्रेयःप्रार्थनं युज्यते, सूर्य्यवंशानां वराहदेवोपासकत्वादित्यन्ये।

‡ धिनोतु प्रीणयतु। पितेत्यत्र पतिरिति क्वचित्पाठः। मैत्रावरुणोवशिष्ठः मित्रावरुणयोर्यज्ञे पुनरुत्पन्नत्वात्। नन्दतु आनन्दितं करोतु। गुरूणामपि पित्रादीनामपि गुरुराचार्य्यः। अग्निमरुतो-

Digitized by Google

लवः । कुमार ! अतिथिर्हि नाम श्रोभवे रथस्थएव, कृतं कृतमत्यादरेण ।

चन्द्र । तर्हि महाभागोऽयमन्यं रथमलङ्करोतु ।

लवः । आर्य्य ! प्रत्यारोपय रथोपरि राजपुत्रम् ।

सुम । त्वमप्यनुरुध्यतां चन्द्रकेतोर्वचनम् ।

लवः । कोविचारः खेषूपकरणेषु । किन्त्वरण्यमदोवयमनभ्यस्तरथचर्य्याः ।

सुम । जानासि वत्स दर्पसौजन्ययोर्यथोचितमीरयितुम्, यदि पुनरीदृशं त्वामैक्ष्वाकोरामभद्रः पश्येत्तदास्य स्नेहेन हृदयमभिष्यन्देत् ।

लवः । मान्य ! * सुजनः स राजर्षिः श्रूयते ।

सलज्जमिव । †

वयमपि न खल्वेवंप्रायाः क्रतुष्वपि मत्सराः
कदहच गुणैस्तं राजानं न वा वक्ष मन्यते ।
तदपि खलु मे सव्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिल क्षत्राक्षेपप्रचण्डतयाऽकरोत् ‡ ॥

रिदमाभिमारतं । देवताहन्दे सूक्तहविषोरित्युभयत्रदृष्टिः । सौमर्यं गरुडसम्बन्धि । रामलक्ष्मणधनुषोर्ज्याघोषएव मन्द्रः पुष्टिकरो ऋक् सएव जयं देयाद्दातु ।

* मान्येत्यत्र मन्ये इति पाठो न रुचिरः ।

† सलज्जमिवेति सुजनस्य राजर्षेस्तुरङ्गधारणेन यज्ञविघातानौचित्यादिति भावः ।

‡ ननु राज्ञः सुजनत्वज्ञानेऽपि भवान् कथं तदीयक्रतुरङ्गग्रहणेनौद्धत्यमाविष्कारेत्यत्राह वयमपीति एवंप्राया उद्धत

Digitized by Google

चन्द्र । सस्मितं । किन्तु भवतस्तातप्रतापोत्कर्षेऽयमर्षः ।

लवः । अस्त्वमर्षोमाभूद्वा, एतत्तु पृच्छामि, दान्तं * हि राघवं राजानं शृणुमः, सकिल नात्मना दृप्यति † नाथस्य प्रजा ईदृक्षीः ‡ जायन्ते, तत् किमस्य मनुष्या राक्षसीं § वाचं वदन्ति ।

ऋषयोराक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ॥ ¶

इति हस्त तां निन्दन्ति, अथेतरा ** मभिष्टुवन्ति ।

दृप्तयोन तथा क्रतुष्वपि मत्सराः यज्ञेषु द्वेषिणश्च न । भवामोवा वय मन्यान् प्रति तादृशाः रामराजं प्रति तु नैवेत्याह कदाहचेति । तुर क्रमरक्षिणां सत्याहारः अयमस्मः पताकेयमित्यादि वचनमक्षिणश्च लाभामाद्येन निन्दया या प्रगल्भता कर्कशता तया मे विक्षतिं कोपमकरोत् । व्याहार इत्यत्र व्यापार इति पाठस्तु न मनोरमः ।

* दान्तं सहिष्णुं ।

† आत्मना स्वयं न दृप्यति न गर्वं प्रकाशयति ।

‡ ईदृक्षीदृशाः ।

§ मनुष्याः सैनिकाः राक्षसीं राक्षसानामिव परुषां परपीडाकरीमित्यर्थः ।

¶ उन्मत्तादृप्ताश्च राक्षसीं वाचं वदन्तु नत्वितरे इति ऋषयो मन्वादयोवदन्ति, यदाहुः सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् । प्रियञ्च नानृतं ब्रूयादेषधर्मः सनातनइत्यादि । सा राक्षसी वाक् सर्ववैराणां योनिः कारणम् । साहि साच खो कस्य निर्ऋतिरलक्ष्मीः ।

** इतरां सूनृतां ।

Digitized by Google

कामान् दुग्धे, विप्रकर्षत्य * लक्ष्मीं
कीर्त्तिं सूते दुष्कृतं या हिनस्ति।
ताञ्चाधेतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः † ॥

सुम। परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदत्यभिसम्पन्नमार्षेण संस्कारेण। ‡

लवः। यत्पुनश्चन्द्रकेतो वदसि, किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षदुरिति, तत् पृच्छामि, किं व्यवस्थितविषयाः ¶¶ क्षत्रधर्मादिति।

सुम। नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि, तद्विरम्यतामतिप्रसङ्गात् §।

सैनिकानां प्रमाथेन मत्यमोजायितं त्वया।
जामदग्न्यस्य दमने नैवं निर्व्वक्तुमर्हसि ॥ ¶

---

* विप्रकर्षति निवारयति। मातरं जननीं। धेनुं कामगवीमिव। सूनृतां प्रियसत्यार्थाम्।

† आर्षेण संस्कारेण ऋषीणामिव व्युत्पत्त्या अभिसम्पन्नं सम्बद्धं यथा तथा।

‡ व्यवस्थितोव्यवस्थया नियमितः तद्भक्तित्वेनावधारित इत्यर्थः विषयआश्रयो येषां ते। किं रामस्य क्षत्रधर्माः धैर्य्यादय स्तिष्ठन्ति नान्यत्रेत्यर्थः।

§ अतिप्रसङ्गादत्याग्रहात्।

¶ ओजायितमिति ग्रीवादेरभूततद्भावे इत्यनेनायः ओजोऽस्य रसोवाधि सस्येति सस्येतः ततोभावे क्तः ओजस्विनापि त्वया कथञ्चित्सम्पन्नेन सैनिकानां प्रमाथेन हेतुना ओजस्विना जात

Digitized by Google

लवः । सहासम् । आर्य्य जामदग्न्यापि दमनः सराजा, इति कोऽयमुच्चैर्वादः । *

सिद्धं श्लेतदपि वीर्य्यं द्विजानां
वाक्रोर्वीर्य्यं यत्तु तत्क्षत्रियाणाम् ।
अस्त्रत्यागी ब्राह्मणोजामदग्न्य
स्तस्मिन् दान्ते का स्तुतिस्तस्य राज्ञः ॥

चन्द्र । मोघमाथमिव । आर्य्य आर्य्य ! श्रुतमुत्तरोत्तरेण ।

कोऽयेष संप्रति नवः पुरुषावतारो
वीरोन यस्य † भगवान् भृगुनन्दनोऽपि ।
पर्य्याप्तसम्भवनाभयदक्षिणानि ‡
पुण्यानि तातचरितानि च यो न वेद ॥

लवः । कोहि रघुपतेश्चरितं महिमानञ्च न जानाति, यदि नाम § किञ्चिदश्रव्यमस्ति, अथवा शान्तं ।

दृष्ट्वास्ते न विचारणीयचरितास्तिष्ठन्तु, ऊर्द्धं वर्त्तते
सुन्दक्षीदमनेऽप्यखण्डयशसो लोके महान्मोहि ते ।

मिति । न ते स्वाभाविकमोजस्वित्वमतोवीरश्रेष्ठं रामं प्रति कटाक्षनिक्षेपोऽनुचित इत्ययमर्थोऽभूततद्भावविधिनेनाय प्रत्ययेनाश्रयते ।

* उच्चैर्वादः श्लाघावाक्यम् ।

† यस्य न वीरो वीरत्वेन न गण्यः ।

‡ पर्य्याप्ता सम्पन्ना सप्तभुवनानामभयरूपा दक्षिणा यत्रनिर्वृत्तिसम्पादकदेयवस्तु यत्र तानि, यद्वा पर्य्याप्तं प्रभूतं यत्सप्तभुवनानामभयं तत्र दक्षिणानि अनुकूलानि निपुणानि वा ।

§ यदि नामेति किञ्चित्यर्थः ।

Digitized by Google

यानि त्रीण्यकुतोभयान्यपि पदान्यासन् खरारोधने
यद्वा कौशलमिन्द्रसूनुदमने तच्चाप्यभिज्ञो जनः ॥ *

चन्द्र । आस्तातापवादभिन्नमर्य्याद अतिहि नाम प्रगल्भसे ।

लवः । अये मय्येव भ्रुकुटीधरः संवृत्तः ।

सुमं । स्फुरितमनयोः क्रोधेन । तथाहि ।

---

* ऊं वर्त्तत इति सोल्लुण्ठनवादिनां भङ्गी । अत्र किं वर्णयत इति क्वचित्पाठः । सुन्दस्य सुन्दासुरस्य स्त्री ताडका तस्यादमनेऽपि स्त्रीवधेऽपीत्यर्थः । खरारोधने खरराक्षसयुद्धे यानि त्रीणि चापच्छेदनकवचपातनसर्व्वाङ्गवेधनरूपखरक्षतव्यापारत्रयोत्तरवर्त्तीनि, अकुतोभयानि निर्भयानि, सोल्लुण्ठनोक्तिरियं भयातिशयवन्तीत्यर्थः, पदानि व्यवसायाः, पदं व्यवसितित्वाख्यान जयाङ्क्रिवस्तुष्वित्यमरः । चापच्छेदाद्यनन्तरं व्याकुलतया तान्ता खेदा इत्यर्थः । खरक्षतत्वाचापच्छेदादिरूपास्त्रयो व्यापारा वा, एतत्त्रये अकुतोभयानीति न सोल्लुण्ठनं । चापच्छेदादि यथा वा स्त्रीकिये । ततोऽस्य सशरं चापं मुष्टिदेशे महात्मनः । खरश्चिच्छेद रामस्य दर्शयन् हस्तलाघवमिति । ततस्तत्प्रहतं वाणैः खरमुक्तैः सुपर्व्वभिः । पपात कवचं भूमौ रामस्यादित्यवर्च्चसमिति । सरामो वज्रभिर्बाणैः खरकार्म्मुकनिःसृतैः । विद्धोरुधिरसिक्ताङ्गो बभूव रुषितो भृशमिति च । इन्द्रसूनुर्व्वाली तस्य दमने यद्वा यच्च कौशलं सुग्रीवसङ्गते तस्मिन् प्रच्छन्नतया बाणपातनमित्यर्थः । नहि महावीरस्य चापादिकमन्यैश्छेत्तुं शक्यते नवा स प्रच्छन्नोभूत्वा अपरसङ्गतमल्लक्ष्यत्वेन मारयति इत्येतत्सर्व्वं सार्व्वलौकिकं नोद्घाटनीयमित्यर्थः ।

Digitized by Google

चूडामण्डलबन्धनं तरलयत्याकूतजोवेपथुः *
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः । †
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भुवो
स्तम्भक्षोत्कटलाञ्छनस्य कमलक्षोद्वान्तभृङ्गस्य च ॥

कुमारौ । तदितोविमर्दक्षमां भूमिमवतरावः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति कुमारविक्रमोनाम पञ्चमोऽङ्कः ।

---

* आकूतेऽभिप्रायेऽकौषीत्यर्थः तस्माज्जातो वेपथुः कम्पः चूडामण्डलस्य बन्धनं हृदभिहितभावत्वाद्बध्यमानचूडामण्डलमित्यर्थः तरलयति चञ्चलयति । अत्र कोपेनोद्धतधूतकुन्तलत्वं भवः सर्व्वाकूतजोवेपथुरिति क्वचित्पाठः ।

† स्वयं रज्यमाने नेत्रे कोकनदच्छदस्य सदृशे जाते इत्यर्द्धविधेययोर्वैपरीत्येनान्वयोबोध्यः ।

Digitized by Google

अथ षष्ठोऽङ्कः ।

ततः प्रविशति विमानोज्ज्वलं विद्याधरमिथुनम् ।

विद्याधरः । अहो खलनथोर्विकर्त्तनकुलकुमारयोरकाण्डकलहप्रचण्डयोरुद्योतितचात्तलक्ष्मीकाण्डहुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि * ।

तथाहि प्रिये ! पश्य पश्य ।

झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु
र्ध्वनद्गुरुगुणाटनोल्लतकरालकोलाहलम् ।
वितत्य किरतोः शरानविरतस्फुरच्चूडयो
र्विचित्रमभिवर्द्धते भुवनभीममाधोधनम् † ॥

---

* अद्भुतेन विस्मयेन उद्भ्रान्ता निर्व्यापारा देवाश्चासुराश्च येभ्य स्तानि, विक्रान्तेति भावे क्तः, विक्रान्तरूपाणि चरितानि, विक्रान्तेन चरितानि युद्धव्यापारा वा ।

† झणज्झणितानि झणज्झणेति शब्दवन्ति कङ्कणानि धनुर्भूषाविशेषा यत्र, तथा क्वणिताः सशब्दाः किङ्किण्यः क्षुद्रघण्टिका यत्र तानिच तानिचेति विशेषणयोः कर्म्मधारयः । झणज्झणित कङ्कणेत्यत्र रणत्करणझणझणेति क्वचित्पाठः । तथा ध्वनन्नाकर्षणेन शब्दं कुर्व्वन् गुरुरच्छेद्योगुणोमौर्व्वीयस्तादृशे ये अटन्यौ कोट्यौ ताभ्यां लतः करालो भयङ्करः कोलाहलो येन तादृशं धनुर्विततमित्यन्वयः । अविरतस्फुरच्चूडयोः सततचञ्चलशेखरयोः । स्फुरदित्यत्र स्खलदिति क्वचित्पाठः । भुवनभीमं जगतां भयङ्करम् ।

Digitized by Google

विजृम्भितञ्च दिव्यस्य मङ्गलाय द्वयोरपि ।
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुन्दुमाथितम् ॥ *

तत्प्रवर्त्तितामनयोः प्रवीरयोरनवरतमविरललुलितविकचकनकमयकमलकमनीयसंहतिरमरतरुतरुणमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः † ।

विद्याधरो । ता किंत्ति उण अग्गाण्डतण्डविदुद्दण्डतरलिदतडिच्छडाकडारमम्बरं मुत्ति संवुत्तं । (१)

विद्याधरः । तत्किमु खल्वद्य ।

त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः ।
पुटभेदोल्लसल्लोलोहितचक्षुषः ॥ ‡

---

(१) तत्किमिति पुनरकाण्डताण्डवितोद्दण्डतरलिततडिच्छटाकडारमम्बरं झटिति संवृत्तम् । अकाण्डमकस्मात् ताण्डविता नृत्यन्तीव तथा उद्दण्डतरलिता उद्भटचाञ्चल्या या तडिच्छटा विद्युल्लेखा तयेव कडारं कपिलम् ।

---

* स्तनयित्नोर्मेघस्येव दिव्यस्य स्वर्गीयस्य दुन्दुभेरामन्द्रं गम्भीरं दुन्दुमाथितं दुन्दुमेति ध्वनितं विजृम्भितं देवैः प्रवर्त्तितं, णिजन्तात् क्तः । दिव्यस्येत्यत्र दिव्यास्त्रमिति क्वचिच्च विचित्रायेति पाठद्वय मस्त्रदेयम् ।

† व्यविरलेत्यादि कनककमलसुरतरुमुकुलसहितपुष्पवर्षं कर्त्तव्यमित्यर्थः ।

‡ त्वाष्ट्रं विश्वकर्म्मसम्बन्धि यत्तं कुन्दाख्यं तस्य या भ्रमिस्तया भ्रान्तस्य कुन्दयन्त्रोल्लिखितस्येत्यर्थः मार्त्तण्डस्य सूर्य्यस्येव ज्योतिषा उज्ज्वल उद्दीप्तः, पुटभेदो जगद्दाहायोन्मीलनम् ।

Digitized by Google

विचिन्त्य । अयं ज्ञातं, वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निच्छटासम्पातः । संप्रति हि,

अवदग्धकर्बुरितकेतुचामरै
रपघातमेव हि विमानमण्डलैः ।
दधति ध्वजाङ्कुशपटाञ्चलेष्विमाः
क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ॥ *

आश्चर्यं, प्रवृत्तएवायमुद्दण्डवज्रखण्डावस्फोटपटुरुत्सर्पिस्फुलिङ्गगुरुरुत्तालतुमुलकेलिहानज्वालासम्भारभैरवोभगवानुपर्बुधः † ।

प्रचण्डस्यास्य सर्व्वतः शान्तापस्तम्भियामङ्गेनाच्छाद्य दूरमपसरामि । तथा करोति ।

---

* अवदग्धानि ईषद्दग्धानि अतएव कर्बुरितानि चित्रितानि केतवश्चामराणि च ध्वजदण्डस्य चामराणि वा येषां तैः । कर्बुरितेत्यत्र जर्जरितेति क्वचित्पाठः । अपघातमेव दाहभीत्या पलायितमेव, भावे क्तः । तथापि इमाः शिखा वह्निज्वालाः ध्वजाङ्कुशपटाञ्चलेषु ध्वजदण्डस्या अङ्कुशाकारा ये पटास्तेषामेकदेशेषु क्षणं व्याप्य कुङ्कुमच्छुरणविभ्रमं कुङ्कुमविलेपनस्य भ्रान्तिं विलासं वा दधति ।

† उद्दण्डानामतिकठोराणामपि वज्रखण्डानामवस्फोटे पटुः समर्थः, उत्सर्पिभिः समन्तात्प्रसरद्भिः स्फुलिङ्गैर्गुरुर्बहुलीकृतः । उत्तालानामुद्भटानां तुमुलानां सङ्कुलानां केलिहानानाञ्च पुनः पुनरास्वादतत्पराणां ज्वालानां शिखानां सम्भारेण विस्तारेण च भैरवोभयङ्करः, उपर्बुधोऽग्निः ।

Digitized by Google

विद्याधरी । दिट्ठिआ एदेण विमलमोत्तिअफलसीदल सिणिद्धमसिणसोवाणमंसलेण णाहदेहप्फंसेण आणन्दमन्द मुउलिदघुसन्तलोअणाए अन्तरिदोव्वेव सन्तावो । (१)

विद्याधरः । अयि किमत्र मया कृतम्, अथवा ।

अकिञ्चिदपि * कुर्व्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं योहि यस्य प्रियोजनः ॥

विद्याधरी । कधमविरलविलोलघुसन्तविज्जुलदाविलासमण्डिदेहिं मत्तमोरकण्ठसामलेहिं ओच्छरीअदि एहत्थलं जलहरेहिं । (२)

विद्याधरः । हन्त हन्त कुमारस्तवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम् । कथमविरलप्रयुक्तवारिधारासम्पातैः प्रशान्तं पावकास्त्रम् ।

विद्याधरी । पिअं मे पिअं मे । (३)

विद्याधरः । हन्त हन्त भो भोः सर्व्वमतिमात्रं दोषाय

---

(१) दिष्ट्या एतेन विमलमौक्तिकफलशीतलस्निग्धमसृणसोपानमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णलोचनाया अन्तरितएव सन्तापः । विमलमौक्तिकफलवच्छीतलः स्निग्धः स्नेहव्यञ्जकः मसृणोऽतीक्ष्णः सोपानवन्मांसलः ऊर्द्धोर्द्धक्रमेण दीर्घतरः सर्व्वाङ्गीन इत्यर्थः, तेन ।

(२) कथमविरलविलोलघूर्णद्विद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैराच्छाद्यते नभस्तलं जलधरैः ।

(३) प्रियं मे प्रियं मे ।

---

* अकिञ्चिदपीत्यादिश्लोकस्य विवृतिः पूर्व्वमुक्ता ।

Digitized by Google

यत् प्रबलवातावलिक्षोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धमेकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्व्वेन्द्रियनारायणोदरनिविष्टमिव भूतजातं प्रवेपते *।

साधु वत्स चन्द्रकेतो साधु, स्थाने वाग्व्यवस्तमीरितम्। यतः

विद्याकल्पेन † मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्त्तानां ‡ क्वापि विप्रलयः क्षतः।

दिव्याधरी। णाध को दाणिं एसो ससम्भमुक्खित्तकरवत्तमिदजोत्तच्चलो दूरदोज्झिव मइरवत्तणपडिसिद्धजुज्झावा-

---

* प्रबलवातावलिक्षुतोयः क्षोभस्तेन गम्भीरं यथातथा गुणगुणायमाना गर्ज्जन्तो ये मेघास्तैर्मेदुरेनिविडेयोऽन्धकारस्तेन नीरन्ध्रनिबद्धमत्याक्रान्तं सत्। एकवारेण एकोपक्रमेणैव यद्विश्वस्य ग्रसनं तदर्थं विकटविकरालोऽतिविस्फारितोयः कालकण्ठस्य रुद्रस्य मुखकन्दरोमुखगर्त्तस्तत्र विवर्त्तमानमिव। तथा युगान्ते प्रलये योगोवृत्तिरोधः सएव बाह्यविषयानुभवप्रतिबन्धकत्वान्निद्रा तया निरुद्धानि निर्व्यापारीकृतानि सर्व्वाणि द्वाराणीन्द्रियाणि यस्य तादृशस्य नारायणस्योदरे निविष्टमिव।

† विद्याकल्पेन विद्या तत्त्वज्ञानं जीवब्रह्मणोरभेदज्ञानमित्यर्थः अविद्याकार्य्यत्वेन ब्रह्माभिन्नवस्तुनो मिथ्यात्वज्ञानमा तत्प्रेरणेन।

‡ विवर्त्तानां प्रपञ्चानां। तेषां ब्रह्मसत्ताविषमसत्ताकत्वात्। उपादानविषमसत्ताककार्य्योत्पादोविवर्त्त इति वेदान्तिनः।

Digitized by Google

वारो एदाणं कुमाराणं अन्तरम्मि विमाणवरं ओदारेदि । (१)

विद्याधरः । एष शम्बूकवधात् प्रतिनिवृत्तोरघुपतिः ।

अग्रं महापुरुषसंविहितं निभृत्य *
तद्गौरवात् समुपसंहृतसंप्रहारः ।
म्लानोत्पलवः, प्रणतएव च चन्द्रकेतुः,
कल्याणमस्तु सुतयुग्मनेन राज्ञः ॥

इति निष्क्रान्तौ, विष्कम्भकः ।

ततः प्रविशति रामोत्पलवः प्रणतश्चन्द्रकेतुश्च ।

रामः पुष्पकादवतरन् ।

दिनकरकुलचन्द्र चन्द्रकेतो
सरभसमेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलैस्तवाङ्गैः
शममुपयातु ममापि चित्तदाहः † ॥

चन्द्र । अभिवादये ।

रामः । उत्थाप्य सस्नेहाङ्गं परिष्वज्य । अपिनाम कुशलं तव दिव्यास्त्रधरदेहस्य ।

---

(१) नाथ कदानीमेष ससम्भ्रमोत्क्षिप्तकरकमलयोरा त्वयोदूरतएव मधुरवचनप्रतिविधेयदृष्ट्यापारं स्तयोः कुमारयोरन्तरे विमानवरमवतारयति । योगं युगेग्रादण्डयोः संयोजन रज्जुविशेषः विमानेऽपि तत् सम्भवात् । अन्येऽपि करक्षितयष्ट्यादि भ्रमणेन दूरस्थानप्रियकर्मकरणान्निवारयतीति स्वभावः ।

---

* महापुरुषसंवितं महापुरुषेण रामेणोचरितम् ।

† चित्तदाहः सीताविरहजनितमनस्तापः ।

Digitized by Google

चन्द्र। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्याभ्युदयेन, तदिज्ञापयामि, मामिवाविशेषेण मत्तः * श्रिवतरेण चक्षुषा पश्यत्वमुं महावीरप्रकाण्डं † तातः।

रामः। लवं निरूप्य। दिष्ट्या अतिकल्याणाकृतिरयं वयस्योवत्सस्य।

चातुं लोकानिव परिणतः काथवानस्तवेदः
शास्त्रोधर्म्मः श्रितइव तनुं ब्रह्मघोषस्य गुप्त्यै।
सामर्थ्यानामिव समुदयः सञ्चयोवा गुणाना
माविर्भूय स्थितइव जगत्पुण्यनिर्म्माणराशिः ‡॥

लवः। अहो पुण्यानुभावदर्शनोऽयं महापुरुषः।

आश्वासस्नेहभक्तीनामेकमालम्बनं महत्।
प्रकृष्टस्येव धर्म्मस्य प्रसादो मूर्त्तिसञ्चरः §॥

आश्चर्य्यम्।

---

* मत्तोऽविशेषेणावैलक्षण्येन, मामिवेत्यनेवशब्देनैवतदर्थोपपत्तौ पुनरविशेषेणेत्यादुपादानं सर्व्वथानुपेक्षणीयत्वज्ञापनायेति बोध्यम्।

† महावीरप्रकाण्डं महावीरश्रेष्ठम्। प्रकाण्डमित्यत्र प्रशंस्यमिति क्वचित्पाठः।

‡ ब्रह्म घोष्यते प्रकाश्यतेऽनेनेति ब्रह्मघोषोवेदस्तस्य। जगतां पुण्यनिर्म्माणस्य पुण्यक्रियायाराशिः समूहः। आविर्भूय मूर्त्तिमान् भूत्वा।

§ आश्वासेत्यादि आश्वासोऽभयदानं स्नेहः प्रेम भक्तिः सेवा एतासामेकमद्वितीयं महदत्युत्कृष्टमालम्बनमधिकरणम् अत्र भक्तेरधिकरणत्वमुद्देश्यतयेत्यवधेयम्। मूर्त्तिसञ्चरो मूर्त्तिमान्।

Digitized by Google

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रक्षयति माम् ।
घटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽयतिशयः * ॥

रामः । तत्किमेकपदएव दुःखविश्रामं दद्मात्युपक्षेपय तिच कुतोऽपि निमित्तादन्तरात्मानम्, अथवा स्नेहस्य निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत् ।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः † ॥

लवः । चन्द्रकेतो ! क्वणते ।

चन्द्र । प्रियवयस्य ! ननु तातपादाएते ।

लवः । ममापि तर्हि धर्मतस्तथैव, यतः प्रियवयस्य

---

* निर्वृतिघन आनन्दनिविडः रसः शान्ताख्यः अनुरागो वा प्रसरति उत्पद्यते, यदिवेति सम्भावनायां, तीर्थानामिव महतां कोऽप्यनिर्वचनीयोऽतिशय उत्कर्षो महार्घ आदरणीयः ।

† व्यतिषजति मिथःप्रणयबद्धान् करोति । बहिरुपाधीन् बाह्यहेतून् पुत्रत्वपौत्रत्वादीन् । संश्रयन्ते अपेक्षन्ते । पतङ्गस्य सूर्यस्य । उत्तापकस्य सूर्यस्योदये अतिकोमलपुण्डरीक-विकाशः दृढताविधायिहिमरश्मेरुदये अतिकठिनचन्द्रकान्त द्रवश्च कुतश्चिद्गूढकारणादेव जायते बाह्यकारणापेक्षायां तद्वि-परीतमेव स्यादित्यर्थः ।

Digitized by Google

इत्यात्य,* किन्तु चत्वारः खलु भवतामेवंव्यपदेशभागिन खचभवन्तो रामायणकथापुरुषा,खद्विशेषं ब्रूहि। †

चन्द्र। ननु ज्येष्ठतातपादा इत्यवेहि।

लवः। सोल्लासं। कथं रघुनाथएषः, दिष्ट्या सुप्रभातमद्य,यदयं देवोदृष्टः, सविनयकौतुकं निर्व्वर्ण्य। तात प्राचेतसान्तेवासी लवोऽभिवादयते।

रामः। सस्नेहम्। आयुष्मन्नेह्येहि। सस्नेहं परिष्वज्य। अयि वत्स शतंशतमतिविनयेन, अनेकवारमपरिग्रथं परिष्वजस्व।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः।
नन्दयति चन्द्रचन्दननिस्यन्दजड़स्तव स्पर्शः ‡॥

लवः। खगतम्। ईदृशोऽस्माद्दृशान् प्रति अमीषामकारण स्नेहः, मया पुनरेभ्यएवाभिद्रुग्धमग्नेन, यदायुधपरिग्रहं यावदत्यारूढोदुर्य्योगः §। प्रकाशं। मृष्यन्त्विदानीं लवस्य वालिशतां तातपादाः।

---

* तथैव तातपादाएव, आत्येति मामितिशेषः, वयस्यतातस्य तातस्थानीयत्वादितिभावः।

† एवंव्यपदेशभागिनः तातपदवाच्याः। विशेषं प्रथमं द्वितीयं वेत्यादिकम्।

‡ परिणतं चिरप्रस्फुटितम् अतएव कठोरं यत् पुष्करं पद्मं तस्य गर्भच्छदो मध्यदल तद्वत् पीनोऽतिबहलः मसृणोऽतीक्ष्णः सुकुमारोमृदुश्च, विशेषणानां कर्म्मधारयः। चन्द्रचन्दनयोर्निस्यन्दः सम्पर्कस्तद्वज्जडो जाड्यजनकः।

§ कथमस्याभिद्रोहः कृतइत्याह यदित्यादि यस्मात् आयुधपरिग्रहं यावत् आयुधं परिगृह्य दुर्य्योगः अश्वहरणसैन्यमोहनादिरूपदुश्चेष्टितमत्यारूढः अत्यारूह्य औद्धत्येन प्राप्तः। कर्म्मणि क्तः।

Digitized by Google

रामः। किमपराद्धं वत्सेन।

चन्द्र। अश्वानुयायिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन।

रामः। नन्वयमलङ्कारः चन्द्रस्य।

न तेजस्तेजस्वी प्रकृतमपरेषां प्रसहते
स तस्य स्वोभावः प्रकृतिनियतत्वादकृतकः।
मधूच्छैरात्मानं तपति यदि देवोदिनकरः
किमाग्नेयग्रावा निकृतइव * तेजांसि वमति॥

चन्द्र। तात श्रमवेऽप्यस्य क्षोभते वीरस्य, परन्तु प्रियवयस्यविनियुक्तजम्भकास्त्रनिष्कम्पस्तम्भितानि सर्व्वतः सैन्यानि।

रामः। विलोक्य। वत्स लव संहृत्यतामस्त्राणि, त्वमपि चन्द्रकेतो निर्व्यापारविलक्षितानि सान्वय वेलानि।

लवः। यथाज्ञापयति तात इति प्रणिधानं नाटयति।

चन्द्र। यथादिष्टमिति निष्क्रान्तः।

लवः। प्रशान्तमस्त्रम्।

रामः। वत्स! सरहस्यप्रयोगसंहरणान्यस्त्राण्याचार्यवन्ति †।

ब्रह्मादयोब्रह्महिताय तस्मा परःसहस्राः प्रददुस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि॥

---

* निकृतइव धिक्कृतइव।

† सरहस्यः समन्त्रकः प्रयोगः संहरणञ्च येषां तानि, आचार्यवन्ति गुरुपारम्पर्य्येणोपदेशवन्ति गुरूपदेशेन प्राप्याणीत्यर्थः।

Digitized by Google

अथैतन्मन्त्रपारायणोपनिषदं भगवान् छन्दाश्वः परःसह-स्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, सतु भगवान् मन्त्रमित्येषतु पूर्व्वानुक्रमः । कुमारस्य पुनः कुतः संप्र दाय * इति पृच्छामि ।

लवः । स्वतःप्रकाशान्यावयोरस्त्राणि ।

रामः । विचिन्त्य । प्रकृष्टपुण्यपरिपाकोपादानः † कोऽ-पि महिमा स्यात्, द्विवचनन्तु ‡ कथम् ।

लवः । भ्रातरावावां यमजौ ।

रामः । स तर्हि द्वितीयः क्व ।

नेपथ्ये । भाण्डायन भाण्डायन ।

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै
रायोधनं ननु किमात्थ सखे तथेति § ।
अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्रस्य शस्त्रमिखिनः शमसद्म यान्तु ॥

रामः । अथ कोऽयमिन्द्रमणिमेचकच्छवि
र्ध्वनिनैव दत्तपुलकं करोति माम् ।

---

* कुतोगुरोः संप्रदायः उपदेशः ।

† प्रकृष्टं यत्पुण्यं तस्य परिपाकः फलोन्मुखीभावः सएवो पादानं कारणं यस्य सः ।

‡ द्विवचनन्विति आवयोरित्यनेति शेषः ।

§ ननु भोः सखे नरेन्द्रसैन्यैः सह लवस्यायोधनं युद्धं तथेति सत्यमिति किमात्थ सत्यमेव युद्धं भवतीति किं ब्रवीषि ।

Digitized by Google

नवनीलनीरधरधोरगर्जित
क्षणबद्धकुङ्मलकदम्बडम्बरम् * ॥

लवः । अयमसौ मम ज्यायानार्यः कुशीनाम भरताश्रमात् प्रतिनिवृत्तः ।

रामः । सकौतुकम् । वत्स दृतएवाक्षयेनमथायुध्यन्नम् ।

लवः । एवमिति परिक्रामति ।

ततः प्रविशति कुशः ।

कुशः । साङ्गुतहर्षधैर्य्यं धनुरास्फालयन् ।

दत्तेन्द्राभयदक्षिणैर्भगवतोवैवस्वतादामनो
र्दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममेतत्ततो
दिव्यास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः † ॥

विकटं परिक्रामति ।

रामः कोऽयमस्मिन् क्षत्रियपोतके पौरुषातिरेकः ।

---

* नवः प्रावृट्प्रारम्भसमुदितः जलवद्गुलत्वान्नीलश्च यो नीरधरोमेघस्तस्य यद्धीरं गभीरं गर्जितं तस्य क्षणएव बद्धः कुड्मलोमुकुलो येन तादृशोयः कदम्बोनीपद्रुमस्तस्येव डम्बर उत्कर्षः श्लो भेत्यर्थः यस्य तम् ।

† दत्ता इन्द्राय अभयमेव दैत्येभ्येः निर्भयत्वमेव दक्षिणा अश्वमेधादियज्ञेदेयदानदक्षिणा यैः । आदित्यैः सूर्यवंशीयैः । ततस्तर्हि । दिव्यास्त्राणां याः स्फुरन्त्य उग्राभयदाश्च दीधितयस्तासां शिखाभिर्नीराजिता शोभिता ज्या यस्य तद्धनुर्धन्यं सार्थकम् ॥

Digitized by Google

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्भुता * नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरोरसः किमयमेत्युतदर्पणेव ॥

लवः । उपसृत्य । जयत्यार्य्यः ।

कुशः । नन्वायुष्मन् किमियं वार्त्ता युद्धं युद्धमिति ।

लवः । यत्किञ्चिदेतत्, उरुदृप्तभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्तताम् ।

कुशः । किमर्थम् ।

लवः । अत्र देवो रघुपतिस्तिष्ठति, स च स्निह्यत्यावयोरुत्कण्ठते च युष्मत्सन्निकर्षस्य ।

कुशः । सतर्कं । स रामायणकथानायको ब्रह्मघोषस्य गेपायिता । †

लवः । अथ किम् ।

कुशः । आर्ग्रसनीयपुण्यदर्शनः ‡ स महात्मा, किन्तु कथ § मस्माभिरुपगन्तव्य इति न संप्रधारयामि ।

लवः । यथा गुरुस्तथोपचारेण ।

कुशः । अपि कथं नामैतत ।

---

* तृणीकृतस्तुच्छत्वेन गणितो जगत्त्रयस्य सत्त्वसारो बलोत्कर्षोंयया सा दृष्टिः । धीरा अद्भुता उद्भता गौर्य्यव्यञ्जिका च ।

† ब्रह्मघोषस्य वेदस्य वेदाध्यायिनो ब्राह्मणगणस्य वा गोपायिता रक्षकः ।

‡ आर्ग्रसनीयम्भिलषणीयं पुण्यं पवित्रं दर्शनं यस्य सः ।

§ कथं कीदृशेनोपचारेण ।

Digitized by Google

लवः । अत्युदात्तसुजनसुन्दरकेतुरौर्विलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते, तेन तत्सम्बन्धेन च धर्मतात एवायं राजर्षिरिति ।

कुशः । संप्रति करणीयो राजन्येऽपि प्रश्रयः ।

लवः । पक्षपातेनमाकारानुभावगाम्भीर्यसम्भाव्यमानविविधलोकोत्तरचरितातिशय * मार्यमहापुरुषम् ।

कुशः । निर्वर्ण्य ।

अहो प्रामोदिकं रूपमनुभावस्य पावनः ।
स्थाने रामायणकविर्देवो वाचं व्यवीवृतत् † ॥

उपसृत्य । तात प्राचेतसाश्रमेवासी कुशोऽभिवादयते ।

रामः । एह्यायुष्मन् ।

अमृतभ्रातजीमूतस्निग्धसंहननस्य ते ‡ ।
परिष्वङ्गस्य बालस्यादयमुत्कण्ठते जनः ॥

परिष्वज्य स्वगतम् । तत्किमपत्यं § मयं दारकः ।

---

* आकार आकृतिरनुभावः प्रभावः गम्भीर्यमव्यक्ताश्रयत्वम क्षुब्धाश्रयत्वम्वा तैः सम्भाव्यमानः श्रद्धेयः विविधो लोकोत्तरोऽसामान्यश्चरितातिशयः वाल्मीकिवर्णितचरित्रोत्कर्षोयस्य तम् ।

† प्रामोदिकं प्रमोदजनकं रूपमाकारः । व्यवीवृतत् एतच्चरित्रवर्णनेन प्रीतां चकार, वृञ प्रीतावित्यस्मात्णिजन्ताल्लुङि रूपम् ।

‡ अमृतश्चातो जलपूर्णो जीमूतोमेघस्तद्वत् स्निग्धं संहननं देहोयस्य तस्य ।

§ किमपत्यं मदीयः पुत्रः किम्, अकारस्यप्रश्नयोद्भावनादियं सम्भावना ।

Digitized by Google

अङ्गादङ्गात्सकलावयवेभ्यश्च्युतोगलितः निजः स्वीयः स्नेहजः प्रेमसम्भृतः घृतादिस्नेहजात इत्यन्ये, वस्तुतस्तु स्नेहद इत्येव पाठः सम्यक्, प्रणयास्पदमित्यर्थः ईदृशो देहसार इव देहस्नेहात्मकांशः किम्, सर्व्वविषयापेक्षया स्वदेहस्य प्रियत्वात्तदुत्पन्नांशस्य च ततोऽपि प्रियतमत्वादियमुत्प्रेक्षा। तथा प्रादुर्भूय देहान्निःसृत्य मूर्त्तिमान् भूत्वा वहिःस्थितः चेतनां दधाति धारयतीति चेतना धातुः प्रत्यगात्मेव देहसारापेक्षयापि आत्मनः प्रियतमत्वादियं द्वितीयोत्प्रेक्षा, आत्मा वैजायते पुत्र इतिश्रुतेर्य्युच्यते चेयं सम्भावना, आत्मनश्चेतनावत्त्वं न्यायमतसिद्धं, वेदान्तमतेतु चेतना चैतन्यं देहस्थितिहेतुत्वात् धातुरिवेति समासः। कुत इत्याह साक्रान्देन त्वभितं व्याप्तं यद्धृदयं तस्य प्रस्रवेण क्षरणेन अवमृष्टः क्षालितः हर्षातिशयदीर्घया चित्तवृत्त्या विषयीकृत इत्यर्थः। ईदृशोऽयं स्नेहे आलिङ्गने सति यद्यस्मात् अमृतरसस्रोतसेव गात्रं सिञ्चति सुखयति अतः पुत्रस्त्वायमित्यर्थः।

Digitized by Google

अहो प्रश्रयवेगेऽपि गतिस्खित्यासनादयः ।
साम्राज्यप्रसिनेभावाः कुशस्य च लवस्य च ॥
वपुरविहितसिद्धाएव लक्ष्मीविलासाः
प्रतिजनकमनीयं कान्तिमत् केतयन्ति ।
अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
विकसितमिव पद्मं विन्दवो माकरन्दाः ॥ *
भूयिष्ठाश्च रघुकुमारच्छाया † मनयोः पश्यामि ।
कैठारपारावतकण्ठमेचकं वपुर्दधत्श्यामबन्धुरांसकम् ‡ ।
प्रसन्नसिंहस्तिमितश्च वीक्षितं ध्वनिश्च मातुस्तदङ्गसंसदः ॥
सूक्ष्मं निरूप्य । अथे न केवलमस्मदङ्गसंवादिन्याकृतिः ।
अपि जनकसुतायाश्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणेनेयमस्ति । §

* वनचरयोः कथं सामान्यसम्भावनेत्याह वपुरिति । अविहितसिद्धा अकृत्रिमा लक्ष्मीविलासाः शोभाविशेषा एव कान्तिमत् तथा प्रतिजनकमनीयं सर्वलोकहृदयङ्गमं वपुः केतयन्ति भाविसमृद्धिकत्वेन सूचयन्ति, उपमाभ्यामिदं द्रढयति अमलिनेत्यादि । ते प्रसिद्धाः । माकरन्दाविन्दवः वायुना नीयमानामधुबिन्दवः ।

† रघुकुमाराणां छायां कान्तिम् ।

‡ अबन्धुरांसकमित्यत्र अबन्धुरांसयोरिति पाठे अनयोरित्यस्य विशेषणम् ।

§ अनुरूपं सादृश्यं । नैपुणेन निपुणत्वेन उन्नेयं ज्ञेयम्, अनैपुणेन्नेयमिति पाठे नैपुणमन्तरेणापि ज्ञेयं स्फुटं प्रतीयमानमित्यर्थः ।

Digitized by Google

ननु पुनरिव तस्मै गोचरीभूतमस्मै
रभिनवमतपश्रीमदास्यं प्रियायाः ॥
मुक्ताच्छदन्तच्छविदन्तुरेयं मैवौष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्धत्यपि रक्तनीले तथापि सौभाग्यगुणः स एव *॥

तदेतत् प्राचेतसाधुषितमस्मै, यत्र किल देवी परित्यक्ता, दुष्यन्तानयोराकूतनिर्वपुश्च, यद्यपि स्वतःप्रकाशान्यस्त्राणीति, तत्र विप्रतिपद्यामि, अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमभूतं स्यात्, मन्त्रसंप्रदायिकान्यस्त्राणीति पूर्वेषामध्यनुज्ञुमः, अयञ्च संभ्रवमानमात्मानं सुखातिशयो हृदयस्य † मे विप्रलभते, भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या मन्योर्णी भाव आबोत् । सासम ।

पुराकूते स्नेहे परिचयविकासादुपचिते
रहोविश्रब्धाया अपि सहजलज्जाजडतृशः ।
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधागर्भग्रन्थिसदनु दिवसैः कैरपि तया ‡ ॥

रदिला । तत्किमेतौ पृच्छामि केनाप्युपायेन ।

लवः । तत्किमेतत् ।

---

* ओष्ठस्य मुद्रा आकृतिः । कर्णपाशः सुन्दरः कर्णः । रक्तनीले इति वीरपुरुषसम्बन्धित्वादितिभावः । सौभाग्यगुणः सौन्दर्यम् ।

† हृदयस्य सुखातिशयः संभ्रवमानं चञ्चलीभवन्तमात्मानं विप्रलभते प्रतारयति संशये पातयतीत्यर्थः ।

‡ करतलपरामर्शकलया करतलेन संघाहनक्रीडया । तयेति अत्रापिकारोबोध्यः, अस्य च ज्ञात इत्यनेनानुषङ्गः ।

Digitized by Google

वाष्पवर्षेण नीतं वोजगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥ *

कुशः । अयि वत्स !

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे क्षुत्तं किल जगदरण्यं हि भवति ।
सच स्नेहस्तावानयमपि वियोगोनिरवधिः
किमित्येवं पृच्छस्यनधिगतरामायणइव ॥ †

रामः । स्वगतम् । अये तटस्थित आलापः, क्षुतं प्रश्नेन ‡ दग्धहृदय ! कोऽयमाकस्मिकस्ते स्नेहपरिप्लवोविकारः, एवञ्च निर्भिन्नहृदयावेगः प्रियजनेनाश्वनुकम्पितोऽस्मि, भवतु तावदन्तरयामि । प्रकाशम् । वत्सौ रामायणमिति श्रूयते, भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः § प्रज्ञस्तिरादित्यवंशस्य, तच्च कौतूहलेन यत्किञ्चिच्छ्रोतुमिच्छामि ।

कुशः । स क्षुत्क्षण एव सन्दर्भोऽस्माकमावृत्तः ¶ स्मृतिप्रत्युपस्थितौ तावदिमौ बालचरितस्यान्तेऽध्याये द्वौ श्लोकौ ।

रामः । उदीरयतु वत्सः ।

---

* जगन्मङ्गलं जगतां मङ्गलं यस्मात्तत् । अवश्यायावसिक्तस्य हिमजलव्याप्तस्य ।

† अनधिगतरामायण इव रामायणमधीत्यापि रामस्य सीतावियोगदुःखमजानन्निव ।

‡ तटस्थित उदासीनविषयकत्वात् क्षणिकः, इतः परं न भविष्यतीत्यर्थः ।

§ सरस्वतीनिष्यन्दः वाक्परिणामः ।

¶ आवृत्तः पुनःपुनरधीतः ।

Digitized by Google

748

कुग्रः । प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ।
प्रियभावः सतु तथा स्वगुणैरेव वर्द्धितः ॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥ इति ॥

रामः । कष्टमतिदारुणो हृदयमर्म्मोपघातः, हा देवी एवं किल तदासीत् । अहो निरन्वयविपर्य्यासविरसवृत्तयोविप्रलम्भपर्य्यवसायिन * स्तापयन्ति संसारवृत्तान्ताः ।

क्व तावानानन्दोनिरतिशयविश्रम्भवहलः,
क्व तेऽन्योन्यं यत्नाः, क्वचन गहनाः कौतुकरसाः ।
सुखे वा दुःखे वा क्वनु खलु तदैक्यं हृदययो
स्तथा † प्येष प्राणः स्फुरति नतु पापोविरमति ॥

भोः कष्टम् ।

प्रियागुणसहस्राणामेकोन्मीलनपेशलः । ‡
यएव दुःस्मरः कालस्तमेव स्मारितावयम् ॥
तदा किञ्चित्किञ्चिन्नतपद § मरोभिः कतिपये
स्तदीषद्विस्तारिस्तनयुगलमासीन्मृगदृशः ।

---

* निरन्वयो निःसम्बन्धः हठादुत्पन्न इत्यर्थः विपर्य्यासो वैपरीत्यं तेन विरसा दुःखदा वृत्तिर्येषां ते, विप्रलम्भपर्य्यवसायिनः वियोगपरिणामाः ।

† तथापि तादृशानन्दादिविगमेऽपि ।

‡ एकोऽद्वितीयश्चासौ उन्मीलनपेशलः प्रकाशनचतुरश्चेति कर्म्मधारयः । एकोन्मीलनेत्यत्र समुन्मीलनेति पाठः सम्यक् ।

§ किञ्चित्किञ्चिन्नतपदं क्रमेणाल्पमल्पमुत्थितिमत् ।

Digitized by Google

वयःस्नेहाकूतव्यतिकरघनोद्यच्च मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥ *

कुशः । अथश्च मन्दाकिनीचित्रकूटवनविहारे † सीता देवीमुद्दिश्य रघुपतेः श्लोकः ।

त्वदर्थमिव विन्यस्तः शिलापादोऽयमग्रतः ।
यस्यायमभितः पुष्पैः प्रहृष्टइव केसरः ॥ ‡

रामः । सलज्जितस्नेहकरुणम् । अतिनामायं मुग्धः शिशुजनोविश्रम्भेषतस्मरणचरः । हा देवि स्मरसि वा तस्य प्रदेशस्य तत्समयविश्रम्भातिशयप्रसक्तसाक्षिणः § भोः कष्टम् ।

श्रमाम्बुशिशिरीभवत्प्रसृतमन्दमन्दाकिनी
महत्तरलितालकाकुलललाटचन्द्रद्युति ।

---

* हृदि वपुषिच वयसोयौवनस्य यौवनचिह्नस्येत्यर्थः स्नेहस्य प्रेम्णः आकूतस्य तत्तदभिप्रायस्यच व्यतिकरेण सम्पर्केण घनोनिविडः अतएव मुग्धोमनोज्ञः तथा प्रगल्भः प्रबलोव्यापारः प्रवृत्तिर्यस्य तादृशोमदनो यत्र कार्ये स्फुरति । अत्र हृदयवपुषोर्वयः स्नेहाकूतानां यथायोगं सम्बन्धोबोद्धव्यः ।

† मन्दाकिनी गङ्गा तन्नाम्नी काचिन्नदी वा चित्रकूटः पर्व्वत विशेषः तयोर्वनं जलमरणञ्च तयोर्विहारे क्रीडायाम् ।

‡ त्वदर्थं तवोपभोगार्थं । शिलापादः शिलाचञ्चलः प्रत्यग्न पर्व्वतः । यस्य शिलापादस्याभितः समन्तात् । अभितोयोगे द्वितीया प्राप्तौ सर्व्वापवादकत्वात् षष्ठी । पुष्पैः पुष्पपतनैः प्रहृष्ट इव हर्षं कुर्व्वन्निव, कर्त्तरि क्तः । केसरोवकुलवृक्षः ।

§ तत्समये विश्रम्भातिशयेन विश्वासवाहुल्येन ये प्रसक्ता व्यापारास्तेषां साक्षिणः सूचकस्य । कर्म्मणि षष्ठी ।

Digitized by Google

अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम् ॥ *

स्खलितदव स्थित्वा । सकरुणम् । अहो नु खलु भोः ।

चिरं ध्यात्वा ध्यात्वा निहितदव निर्म्माय पुरतः †
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे
कुकूलानां ‡ राशौ तदनु हृदयं पच्यतदव ॥

नेपथ्ये ।

वशिष्ठोवाल्मीकिर्दशरथमहिष्योऽथ § जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।
जरायस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजड़ाः ॥

रामः । कथं भगवन्तावरुन्धतीवशिष्ठौ, अम्बा, जनकश्चैव, कथं खल्वेते दृष्टयाः । सकरुणं विलोक्य । अहह

---

* तव मुखमुत्प्रेक्ष्यते मया लक्ष्यते इत्यन्वयः किम्भूतं श्रमाम्बुभि श्रीभवत् घर्म्माम्भसा शीतलं । तथा एतते गमने मन्दोयोमन्दाकिनीभवत् तेन तरलितैरलकैराकुलोव्याप्तो ललाटं चन्द्र इव स तथा, तेन द्युतिर्यस्य तत्, तथा अकुङ्कुमकलङ्कितो कुङ्कुमचिह्नशून्यावपि उज्ज्वलौ कपोलौ यत्र तत्, तथा निराभरणावपि कुण्डलादि शून्यावपि सुन्दरौ यौ श्रवणपाशौ ताभ्यां सौम्यं मनोज्ञम् ।

† चिरं ध्यात्वा ध्यात्वा [भ्रमविजृम्भमाणया तन्मयतावस्थया निर्म्मायेव पुरतोऽग्रे निहितः सन्निधापितः ।

‡ कुकूलानां तुषाग्नीनाम् ।

§ दशरथमहिष्य इति एकत्वेऽपि गौरवे बहुवचनम् ।

Digitized by Google

तातजनकस्तु देवादत्रैवायात इति वज्रेणेव ताडितोऽस्मि मन्द भाग्यः ।

सम्बन्धस्पृहणीयताप्रमुदितैर्ज्ञातं वशिष्ठादिभि
र्दृष्टापत्यविवाहमङ्गलमहो तत्तातयोः सङ्गतम् । *
पश्यन्नीदृशमीदृशे पितृसखं वृत्ते महावैशसे
दीर्ये किन्न सहस्रधा नु † मथवा रामेण किं दुष्करम् ॥

नेपथ्ये । कष्टं कष्टम् ।

अनुभावमात्रसमुपस्थितश्रियं ‡
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रमूढजनकप्रबोधनाद्
विधुराः प्रमोहमुपयान्ति मातरः ॥

रामः । हा तात, हा मातरः, हा जनक ।

जनकानां रघूणाञ्च यत् क्षत्रं गोत्रमङ्गलम् ।
तस्मिन्न § करुणे पापे वृथा वः करुणा मयि ॥

यावत् सम्भावयामि । इत्युत्तिष्ठति ।

कुशलवौ । इतइतस्तातः । सकरुणं परिक्रम्य निष्क्रान्ताः सर्व्वे ।

॥ इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः ॥

---

* तातयोर्दशरथजनकयोः सङ्गतं सङ्गम आसीदिति शेषः ।

† ईदृशे महावैशसे महाविपदि वृत्ते जाते सति ईदृशमनुभूत तत्सङ्गतिसुखं पितृसखं जनकं पश्यन्नहं किं न सहस्रधा दीर्ये विदीर्णो न भवामीत्यन्वयः ।

‡ अनुभावमात्रे नतु शरीरादौ समुपस्थिता श्रीर्यस्य तम् ।

§ तस्मिन् सीतारूपे गोत्रमङ्गले अकरुणे निर्दये मयि ।

Digitized by Google

1/0

अथ सप्तमोऽङ्कः ।

ततः प्रविशति लक्ष्मणः ।

लक्ष्मणः । भोभो भगवता खलु वाल्मीकिना सब्रह्मचर्य्य पौरजानपदाः प्रजाः * सहास्माभिराहूय कृतञ्जलएव सदेवासुरतिर्य्यग्गुरगनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामः † स्वप्रभावेण सन्निधापितः, आदिष्टस्त्वहमार्य्येण, वत्स लक्ष्मण! भगवता वाल्मीकिना खल्लति ‡ मयूरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः, तद्रङ्गातोरमातोद्यस्थान § मुपगम्य क्रियतां समाजसन्निवेश इति । कृतञ्च मर्त्यामर्त्यञ्च भूतग्रामञ्च समुचितस्थानेषु समुपवेशनं मया, श्रयन्तु ।

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ¶ ।
वाल्मीकिर्गौरवादार्य्य दृतएवाभिवर्त्तते ॥

---

* ब्राह्मणक्षत्रियाणां पौरजानपदप्रजात्वेन प्राप्तावपि सब्रह्मचर्य्यत्वेत्युपादानं तेषां प्राधान्यद्योतनार्थम् ।

† तिर्य्यञ्चः पशुपक्षिणः सुग्रीवगरुडादयः, देवैः सह वर्त्तमाना ये असुरतिर्य्यग्गुरगाणां नायकाः, एतच्च यक्षराक्षसकिन्नरादि जङ्गमानां सुमेरुहिमालयादिस्थावराणाञ्चोपलक्षकं, तेषां निकायः समूहो यत्र सः । स्थावरश्चेति न सर्व्वत्र पुस्तकेषु दृश्यते किन्तु सजङ्गमस्थावरं जगदाप्याययतीत्युत्तरसन्दर्भस्वरसादेतद्युक्ततरं प्रतिभाति । सन्निधापनञ्च स्थावराधिष्ठातृत्वमिति बोध्यम् ।

‡ खल्लतिं स्वरचितं किमपि रूपकम् ।

§ आतोद्यस्थानं रङ्गवाटम् ।

¶ प्राप्तं कष्टं क्लेशकरं मुनिव्रतं ब्रह्मचर्य्यं येन सः ।

Digitized by Google

ततः प्रविशति रामः ।

रामः । वत्स लक्ष्मण ! अपि स्थिता रङ्गप्रेक्षकाः ।

लक्ष्म । अथ किम् ।

रामः । द्वौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थान-प्रतिपत्तिं * लम्भयितव्यौ ।

लक्ष्म । प्रभुस्नेहप्रत्यया † त्तथैव कृतम् । इदमास्तीर्णं राजासनमुपविशत्वार्यः ।

रामः । उपविशति ।

सर्वे चोपविशन्ति ।

रामः । प्रस्तूयतां भोः ।

प्रविश्य सूत्रधारः ‡ । भोभो भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति, यदिदमस्माभिरार्षेण चक्षुषा समुदीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं, तच्च कार्यं गौरवादवधातव्यमिति । §

---

* स्थानप्रतिपत्तिं स्थानविशेषदानेन गौरवम् । प्रतिपत्तिः प्रकृतौ च प्रागल्भ्ये गौरवेऽपिचेति मेदिनी ।

† प्रभोस्तव यः स्नेहः कुशलवौ प्रति वात्सल्यं तस्य प्रत्ययात् ज्ञानात् ।

‡ गर्भाङ्कमारभते प्रविश्येत्यादि । सचोक्तोदर्यश्च, अङ्गोदरं प्रविष्टो यो रङ्गद्वारामुखादिमान् । अङ्गोऽपरः सगर्भाङ्गः सबीजः फलवानपीति ।

§ भूतार्थवादी सत्यनिष्टवक्ता । आर्षेण चक्षुषा योगरूपया-दृष्ट्या । किञ्चित् किमपि रूपकम् । कार्यगौरवात् प्रस्तावाभिधेया दरेण ।

Digitized by Google

रामः । एतदुक्तं भवति * । साक्षात्कृतधर्माणऋषयः, तेषाममृतसाराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इत्यनभिशङ्कनीयानीति † ।

नेपथ्ये । हा अज्जउत्त ! हा कुमार लक्खण ! एआइणीं मन्दभाइणीं असरणं अरण्णे आसण्णपसववेअणं हदासं सावदामं अहिलसन्ति, साहं दाणिं मन्दभाइणी भाईरधीए अत्ताणं णिक्खिवेमि । (१)

लक्ष्म । आत्मगतं । कष्टं वतान्यदेव किमपि ।

सूत्र । विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने ।
प्राप्तप्रसवमात्मानं ‡ गङ्गादेव्यां विमुञ्चति ॥

इति सूत्रधारो निष्क्रान्तः ।

---

(१) हा आर्यपुत्र, हा कुमार लक्ष्मण, एकाकिनीं मन्दभागिनीमशरणामरण्ये आसन्नप्रसवनेदनां हतामां श्वापदामाम-भिलषन्ति, साहमीदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिपामि । अभिलषन्ति भक्षणार्थं प्रार्थयन्ते । निक्षिपामीति मरणार्थमिति शेषः ।

---

* यतदुक्तमाप्तम्, उक्तं भूतार्थवादीत्यनेन आर्षेण चक्षुषा-समुद्दीक्ष्येत्यनेन च प्रतिपादितम् ।

† अमृतसाराणि अमृतवत् सारवन्ति, अमृतं ब्रह्म सरन्ति विषयीकुर्वन्तीत्यमृतसाराणीति वा. परोरजांसि सात्त्विकानि, प्रज्ञानान्यनुभवाः । नव्याहन्यन्ते विहतानि न भवन्ति । ऋषयो हि विशुद्धानुभवेन यत्यद्विषयीकृत्य वर्णयन्ति तत्तत्सत्यमेव भवतीत्यर्थः । अनभिशङ्कनीयानि अविकल्पं मन्तव्यानि ।

‡ प्राप्तप्रसवम् आसन्नप्रसवकालम् आत्मानं देहम् ।

Digitized by Google

रामः । देवि क्षणमपेक्षस्व ।

सीता । आर्य्य नाटकमिदं नाटकमिदम् ।

रामः । हा देवि दण्डकारण्यवासप्रियसखि ! एषते रामाद्वैदुर्विपाकः ।

लक्ष्म । आर्य्य दृश्यतां तावत्प्रबन्धार्थः ।

रामः । एष सज्जोऽस्मि वज्रमयः ।

ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता ।

रामः । वत्स लक्ष्मण ! असंविज्ञातमनिबन्धनं तमहं प्रविशामि, * धारय माम् ।

गङ्गा । समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्द्धसे ।
अनलं प्रसूतासि रघुवंशधरौ सुतौ ॥

सीता । समाश्वस्य । दिष्ट्या दारके प्रसूदर्शि, हा आर्य्यपुत्र । (१) इतिमूर्च्छति ।

लक्ष्म । पादयोर्निपत्य । आर्य्यार्य्य दिष्ट्या वर्द्धामहे, कल्याणप्ररोहो रघुवंशः । विलोक्य । हा धिग् कथं क्षुभितवाष्पोत्पीडनिर्झरः † प्रमुग्धएवार्य्यः । इति वीजयति ।

---

(१) दिष्ट्या दारकौ प्रसूतास्मि, हा आर्य्यपुत्र ।

---

* असंविज्ञातं पूर्व्वमननुभूतम्, अनिबन्धनमकारणमाकस्मिकमित्यर्थः तमो मोहम्, इत्येतेन किञ्चिच्चैतन्यसद्भावः सूचितः ।

† क्षुभितस्याविश्रामं गलतोवाष्पोत्पीडस्याश्रुप्रवाहस्य निर्झरो वाऊल्यं यत्र सः । यद्वा क्षुभितः क्षोभं गतः तथा वाष्पोत्पीडनिर्झरश्चेति विशेषणयोः कर्म्मधारयः ।

Digitized by Google

पृथ्वी । वत्से समाश्वसिहि समाश्वसिहि ।

सीता । आश्वस्ता । भगवदि का तुमं दुक्खं अ । (१)

पृथ्वी । दुहितुस्ते श्वशुरकुलदेवता भागीरथी ।

सीता । भगवदि णमोदे णमोदे । (२)

भागी । चारित्रोपचितां कल्याणसम्पदमनुगच्छ ।

लक्ष्म । अनुगृहीताः स्मः ।

भागी । दुहन्तु जननी ते वसुन्धरा ।

सीता । हा अम्ब ! ईदिसी अहं तुए दिट्ठा । (३)

पृथ्वी । एहि वत्से ! एहि पुत्रि ! इति सीतामालिङ्ग्य मूर्च्छति ।

लक्ष्म । सहर्षं । दिष्ट्या पृथ्वीगङ्गाभ्यामभ्युपपन्ना आर्य्या ।

रामः । अवलोक्य । करुणतरं खल्वेतद्वर्त्तते, विश्वम्भरापि नाम व्यथत इति जितमपत्यस्नेहेन, यद्वा सर्व्वसाधारणोऽयं मोहग्रन्थिरन्तश्चरश्चेतनावतामनुपप्लवः संसारतन्तुः ।*

भागी । वत्से वैदेहि ! देवि भूतधात्रि ! समाश्वसिहि ।

---

(१) भगवति का त्वमियञ्च ।

(२) भगवति नमस्ते नमस्ते ।

(३) हा अम्ब ईदृशमहं त्वया दृष्टा । ईदृशी अतिदुःखिनी । दिट्ठेत्यत्र धारिदपुव्वा इतिपाठः सम्यक् धृतपूर्व्वेति सं ।

---

* मोहो वात्सल्यहृतजाड्यं ग्रन्थिर्यस्य, अन्योऽपि तन्तुर्यन्नियविधमितोऽप्रतिविधेयो भवति । काकाक्षिन्यायेन चेतनावतामित्यस्य अन्तश्चर इत्यनेन अनुपप्लव इत्यनेन चान्वयः, अनुपप्लवोऽप्रतिविधेयः ।

Digitized by Google

पृथ्वी । देवि ! सीतां प्रसूय कथमाश्वसिमि । *

एकश्चिरं राक्षसमध्ववासः साङ्गो, द्वितीयश्च सुदुः श्रवोऽस्याः † ।

भागी । कोनाम पाकाभिमुखस्य जन्तोर्दाराणि दैवस्य पिधातुमीष्टे ‡ ॥

पृथ्वी । भागीरथि ! सदृशमुक्तम् । युक्तमेतदा रामभद्रस्य ।

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।

नाहं न जनकोनाग्निर्नानुवृत्तिर्न सन्ततिः § ॥

सीता । अज्जउत्तं सुमराविदव्हि । (१)

पृथ्वी । आः कथमार्यपुत्रः ।

सीता । वलम्भासं । जधा वा अम्बा भणादि । (२)

---

(१) आर्यपुत्रं स्मारितास्मि ।

(२) यथा वा अम्बा भणति । अधुना आर्यपुत्रे मम न कोऽपि सम्बन्धोऽस्तीत्यर्थः ।

---

* कथमाश्वसिमीति दुःखिता दुहिता मातुश्चिरं क्लेशाय भवतीति भावः ।

† साङ्गः समाप्तः, इदानीं तं नानुशोचामीत्यर्थः द्वितीयो जनापवादपूर्वकभर्तृपरित्यागरूपः ।

‡ पाकाभिमुखस्य फलोन्मुखीभूतस्य । दाराणि तन्निमित्तानि । पिधातुं निवारयितुम् ।

§ पीडितः पाणिर्विवाह इत्यर्थः नहि कृतविवाहाया जनापवादश्रवणमात्रेणैव भुजिष्यादिवत् परित्यागोयुज्यते, अग्निरग्निसुद्धिः । अनुवृत्तिः सहवनगमनादिरूपसन्तोषजव्यापारः, सन्ततिरिति गर्भवत्याः परित्यागादितिभावः ।

Digitized by Google

रामः । अम्ब पृथ्वि ! ईदृशोऽस्मि * ।

भागी । भगवति वसुन्धरे ! शरीरमसि † संसारस्य तत् किमसंविदानेव जामाचे कुप्यसि ।

घोरं लोके विततमयशो, या च वक्त्रे विशुद्धि
र्लङ्कादीपे, कथमिव जनस्तामिह श्रद्दधातु ।
दृष्ट्वाकूणां कुलधनमिदं यत् समाराधनीयः
क्षत्स्नोलोकस्तदतिगहनं ‡ किं स वत्सः करोतु ॥

लक्ष्म । अव्याहतान्तःप्रकाशा हि देवता भूतेषु, विशेषेण गङ्गा, तदयमञ्जलिस्ते § ।

रामः । अम्ब ! अनुवृत्तस्त्वया भगीरथगृहे प्रसादः ।

पृथ्वी । देवि ! नित्यप्रसन्नास्मि वः ¶ किन्त्वापातदुःसह स्नेहावेगेनैवं ब्रवीमि, न पुनर्नजानामि सीतास्नेहं रामभद्रस्य ।

---

* ईदृशोऽस्मीति जनापवादव्याकुलेन मया विवाहादिकं सत्यं नगर्हितमित्यर्थः ।

† शरीरमसीति प्रायः प्रथमानां पार्थिवत्वादितिभावः ।

‡ तत् कुशव्रतत्वेनाङ्गीकृतं लोकसमाराधनम् अति गहनमत्यन्तविषमं प्रियतमापरित्यागेनापि पालनीयमित्यर्थः ।

§ अव्याहतोऽप्रतिबन्धोऽन्तरन्तःकरणस्य प्रकाशो ययोः सा । भूतेष्वित्यत्र,न तत्र कस्या हेतुरित्यादिवत् षष्ठ्यर्थे सप्तमी । तदयमित्यत्र तथापीति पाठो न सम्यक् ।

¶ व इति युष्मदनुकम्पितानां भगीरथवंश्यानामित्यर्थः ।

Digitized by Google

दह्यमानेन मनसा दैवादत्यां विहाय सः।
लोकोत्तरेण सत्त्वेन * प्रजापुण्येन जीवति॥

रामः। सकरुणा हि गुरवो गर्भरूपेषु †।

सीता। रुदती कृताञ्जलिः। णेदु मं अत्तणो अङ्केसुं विलम्भं अम्बा। (१)

रामः। किमन्यद्ब्रूयात्।

गङ्गा। शान्तम्। अविलीना वत्सरसहस्राणि भूयाः।

पृथ्वी। वत्से! अपि रक्षणीयौ ते पुत्रकौ।

सीता। अणाधम्हि। (२)

रामः। हृदय! वज्रमयमसि ‡।

गङ्गा। कथं त्वं सनाथायनाथा!

सीता। कीदिसं मम अभव्वाए सणाधत्तणं। (३)

देव्यौ। जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे।

आवयोरपि यत्सङ्गात्पवित्रं प्रक्षय्यते॥ §

लक्ष्म। आर्य्य श्रुतम्।

---

(१) नयतुमामात्मनोऽङ्केषु विलयमम्बा।

(२) अनाथास्मि। अनाथत्वात् कथं पुत्रौ रक्षिष्यामीत्यर्थः।

(३) कीदृशं ममाभव्यायाः सनाथत्वम्। अभव्याया अमङ्गलायाः।

---

* सत्त्वेन धैर्य्येण।

† गर्भरूपेषु बालकेषु।

‡ वज्रमयमसि एतच्छ्रुत्वापि किं न विदीर्य्यसे इत्यर्थः।

§ प्रक्षय्यते प्रक्षयं भवति।

Digitized by Google

रामः । शृणोतु लोकः ।

नेपथ्ये । कलकलः ।

रामः । अद्भुततरं किमपि ।

सीता । किंन्नु अन्तरिक्खं पज्झाउलं । (१)

देवी । ज्ञातम् ।

कृशाश्वः कौशिकोराम इति येषां गुरुक्रमः । *
आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः ॥ †

नेपथ्ये । देवि सीते ! नमस्तेऽस्तु गतिः ‡ नः पुत्रकौ हि ते ।
आलेख्यदर्शने देवो यदाह रघुनन्दनः ॥

सीता । दिट्ठिआ अय्यदेवदाओ परिप्फुरन्ति । (२)

लक्ष्म । उक्तमासीदार्य्येण, सर्व्वथेदानीं तत्प्रस्तुतिमुपस्था-स्यन्तीति ।

देवी । नमोवः परमास्त्रेभ्यो राघवस्य परिग्रहात् । §
अनुध्यातैरुपेतव्यं वत्सयो, भद्रमस्तु वः ॥

---

(१) किमित्यन्तरिक्षं पर्य्याकुलं । पर्य्याकुलं सकलकलम् ।

(२) दिष्ट्या अयदेवताः परिस्फुरन्ति ।

---

* गुरुक्रम उपदेशपारम्पर्यम् ।

† जृम्भकाणां प्राधान्यात् पृथङ्निर्देशः ।

‡ गतिराश्रयः ।

§ राघवस्य परिग्रहादिति नमस्कारं प्रति हेतुः । यदा परिग्रह्यते अनेनेति परिग्रहोदानं तस्मात् रामस्याभ्यनुज्ञानादित्यर्थः अस्यच अनुध्यातैरुपेतव्यमित्यनेनान्वयः ।

Digitized by Google

रामः । क्षुभिताः * कामपि दशां कुर्व्वन्ति मम सांप्रतम् ।
विस्मयानन्दसन्दर्भजर्जराः करुणोर्म्मयः ॥ †

देव्यौ । मन्यस वत्से ! रामभद्रतुल्यावितीदानीं ते पुत्रकौ संवृत्तौ ।

सीता । भअवदीओ ! को एदाणं खत्तिओचिदं कम्म करिस्सदि त्ति । (१)

रामः । एषां वशिष्ठगुप्तानां रघूणां वंशवर्द्धिनी ।
कष्टं सीतापि सुतयोः संस्कर्त्तारं न विन्दति ॥

देव्यौ । पुत्ति किं तवानया चिन्तया, एतौ हि वत्सौ स्वन्यत्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यावः, सएवैतयोः क्षत्रक्षत्यं करिष्यति ।

यथा वशिष्ठाङ्गिरसा ‡ वृषी प्राचेतसस्तथा ।
रघूणां जनकानाञ्च वंशयोरुभयोर्गुरुः ॥

रामः । सुविचिन्तितं भगवतीभ्याम् ।

---

(१) भगवत्यौ कस्तयोः क्षत्रियोचितं कर्म्म करिष्यतीति ।

---

* क्षुभिता उद्रिक्ताः ।

† विस्मयेत्यादि । अहो गङ्गाधृतिवीरखदेवतानामानुकूल्य मिति विस्मयः । मम वंशधरौ पुत्रौ जातावित्यानन्दः, तयोः सन्दर्भोविस्तारः तेन जर्जरामिश्रिताः, करुणोर्म्मयः हा पुत्रावितौ कथमनाथेयं तपस्विनी पालयिष्यतीति करुणरसोद्रेकाः ।

‡ आङ्गिरसः शतानन्दः ।

Digitized by Google

लक्ष्म । आर्य्य ! सत्यं विज्ञापयामि, तैस्तैरुपायैर्वत्सौ कुशलवावुत्पन्नौ ।*

एतौ हि जन्मसिद्धास्त्रौ जातौ प्राचेतसान्मुनेः ।
वीरौ संप्राप्तसंस्कारौ † वयसा द्वादशाब्दिकौ ॥

रामः । वत्स, इति परिप्लवमानहृदयः ‡ सुमुग्धोऽस्मि ।

पृथ्वी । एहि वत्से ! पवित्रीकुरु रसातलम् ।

रामः । हा प्रिये ! लोकान्तरमसि गता ।

सीता । णेदु मं अत्तणो अङ्केसुं विलअं अम्बा, ण सक्कि ईदिसं जीअलोअपरिवुत्तं अणुभविदुं ।(१)

रामः । किमुत्तरं स्यात् ।

पृथ्वी । सत्यत्यागं यावन्मन्नियोगतः पुत्रकयोः § रपेक्ष, परेण ते यथा रोचिष्यते ।

---

(१) नयतु मामात्मनोऽङ्केषु विलयमम्बा, न शक्तास्मि ईदृशं जीवलोकपरिवृत्तमनुभवितुम् । जीवलोकस्य संसारस्य परिवृत्तं परिवर्त्तनमवस्थाविपर्य्ययमित्यर्थः ।

---

* उपायैरिति विशेषणे तृतीया, वत्सौ कुशलवौ तत्तदुपायवन्तावुत्पन्नौ इत्यन्वयः । सीतायां उत्पन्नौ गङ्गाप्रथिव्यानुकूल्येन परिपालितौ वाल्मीकिना च कृतसंस्कारौ विद्यापरिनिष्ठापितौ च जानामीत्यर्थः । यद्वा तैस्तैरुपायैर्गतिभिः कृत्वा कुशलवौ वत्सौ भवतः पुत्रावुत्पन्नौ इत्यन्वयः ।

† प्राचेतसान्मुनेः संप्राप्तसंस्कारौ जातावित्यन्वयः ।

‡ इत्यस्मिन् विषये परिप्लवमानहृदयः सन्दिग्धानचित्तः ।

§ पुत्रकयोः सत्यत्यागं यावदित्यन्वयः ।

Digitized by Google

गङ्गा । एवं नाम । *

ततो निष्क्रान्ता गङ्गापृथ्वीसीताः । †

रामः । कथं विलयएव वैदेह्याः सम्पन्नः, हा देवि ! दण्डकारण्यवासप्रियसखि ! हा चारित्रदेवते ! लोकान्तरं पर्य्यवसितासि ‡ । इति मुह्यति ।

लक्ष्म । भगवन् वाल्मीके परित्रायस्व, एष ते काव्यार्थः । §

नेपथ्ये । अपनीयतामातोद्यकं, भो भोः सजङ्गमस्थावराः प्राणभृतोमर्त्यामर्त्याः पश्यत, महर्षिणा भगवता वाल्मीकिना अनुज्ञातं ¶ पवित्रमाश्चर्य्यम् ।

लक्ष्म । विलोक्य ।

मन्यादिव क्षुभ्यति गाङ्गमम्भोव्याप्तञ्च देवर्षिभिरन्तरीक्षम् ।
आश्चर्य्यमार्य्या**सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति ॥

पुनर्नेपथ्ये । अरुन्धति जगद्वन्द्ये गङ्गापृथ्वौ भजस्व नौ ।
अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः ॥

---

* एवं नामेति भवत्वितिशेषः ।

†निष्क्रान्ता इति सर्व्वपात्रनिष्क्रमणादङ्कसमाप्तिरिति गर्भाङ्कः समाप्त इति ज्ञेयम् ।

‡ पर्य्यवसितासि गतासि ।

§ एष आर्य्यस्य मोहजनकः ।

¶ अनुज्ञातमनुज्ञया सम्पन्नं गङ्गादीनां सलिलोत्थानादिरूपम् ।

** आर्य्या सीता ।

Digitized by Google

लक्ष्म। दिष्ट्या आश्चर्य्यमाश्चर्य्यम्। आर्य्यार्य्य! पश्य पश्य। कष्टमद्यापि नोच्छ्वसित्यार्य्यः।

ततः प्रविशत्यरुन्धती सीता च।

अरु। लरख वत्से वैदेहि मुञ्च शालीनशीलताम्। *
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना॥

सीता। ससम्भ्रमं स्पृशन्ती। समस्सासिदु अज्जउत्तो। (१)

रामः। समाश्वस्य सानन्दं। भोः किमेतत्। दृष्ट्वा सहर्षा ह्रुतं। कथं देवी। सलज्जस्मितम्। अम्बा अरुन्धती सर्व्वे च प्रहृष्यन्त ह्रष्यन्नङ्गशान्तासमेता गुरवः।

अरु। वत्स! एषा भगीरथगृहदेवता सुप्रसन्ना गङ्गा।

नेपथ्ये। जगत्पते रामभद्र स्नार्य्यतामालेख्यदर्शने मां प्रत्यात्मनोवचनम्। यथा सा त्वमम्ब धर्म्मतः क्षुधायामरुन्धतीव सीतायां शिवानुध्यानपरा भवेति, तच्चानृणास्मि जाता।

अरु। दृयन्ते स्वभूर्भगवती वसुन्धरा।

नेपथ्ये। उक्तञ्च पूर्व्वमायुष्मता वत्सात्यागे, यथा भगवति वसुन्धरे स्वाधां दुहितरमवेक्ष्य जानकीमिति, तदनु नाकृतवचनास्मि प्रभोर्वत्सस्येति †।

रामः। कथं कृतमहापराधोभगवतीभ्यामनुकम्पितः, प्रणमामि वः।

---

१ समाश्वसित्यार्य्यपुत्रः।

---

* शालीनशीलतां सलज्जत्वस्वभावम्।

† तदनु तदनन्तरं नाकृतवचनास्मि तव वचनं कृतवत्यस्मि। भूपतित्वात् प्रभोरिति, जामातृत्वाच्च वत्सस्येति रामस्य विशेषणद्वयम्।

Digitized by Google

अरु। भोभोः पौरजानपदा! भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता, पूर्व्वञ्च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सप्तर्षिभिश्च देवैः संस्तुता सावित्रकुलवधूर्देवयजनसम्भवा सीता देवी परिगृह्यतामिति * कथं भवन्तोमन्यन्ते।

लक्ष्म। एवमार्य्यारुन्धत्या निर्भर्त्सिताः प्रजाः क्षत्रस्य भूतग्राम आर्य्यां † नमस्करोति, लोकपालाश्च सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्ते।

अरु। जगत्पते रामचन्द्र!

नियोजय यथाधर्म्मं ‡ प्रियां त्वं धर्म्मचारिणीम्।
हिरण्मय्याः प्रतिकृतेः § पुण्यप्रकृतिमध्वरे॥

सीता। स्वगतम्। जाणादि अज्जउत्तो सीदादुक्खं पमज्जिदुं। (१)

रामः। यथा भगवत्यादिशति।

लक्ष्म। कृतार्थोऽस्मि।

---

(१) जानात्यार्य्यपुत्रः सीतादुःखं प्रमार्ज्जयितुम्। जानातीति परिग्रहान्तरमन्तरेण हिरण्मय्या मत्प्रतिकृतेरेव यज्ञे स्वीकारादितिभावः।

---

* परिगृह्यतां रामेण परिगृहीता भवतु, इति अस्मिन् विषये।

† आर्य्यां सीताम्।

‡ यथाधर्म्मं धर्म्ममनतिक्रम्य, पुनः सीतापरिग्रहे तव धर्म्म एव भविष्यतीत्यर्थः।

§ हिरण्मय्याः प्रतिकृतेः स्थाने इति शेषः।

Digitized by Google

सीता । जीविदच्छि । (१)

लक्ष्म । आर्ये ! एष निर्लज्जो लक्ष्मणः प्रणमति ।

सीता । वच्छ ईदिसोवि चिरं जीव । (२)

अरु । भगवन् वाल्मीके उपनीयेताविमौ * सीतागर्भसम्भूतौ रामभद्रस्य पुत्रकौ कुशलवौ ॥ इति निष्क्रान्ता ॥

रामलक्ष्मणौ दृष्ट्वा । तथैव तत् ।

सीता । सवाष्पाकुला । कहिं ते पुत्तका मे । (३)

ततः प्रविशति वाल्मीकिः कुशलवौ च ।

वाल्मी । वत्सौ कुशलवौ ! एष रघुपतिः पिता युवयोः, लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः ।

सीता । सहर्षकरुणाद्भुतं विलोक्य । कधं तादो । (४)

कुशलवौ । हा तात ! हा अम्ब ! हा मातामह ! ।

रामलक्ष्मणौ । सहर्षमालिङ्ग्य । ननु वत्सौ ! पुण्यैः प्राप्तौ स्थः ।

सीता । एहि जाद कुश ! एहि जाद लव ! चिरस्स परिस्सजध पुणोजम्मन्तरगदं जणणिं । (५)

---

(१) जीवितात्मि ।

(२) वत्स ईदृशोऽपि चिरं जीव । ईदृशोऽपि वने मत्परित्यागं कुर्व्वन्नपि ।

(३) कुत्र तौ पुत्रकौ मे ।

(४) कथं तातः ।

(५) एहि जात कुश ! एहि जात लव ! चिरस्य परिष्वजे थां पुनरपि जन्मान्तरगतां जननीम् ।

---

* उपनीयेतामुपनयनाख्यसंस्कारवन्तौ क्रियेताम् ।

Digitized by Google

कुमारौ । तथा कृत्वा । धन्यौ स्वः ।

सीता । भगवं पणमामि । (१)

वाल्मी । वत्से । ईदृश्येव * चिरं भूयाः ।

सीता । अम्महे तादो, कुलगुरू, अज्जाअणो, सभत्तुआ अज्जा सन्ता देवी, सलक्खणा सुप्पसण्णा अज्जउत्त चलणा, समं कुसलवावि दीसन्ति, ता णिव्भरद्धि आणन्देण । (२)

नेपथ्ये । कलकलः ।

वाल्मी । उत्थायालोक्य च । उपहतलवणो मधुरेश्वरः † प्राप्तः ।

लक्ष्म । सानुषङ्गाणि ‡ कल्याणानि ।

रामः । सर्व्वमिदमनुभवन्नपि न प्रत्येमि § यदा । प्रकृतिरियमभ्युदयानाम् ।

---

(१) भगवन् प्रणमामि ।

(२) अम्म, तातः, कुलगुरुः, आर्य्याजनः, सभर्तृकार्य्या भ्रान्ता देवी, सलक्ष्मणा सुप्रसन्ना आर्य्यपुत्रचरणाः, समं कुशलवावपि दृश्येते, तन्निर्भरास्मि आनन्देन । कुलगुरुर्वसिष्ठः । आर्य्याजनः कौशल्या, निर्भरा पूर्णा ।

---

* ईदृश्येव रामसन्निहितैव ।

† उपहतोऽचिरादेव विनाशितो लवणो राक्षसविशेषो येन सः मधुरेश्वरो मधुराराजः शत्रुघ्नः ।

‡ सानुषङ्गाणि सप्रसवानि कल्याणान्तरजनकानीत्यर्थः ।

§ न प्रत्येमि न विश्वसिमि रामस्य कल्याणपरम्परायाः असम्भाव्यमानत्वादितिभावः ।

Digitized by Google

वाल्मी । रामभद्र उच्यतां, किमन्यें भूयः प्रियमुप करोमि ।

रामः । अतः परमपि प्रियमस्ति । तथापीदमस्तु ।

पापभ्यश्च पुनाति वर्द्धयति च श्रेयांसि येयं कथा
सङ्ख्या च मनोहरा च जगतोमातेव गङ्गेव च ।
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपाबुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥ *

॥ इति निष्क्रान्ताः सर्व्वे ॥

इति सम्भेलनं नाम सप्तमोऽङ्कः ।

समाप्तमिदं महाकविभवभूतिविरचितमुत्तररामचरितं नाम नाटकम् ।

---

§ प्रज्ञप्तिः अभ्युदयान्तरजनकत्वस्वभावः ।

* विन्यस्तरूपा गृहीतसत्त्वभूमिकाः सन्तः अभिनयैरवस्थानुकारैः परिभावयन्तु नाट्येन प्रकाशयन्तु । कवेर्वाल्मीकेः, अथच मम भवभूतेः ।

Digitized by Google